UNIVERSITY OF TORONTO
3 1761 00665631 8

Rāmānanda Sarasvati Svāmi
Vivaranopanyasah

B
132
V3R33
1900
pt. 1

R. T. H. GRIFFITH

AND

G. THIBAUT, Ph. D.

No. 55.

विवरणोपन्यासः

श्रीरामानन्दसरस्वतीविरचितः ।

VIVARANOPANYĀSA,

A Treatise on Vedanta Philosophy,

BY ŚRĪ RĀMĀNANDA SARASVATĪ.

EDITED BY

PANDIT DĀMODARA ŚĀSTRĪ SAHASRABUDHE,

OF THE GOVT. SANSKRIT COLLEGE, BENARES.

FASCICULUS I.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

—:o:—

PRINTED BY FREEMAN & Co., LTD., AT THE TARA PRINTING WORKS, BENARES.

1900.

LIBRARY
JAN 31 1967
UNIVERSITY OF TORONTO

LIBRARY
APR 10 1969
UNIVERSITY OF TORONTO

B
132
V3R33
1900
PT.1

श्रीगणेशाय नमः ।

ॐ नमो भगवत्यै सङ्कष्टनाशिन्यै ।

रामानन्दसरस्वतीकृतो विवरणोपन्यासः ।

वन्दे वन्दारुवृन्दस्फुटमुकुटमणिद्योतिताङ्घ्रिं रमेशं
श्रीरामं सद्य एव प्रणतजनगतध्वान्तविच्छेदहेतुम् ।
सत्यानन्दानुभूतिं जनहृदि विशनान्मायया जीवसंज्ञं
सर्वज्ञं सर्वसंज्ञं निजमहिमदृशां नेति नेत्यक्षराख्यम् ॥ १ ॥
वेदान्तार्थं गभीरं ह्यतिसुगमतया बोधयामीति विष्णु-
र्व्यासात्मा ऽसूत्रयत्तद्दुरधिगममभूद्वादिदुर्बुद्धिभेदात् ।
तंभिन्दन् दुर्बुद्धिभेदं य इह करुणया ऽभाष्ययद्भाष्यमेतत्
वन्दे सर्ववन्द्यं त्रिजगति भगवत्पादसंज्ञं महेशम् [1] ॥ २ ॥
[2]कामाचीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्यातिपूज्य-
श्रीगौरीनायकाभित्प्रकटनशिवरामार्यलब्धात्मबोधैः ।
श्रीमद्गोपालगीर्भिः प्रकटितपरमाद्वैतभासास्मिता ऽस्य
श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतो ऽहं यथालिः ॥ ३ ॥
टीकाकारान्नमस्कृत्य तद्व्याख्यातॄंश्च सिद्धये ।
तद्ग्रन्थयोजनार्थस्य तदुपन्यास ईर्यते ॥ ४ ॥
अर्थसङ्ग्राहकश्लोका अर्थस्मृत्यर्थमीरिताः ।
तेषामपेक्षितो न्याय इह यत्नात्प्रकाश्यते ॥ ५ ॥
हरिशङ्करयोगे ऽस्मिन् भाष्यतीर्थं मुमुक्षवः ।
सिष्णासवः सुखोपायः पन्यास्तेषामयं भवेत् ॥ ६ ॥

नन्वभीप्सितकार्यारम्भे शिष्टा मङ्गलमाचरन्ति । तदयुक्तम् । फलाभावात् । न च समाप्तिः फलम् । प्रमत्तानुष्ठितसमाप्तेर्मङ्गलं विनापि दर्शनात् । नापि विघ्नध्वंसः फलम् । विकल्पासहत्वात् । तथाहि । किं ज्वरादिर्विघ्नः । दुरितं वा । नाद्यः । विज्वरेण कृत-

(१) श्रीशङ्कराचार्यमित्यर्थः ।
(२) कामाक्षीदत्तदुग्धेत्ययं श्लोको ऽसम्बद्ध इति प्रतिभाति ।

मङ्गलस्य वैफल्या[१]पातात् । मङ्गलानन्तरं ज्वराद्यनिवृत्तेश्च । न द्वितीयः । हरिस्मरणेनापि सर्वदुरितध्वंसे मङ्गलानपेक्षणा । न च हरिस्मरणमेव मङ्गलमिति वाच्यम् । दधिदूर्वादिवैफल्यापात । न च तयोर्विकल्पः । असमफलत्वात् । वस्तुतो निष्पापेन कृतस्मरणादेः फलानिरूपणात् । नापि विघ्नानुत्पादः फलम् । उत्पन्ने विघ्ने मङ्गलाननुष्ठानप्रसङ्ग इति चेत् । उच्यते । विघ्नाभावप्रयोज्यसमाप्तिर्मङ्गलफलम् । न समाप्तिमात्रम् । अतो न प्रमत्तानुष्ठितसमाप्तौ व्यभिचारः । न च सापि विघ्नाभावप्रयोज्या । तदीयप्रारिप्सितदुरितविशेषस्य विघ्नशब्दार्थस्य तत्रासत्त्वेन तदभावाप्रसिद्धेः । मङ्गलस्योत्तेजकत्वेन प्रतिबन्धकस्थलीये कार्ये एव हेतुत्वमुचितम् । निर्विघ्नं समाप्यतामिति कामनया स्वेष्टसाधनतांशे भ्रमरहितानां शिष्टानामाचारेणानुमितया श्रुत्या विघ्नाभावप्रयोज्यसमाप्तावेव मङ्गलस्य हेतुत्वबोधनात् । मङ्गलं चापूर्वद्वारा समाप्तिहेतुः । अपूर्वं तु सति विघ्ने तं ध्वंसयति । अदृष्टस्य स्वकार्यानुकूलकारित्वात् अन्यत एव विघ्नध्वंसे तु समाप्तिमेव करोति । सविघ्नकार्यान्तरसमाप्तिं वा । अत एव मङ्गले कृतेऽपि असमाप्तिर्युज्यते[२] । विघ्नबाहुल्यसंभवात् । फलबलेन मङ्गलापूर्वस्यैकविघ्नध्वंसमात्रकारित्वकल्पनात् । काम्यकर्मणि अङ्गैकलयेनापूर्वानुत्पत्तिर्वा कल्प्यताम् । अतो मङ्गलस्यापूर्वद्वारा विशिष्टसमाप्तिफलकत्वमिति संक्षेपः । मङ्गलं ग्रन्थकरणाङ्गमिति वृद्धाः ॥ तत्फलान्यफलशून्यत्वात् । प्रचयगमनस्याङ्गाङ्गिनोः फलीभूतसमाप्त्यधीनत्वात् । शिष्टाचारपरिपालनस्यानुष्ठानमात्राधीनत्वेन मङ्गलापूर्वाजन्यत्वात् । वस्तुतस्तु वैदिकं मङ्गलं लौकिकस्य ग्रन्थकरणस्य नाङ्गमित्यनवद्यम् ॥ ननु युष्मदस्मदित्याद्यध्यासप्रतिपादको ग्रन्थो भाष्यं न भवति । स्वपदव्याख्याने सति सूत्रानुकारिवाक्यैः सूत्रार्थवर्णनस्य भाष्यलक्षणस्याभावात् । तथा हि अथातो ब्रह्मजिज्ञासेति सूत्रे निरर्थकानुवादत्वपरिहाराय शास्त्रे पुरुषप्रवृत्तये च कर्तव्येति पदमध्याहर्तव्यम् । अध्याहृतं च भाष्यकृता ब्रह्मजिज्ञासा कर्तव्येति । तत्र प्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्तव्यत्वानन्वयात् सन्प्रत्ययेन जहल्लक्षणया विचारो गृह्यते । जिज्ञासेति यौगिकपदस्य वा-

---

(१) वैफल्यप्रसङ्गादिति पाठान्तरम् ।

(२) असमाप्तिर्दृश्यते इति वा पाठः ।

कयत्वात् अशक्तत्वेन लक्षकत्वायोगात् । प्रकृत्या फलीभूतं ज्ञानम् अजहल्लक्षणया लक्ष्यते । विषं भुङ्क्ष्वेत्यादिवत् पदद्वये लक्षणोपपत्तेः । ततश्चाथशब्दोपात्ताधिकारिणा मुमुक्षुणा ब्रह्मज्ञानाय विचारः कर्तव्य इति सूत्रस्य श्रौतो ऽर्थः । अर्थादधिकारिविशेषणं मोक्षो ज्ञानफलत्वेनान्वेति । औपनिषदत्वश्रुतेर्ब्रह्मज्ञानकरणतया वेदान्तानां बुद्धौ संनिधानात् विचारविषयता लभ्यते । तथा चाधिकारिणा मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति सूत्रतात्पर्यार्थः । एतदर्थाऽस्पार्शित्वेनाभाष्यत्वात् । भाष्यत्वेनायं ग्रन्थो न व्याख्येय इति चेत् । उच्यते । ब्रह्मज्ञानं हि विचारफलत्वेन सूत्रितं तस्य स्वतो ऽपुरुषार्थस्य कथं फलत्वमिति वक्तव्यम् । न च सुखसाक्षात्कारत्वात् स्वतःफलतेति वाच्यम्। वृत्तेरनित्यतया मुमुक्षुकाम्यत्वादिसम्भवात् । स्वरूपसाक्षात्कारस्य विचारासाध्यत्वात् । नापि सूत्रितज्ञानस्य स्वर्गादिकं फलं सर्वतो विरक्तस्य ब्रह्मजिज्ञासाधिकारात् । अतः परिशेषात् जीवगतबन्धनिवर्तकत्वेनैव ज्ञानं फलम् । बन्धस्य सत्यत्वे ज्ञानान्निवृत्त्ययोगात् अध्यासो भाष्यकारैर्वर्ण्यते । एवञ्चाह को ऽयमित्यादिना अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यन्तेन भाष्येण लक्षणसम्भावनाप्रमाणैः साधितमध्यासं युष्मदस्मदित्याक्षेपसमाधानभाष्याभ्यामनूद्य तात्पर्येण विषयप्रयोजने सूत्रेणार्थात्सूत्रिते प्रतिपाद्येते । यथा धूमवानयमिति वाक्येन हेतुमनूद्य वह्निरेव प्रतिपाद्यते । हेतुवचनस्य प्रतिज्ञातार्थे तात्पर्यात् । यत्परः शब्दः स शब्दार्थ इति न्यायात् । के चित्तु तात्पर्यार्थः सर्वो ऽपि शब्दस्य मुख्यार्थ इत्याहुस्तन्न । लक्षणोच्छेदापत्तेः । तस्मादाक्षेपादिभाष्यद्वयं मुख्यवृत्त्या हेतुमध्यासमनूद्य तात्पर्यानुपपत्त्या लक्षणया विषयप्रयोजने साध्ये प्रतिपादयति । ननु ब्रह्मात्मैक्यलक्षणो विषयः कथं सूत्रित इति चेत् उच्यते । जीवगतकर्तृताद्यध्यासस्य ब्रह्मज्ञाननिवर्त्यत्वं तावत्सूत्रितमित्युक्तम् । जीवब्रह्मणोर्भेदे तत्कथं स्यात् । भिन्नविषययोरध्यासतत्त्वज्ञानयोर्निवर्त्यनिवर्तकभावायोगादित्यर्थाद्विषयो ऽपि सूत्रित इति ॥ अध्यासस्य विषयप्रयोजनहेतुत्वं कथमिति चेत् । उच्यते । अथातो ब्रह्मजिज्ञासेति सूत्रसङ्गतात्मकं शास्त्रं प्रेक्षावत्कृतिविषयः सफलत्वात् कृष्यादिवत् । न च गन्धादिज्ञाने व्यभिचारः । कृतिसाध्यत्वे सतीति विशेषणात् । न च सफलत्वासिद्धिः । सूत्राणि सफलानि बन्धनिवृत्य-

नुकूलत्वात् सर्पभ्रमनिवर्तकरज्जुबोधवत्। न च हेत्वसिद्धिः। सूत्रै-र्विचारितवाक्योत्थज्ञानस्य[१] बन्धनिवर्तकत्वात्। बन्धो ज्ञाननिवर्त्यः अध्यस्तत्वात् रज्जुसर्पवदिति प्रयोजनसाधको ऽध्यासः। जीवो ब्रह्माभिन्नः तज्ज्ञाननिवर्त्याध्यासवत्त्वात् यदित्थं तत्तथा। यथा रज्ज्वाभिन्न इदमंश इति विषयसाधको ऽध्यास इति। तथा चार्थात्सूत्रि-तविषयप्रयोजनपरत्वात्। युष्मदित्यादेः सर्वलोकप्रत्यक्ष इत्यन्तस्य सूत्रार्थस्पर्शिता सिद्धा। तत्राद्यं भाष्यद्वयं शास्त्रस्य साक्षाद्विषयप्र-योजनपरं लक्षणादिभाष्यं तु सर्वलोकप्रत्यक्ष इत्यन्तमध्यासप्रतिपा-दनद्वारा विषयादिपरं अस्यानर्थहेतोरित्यादिकमारभ्यते इत्यन्तं वेदा-न्तानां विषयादिमत्त्वकथनद्वारा तद्विचारात्मकशास्त्रस्य विषयादि-मत्त्वपरम्। अत एव सद्वारत्वसाम्यात् पूर्वेण लक्षणादिभाष्येणास्य भा-ष्यस्य सहोपादानं कृतम्। एवं सूत्रार्थस्पर्शित्वात् भाष्यबुद्ध्यायं ग्रन्थो व्याख्येय इति सिद्धम्। नन्वस्य सूत्रस्य जिज्ञास्यब्रह्मज्ञानाज्ञानाभ्याम-सङ्गतिः। ज्ञाते ऽर्थे जिज्ञासानुपपत्त्या विचारायोगात्। अज्ञाते धर्मिज्ञा-नाभावात्। तथा सूत्रस्य मूलप्रमाणाभावादसङ्गतिः शास्त्रे प्रथमाध्याया-दौ च कथं सङ्गतिरिति चेदुच्यते। नित्येनैवाध्ययनविधिनाधीतसाङ्ग-स्वाध्यायस्य व्युत्पन्नस्य सत्यादिवाक्यादापाततो ब्रह्मज्ञानं जायते। ज्ञानस्यापातत्वं सत्यवादिविशिष्टगोचरत्वं तस्य विशेष्यमात्रजिज्ञासा-हेतुत्वं तु विशेष्यगोचरत्वादुपपन्नम् अकस्माच्छुक्तौ रजतविशिष्टज्ञाने सति किमिदमिति विशेष्यजिज्ञासादर्शनात्। यद्वा सत्यादिवाक्यात् अखण्डसाक्षात्कार एवादावुत्पन्नः लक्षणवाक्यस्याखण्डार्थत्वव्युत्प-त्तेः किन्तु तात्पर्याज्ञानादिपुरुषापराधादनवधारणात्वं तस्यापातत्वं यथा ऽनभ्यासदोषाज्जलज्ञानस्य, यथा वा पूर्वमत्यन्तमदृष्टस्यार्द्रमरीच-फलस्य ज्ञाने ऽनवधारणता। एवमापाततो ब्रह्मज्ञाने जाते तदवधा-रणेच्छोर्विचारसूत्रणं युक्तम्। ब्रह्मज्ञानाय विचारकर्तव्यत्वार्थकस्य सूत्रस्यात्मा श्रोतव्य इति श्रवणविधिर्मूलम्। अर्थैक्यात्। न च ब्रह्मात्म-शब्दाभ्यामर्थभेद इति वाच्यम्। आत्मनि विज्ञाते सर्वं विदितमित्य-द्वितीयत्वेनोक्तस्यात्मनो ब्रह्मत्वं निर्द्धार्य सूत्रे ब्रह्मशब्दप्रयोगात्। यत्तु भिन्नात्मविचारविधिरयम् इति नैयायिकतनयानां जल्पनं तन्मै-त्रेयीब्राह्मणार्थाज्ञानकृतं जायापतिपुत्रादयो यस्यात्मनः प्रियत्वेन स-

---

(१) विचारितवाक्योत्थज्ञानस्येति पाठान्तरम्।

म्मताः स आत्मैव सर्वेभ्यः प्रियतम इति परमपुरुषार्थत्वेन त्वंपदार्थमुपक्रम्य तस्यैव दर्शनममृतत्वसाधनतया ऽऽत्मा द्रष्टव्य इत्यनूद्य तत्साधनत्वेन श्रवणादिकं विधाय यज्ज्ञानात्सर्वविज्ञानं प्रतिज्ञाय तत्सिद्ध्यर्थं दुन्दुभ्यादिदृष्टान्तैरुत्पत्तिस्थितिलयेषु प्रपञ्चस्यात्ममात्रत्वं साधयित्वा तदन्ते एतावदरे खल्वमृतत्वमित्युपसंहारात् । तस्मादद्वितीयब्रह्मात्मविचार एवामृतत्वसाधनदर्शनमार्थवादिकं फलमनूद्य तत्कामस्य विधीयते । प्रतिष्ठाकामो रात्रिसत्रं कुर्यादितिवत् । यत्तु प्रतर्दनं प्रति आहेन्द्रः स्वस्य ज्ञानमाहात्म्यं प्रकटयन् अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छदिति । तत्र श्रवणशून्यसंन्यासिनामिन्द्रयातनाश्रवणाच्छ्रवणं नित्यमिति । तन्न । श्रवणशून्यातुरसंन्यासविधिविरोधेन ज्ञानस्तावकवाक्यस्य श्रवणाकरणप्रत्यवायपरत्वकल्पनायोगात् । इष्टफलकत्वादवघाताद्विवत् यावत्फलमावर्तनीयमित्यावृत्त्यधिकरणविरोधाच्च । किञ्च नानेन वाक्येन श्रवणस्य नित्यत्वं लभ्यते । मुमुक्षुत्रैवर्णिकसर्वाधिकारिकत्वाच्छ्रवणविधेः । वाक्ये च संन्यासिमात्रस्य प्रत्यवायभावात् । न च संन्यासिन एव श्रवणाधिकारो नान्येषामिति वाच्यम् । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदित्यादिश्रुतिस्मृतिभिः ज्ञानफलकत्वेन विहितसंन्यासस्य श्रवणाङ्गत्वायोगात् । न च संन्यासस्यानङ्गत्वे ऽपि अधिकारिविशेषणत्वमस्त्विति वाच्यम् । मानाभावात् । न च शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वा ऽऽत्मन्येवात्मानं पश्येदिति वाक्यं मानमिति वाच्यम् । अस्य वाक्यस्य एतमेव प्रव्राजिन इति वाक्यविहितसंन्यासस्योपरतिपदेनानूदितस्यान्वयव्यतिरेकाभ्यां मुमुक्षोः श्रवणादिद्वारा ज्ञानसाधनत्वेन सिद्धशान्त्यादेरनुवादेन शान्त्यादिमत्कर्तृकश्रवणेन शान्त्यादिना वा पश्येदित्यत्र प्रकृत्यानूदितात्मज्ञाने लिङा समुच्चयविधानार्थत्वात् श्रोतव्य इति प्राप्तं श्रवणं पश्येदित्यनूद्यानुपादेयाधिकारिविशेषणानां विध्ययोगात् । प्राप्तानुवादेन बहूनामङ्गानामप्येकस्मिन् वाक्ये विधातुमशक्यत्वात् । श्रवणस्य प्राप्तत्वेन शान्त्याद्येनकगुणविशिष्टविध्यसम्भवाच्च । तस्मात्संन्यासो नाधिकारिविशेषणम् । नाप्यङ्गं श्रवणस्य । किन्तु ज्ञानप्रतिबन्धककलमषनिवृत्तिद्वारा श्रवणवत् ज्ञानसाधनम् । श्रवणाधिकारी तु श्रोतव्य इति विधिसन्निहितार्थवादोक्तफलकाम एव रात्रिसत्र इवेत्युक्तम् । स च संन्यास्यसंन्यासी वा त्रैवर्णिकः संन्यस्य श्रवणं

कुर्यादिति वाक्यं क्रमपरं जन्मान्तरीयसंन्यासेनापि क्रमसम्भवात् ।

"नित्यं कर्म परित्यज्य वेदान्तश्रवणं विना ।
वर्तमानस्तु संन्यासी पतत्येव न संशय" इति ॥

एवञ्जातीयकं वाक्यं न्यायप्राप्तमनर्थमनुवदति श्रवणे काम्यत्व-बुद्ध्योपेक्षानिरासार्थम् । यदि सांसारिकः श्रेयःसाधनं कर्म परित्यज्य निःश्रेयससाधनं नानुष्ठीयते तदा श्रेयःसाधनाभावान्मूढः पतत्येवेति प्राप्तानुवादः । अरुन्मुखानिति श्रुतेरपि अयमेवार्थः । वस्तुतो ऽरुच्छब्देन रौति शब्दयतीति व्युत्पत्त्या वेदान्तवाक्यमुच्यते न श्रवणम् । तथा च श्रुतिः उपनिषदमावर्तयेदिति । तथा च मुमुक्षोः श्रवणाकरणे प्रत्यवाया-श्रवणात् श्रवणं काम्यमिति सिद्धम् । यद्यपि श्रवणं श्रोतव्यार्थनिर्धा-रणे ऽन्वयव्यतिरेकसिद्धं नापूर्वविध्यर्हं तथाप्यवघातवन्नियम्यते । मु-क्तिसाधनज्ञानकामेनाद्वैतात्मविषयकवेदान्तविचारः कर्तव्य इति । अर्थाद्भिन्नात्मविचारो व्यावर्त्यते । नन्वस्य वस्तुतो मुक्तिहेतुज्ञानसाध-नत्वाभावात् कथं व्यावर्त्यत्वम् । नखविदलनादेस्तुषविमोकसाधनस्यैव व्यावर्त्यत्वदर्शनादिति चेन्न । अपूर्वीयव्रीहितुषविमोकसाधनस्यैव भ्रा-न्त्या प्राप्तस्य तत्र व्यावर्त्यत्वात् । किञ्चाप्राप्तिमात्रं विधेरुपजीव्यम् । अप्रा-प्तिस्तु वस्तुतः साधनेन भ्रान्तिप्राप्तसाधनेन वा विधेयसाधनस्य भव-त्येव तस्मात्कस्य चिद्वेदरसिकस्य मुमुक्षोर्भिन्नात्मविचारप्राप्तौ नियम्यते । के चित्तु ब्राह्मणादेर्वेदाधिकारिणः पुराणप्राधान्यं व्यावर्त्य-मित्याहुः । मुमुक्षुणा वैदिकेन वेदान्तवाक्यान्येव विचारयितव्यानीति नियमादृष्टस्य ज्ञाने उपयोगः सर्वापेक्षान्यायात् । न च वेदान्तेषु विध्यङ्गीकारे लिङादयः श्रूयमाणाः कुण्ठीभवन्तीति भाष्यविरोध इति वाच्यम् । तत्र भाष्ये ज्ञानविधिनिराकरणात् । अनियोज्यवि-षयत्वादिति हेतूक्तेः अज्ञस्य श्रवणादौ नियोगसम्भवात् । न च वि-ध्यङ्गीकारे ब्रह्मासिद्धिः अन्यपराद्वाक्यादन्यासिद्धेरिति वाच्यम् । उपक्रमादिना ब्रह्मात्मन्येव महातात्पर्यात् । तज्ज्ञानोद्देशेनावान्त-रतात्पर्येण श्रवणादिविधानात् । अत एवोद्देश्यत्वाद्ब्रह्मणः प्राधान्यं विधेरेव तच्छेषत्वं ब्रह्मकर्मकज्ञानविधाने तु ब्रह्मणो विधेयज्ञानकारक-त्वेन विधिं प्रति गुणत्वं स्यात् इति युक्तो ज्ञानविधिनिरासः । ननु ब्रह्मपरे वाक्ये अवान्तरतात्पर्येण श्रवणादिविधानं कथमिति चेत् । उच्यते । ब्रह्मपरे वाक्ये यज्ञेनेत्यादिवाक्येन यज्ञादीनां विविदिषाया-मिष्यमाणज्ञाने वा हेतुत्वविधानवत् अधस्तात्समिधं धारयन्ननुद्र-

वेदुपरि हि देवेभ्यो धारयतीत्यत्र विधिस्तु धारणे ऽपूर्वत्वादिति न्यायेन अधोधारणवाक्यैकवाक्यतां भङ्क्त्वा स्रुगुद्दण्डोपरि समिद्धारणविधिवत् दर्शपूर्णमासप्रकरणे तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पयः पिबेदित्यवान्तरवाक्येन मलवद्वाससो व्रतकलापविधानवच्चेति । अथ वा तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति वाक्येन श्रवणं कृत्वा मननं कुर्यादित्यर्थकेन श्रवणादिकं विधीयते । तत्रैवाथ मुनिरिति निदिध्यासनं नियम्यते इति सूत्रकारेण सह कार्यान्तरविधिरिति वक्ष्यमाणत्वात् । मनननिदिध्यासनयोः श्रवणाङ्गत्वमग्रे वक्ष्यामः । तथा च श्रवणविध्यपेक्षितानाम् अधिकारिविषयप्रयोजनानां श्रुतानामपि न्यायेन निर्णयार्थमिदं सूत्रमिति । तद्विधिमूलकत्वमस्य सूत्रस्य सिद्धम् । ये तु श्रवणे विधिं नेच्छन्ति तेषामिदं सूत्रं निर्मूलमनारभ्यं स्यात् विध्यभावे अधिकार्यादिनिरूपणायोगात् इति संक्षेपः । अनेन सूत्रेण श्रवणविधेः स्वार्थे विचारकर्तव्ये समन्वये सिद्धे सति जन्मादिसूत्रमारभ्य विचारः प्रवर्तते इत्युपोद्घातत्वाच्छास्त्रे प्रथमाध्यायादावस्य सूत्रस्य सङ्गतिः । एवं सङ्गतसूत्रार्थस्पर्शित्वादिदं भाष्यं व्याख्येयम् । अत्र सूत्रे कण्ठोक्तस्य ब्रह्मज्ञानस्य स्वरूपेणाफलत्वादधिकारिणो मुमुक्षोर्विशेषणीभूतो मोक्षो बन्धनिवृत्तिरूपो ऽर्थाज्ज्ञानफलत्वेन सूत्रितः । बन्धश्च प्रमातृत्वभोक्तृत्वरूपः तस्य सत्यत्वे ज्ञानान्निवृत्त्ययोगात् अध्यासो ऽर्थात्सूत्रितः । तथा चाध्यासेन विषयप्रयोजने साध्येते ताभ्यां विचारस्य कर्तव्यता साध्यति क्रमः । साध्यसाधनभावश्च पूर्वं दर्शितः । एवमर्थात्सूत्रितो भाष्ये वर्णित इत्युक्तम् । अत्र शङ्कते । ज्ञानफलत्वेन बन्धनिवृत्तेरर्थात्सूत्रितत्वे ऽपि बन्धस्याध्यासो न सूत्रितः । सत्यस्यापि निवृत्तिसम्भवादिति । अत्रोच्यते । किं दर्शनबलात्सत्यस्य ज्ञानान्निवृतिरुच्यते, श्रुतिबलाद्वा ? आद्येपि ज्ञानं किं स्वविषयगतं निवर्तयत्याश्रयगतमुतोभयगतम्? आद्येपि ज्ञानं किं निवर्त्य प्रपञ्चविशिष्टब्रह्मगोचरं वा निवर्त्यागोचरं वा ? नाद्यः चित्रावयविनि पटे नीलविशिष्टद्रव्यज्ञानस्य नीलनिवर्तकत्वादर्शनात् । न द्वितीयः । नीलो ऽयमिति ज्ञानेन स्वागोचरस्य स्वविषयगस्य रसपीतरूपादेरनिवृत्तेः । न च सिद्धान्ते ऽपि पटज्ञानात्तद्गतनिवृत्तिः स्यात् ब्रह्मज्ञानादिव प्रपञ्चनिवृत्तिरिति वाच्यम् । ब्रह्मज्ञानस्य प्रपञ्चोपादानाज्ञाननिवर्तकत्वेन प्रपञ्चनिवर्तकत्वात् । न हि पटाज्ञानविलसितास्तद्गता धर्मा ये न पट-

ज्ञानान्निवृत्तेरन् । न च चित्रस्य रूपान्तरत्वान्नीलादिकं पटे नास्तीति वाच्यम् । कारणे चित्रस्यासत्वेन कार्ये ऽनुपपत्तेः शुक्लादिरूपाणां स्वसमानजातीयारम्भकत्वादनुभवाच्च । नानारूपसङ्कस्यैव चित्ररूपत्वात् अनुभवबलात्संयोगादेरिव नानारूपवद्द्रव्यारब्धद्रव्यरूपस्याप्यवृत्तित्वोपपत्तेः । न द्वितीयः । घटज्ञानस्य स्वाश्रयात्मगतधर्मादिनिवर्तकत्वादर्शनात् । अतो न ब्रह्मज्ञानाज्जीवगतसत्यबन्धनिवृत्तिः । न तृतीयः । मम शरीरमिति ज्ञानादेहात्मसम्बन्धानिवृत्तेः । अतो न ब्रह्मज्ञानाज्जीवब्रह्मोभयगतस्य निवृत्तिः । ननु विद्वान्नाम रूपाद्विमुक्त इति श्रुतिबलात् सत्यस्य ज्ञानान्निवृतिरिति चेन्न । श्रुतौ निवर्त्ये सत्यशब्दाभावात् । उक्तरीत्या लोके सत्यस्य ज्ञानान्निवृतेरदर्शनेन श्रुतायाः बन्धस्य ज्ञानान्निवृतेरुपपत्त्यर्थं मिथ्यात्वस्य कल्पनात् । क्षणिकयागस्य श्रुतस्वर्गसाधनत्वोपपत्त्यर्थमपूर्वकल्पनवत् । न च तार्क्ष्यस्मरणाद्विषं सेतुदर्शनात्पापं सत्यं निवर्तते इति वाच्यम् । श्रद्धानियमादिसापेक्षज्ञानस्य तत्र निवर्तकत्वात् । बन्धस्य तु नान्यः पन्था इति श्रुत्या केवलज्ञाननिवर्त्यत्वात् अध्यासो ऽकामेनापि रज्जुसर्पादेरिव वक्तव्यः । कालादेरपि निवर्त्यान्तःपातित्वेन ज्ञानासहकारित्वात् । अतो ब्रह्मज्ञानं बन्धनिवर्तकं सूत्रयता बन्धस्याध्यस्तत्वं सूत्रितमेव । नन्वेवमपि सूत्रस्य मुख्यार्थं विहायार्थिको ऽध्यास एव किमिति भाष्यकारैर्वर्णित इति चेत् । उच्यते । प्रतिपाद्यमर्थं बुद्धौ सङ्कृह्यादौ तद्धेतुवर्णनमुपोद्घातः, प्रतिपाद्यमादौ प्रतिज्ञाय पश्चात्तद्धेतुवर्णनं प्रतिपादनमिति विभागो ऽस्ति । एवं च सूत्रस्य श्रौतोर्थो विचारकर्तव्यतातत्साधकविषयप्रयोजनसिद्धिहेतुत्वादध्यास उपोद्घातत्वेनादौ वर्णित इति । ननु भवतु प्रयोजनसिद्धिहेतुरध्यासः । बन्धो ज्ञाननिवर्त्यः अध्यस्तत्वाद्रज्जुसर्पवदित्यनुमितिहेतुत्वात् । विषयस्तु प्रत्यगभिन्नमनादि स्वप्रकाशं ब्रह्म । कथं तत्सिद्धौ हेतुरध्यास इति चेत् । तत्वमस्यादिवाक्येनापेक्षितयोग्यताज्ञानहेतुत्वादिति ब्रूमः । जीवगतो बन्धो ऽध्यस्त इति यावन्न वर्ण्यते तावद्भेदान्तैः स्वार्थो जीवब्रह्माभेदो बोधयितुमशक्यः विरुद्धैः किञ्चिज्ञत्वादिधर्मैर्भेदाभावरूपायोग्यतानिश्चयात् । वह्निना सिञ्चेदितिवज्जरद्गवादिवाक्यवच्च । अध्यासज्ञाने तु बिम्बप्रतिबिम्बयोरिव विरोधाभावात्सूत्रभाष्यकाराभ्यां ब्रह्मात्मैक्ये तात्पर्यं वर्णयितुं शक्यं तदनुसारेण वाक्यस्य स्वार्थबोधकत्वमबाधितं भवति । तर्ह्यत्य-

न्तापेक्षितो ऽध्यासः सूत्रकारेण मुखतः किमिति नोक्त इति चेदुच्यते । सूत्रकारेण प्रतिपादने प्रवृत्तेनादौ विचारकर्तव्यतां प्रतिज्ञाय ब्रह्मात्मनि वेदान्तानां समन्वयं विचार्य जीवात्मनो ऽणुत्वकर्तृत्वादिना विरोधमाशङ्क्य तद्गुणसारत्वात्तद्व्यपदेश इति मुखत एवाध्यास उक्तसमन्वये विरोधनिरासार्थमुक्तः । बुद्धिगतधर्माध्यासाज्जीवो ऽणुरित्यादिव्यवहारो न वस्तुत इति सूत्रार्थः । भाष्यकारस्तु उपोद्घाते प्रवृत्तः प्रवृत्त्यङ्गविषयादिसिद्ध्यर्थम् आदावध्यासं वर्णयतीति अनवद्यम् । एतावता ग्रन्थसन्दर्भेण सिद्धमर्थं सङ्गृह्णाति ॥

" सूत्रार्थस्पर्शिता भाष्ये पश्चात्सूत्रस्य सङ्गतिः ।
श्रवणे विधिरुद्दिष्टः सत्यस्य ज्ञानतो ऽन्विति"रिति ॥

ननु तथापीदं भाष्यं न व्याख्येयम् आदौ मङ्गलाकरणात् । मङ्गलं हि अलौकिकानिषिद्धशिष्टाचारत्वात् श्रुतिविहितं निर्विघ्नसमाप्तिफलकञ्च । न च विघ्नाभावान्मङ्गलाकरणं न दोष इति वाच्यम् । तस्मादेषां तत्र प्रियमिति श्रुत्या, "श्रेयांसि बहुविघ्नानीति" स्मृत्या, लोकप्रसिद्ध्या च सार्थकभाष्ये विघ्नसत्तानिश्चयात् । यस्मात्तत्त्वज्ञो देवान्न सेवते तस्माद्देवानां तत्त्वज्ञानं न प्रियमित्यर्थः । तस्माद्देवकृतविघ्नेन कर्तुर्भ्रान्त्यादिसम्भवात्तत्कृतं भाष्यं न व्याख्येयमित्युच्यते । "सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनं हरि"रिति स्मृतेः । परदेवतातत्त्वानुस्मरणं मङ्गलम् । तच्च शिष्टाचारपरिपालने ऽग्रण्या भाष्यकृता कृतम् । अर्थज्ञानं विना वाक्यरचनानुपपत्तेः । भाष्यस्य तत्त्वार्थकत्वात् । तस्मान्निर्दोषमिदं भाष्यं व्याख्येयमिति सिद्धम् । अत्र प्रथमसूत्रे श्रवणविधिर्विचार्यते इत्युक्तम् । श्रवणं नामाद्वैते ब्रह्मणि वेदान्तानां तात्पर्यनिर्णयार्थो विचारस्तद्विचारात्मकं शास्त्रं कर्तव्यं न वेति सन्देहे पूर्वपक्षः । अधिष्ठानसामान्यांशस्यारोप्येण तादात्म्यप्रमाजन्यसंस्कारो ऽध्यासहेतुः । इदं रजतमिति प्रमानन्तरं शुक्ताविदं रजतमित्यध्यासात् तथा च विज्ञानघने प्रत्यगात्मनि अन्तःकरणाद्यनात्माध्यासो न सम्भवति हेत्वभावात् । तथा हि आत्मानात्मानौ तादात्म्यशून्यौ विरुद्धत्वात् तमःप्रकाशवत् । द्विविधो विरोधः । सहावस्थानायोग्यता तादात्म्यायोग्यता चेति । तत्राद्यो गोत्वाश्वत्वयोरस्ति मिथो ऽत्यन्ताभावव्याप्तत्वात् । न तमःप्रकाशयोस्तयोर्मन्दप्रदीपे वेश्मनि सह स्थितेः । अतस्तादात्म्यायोग्यत्वमत्र हेतुः । ननु तमःप्रकाशयोर्भावाभावत्वं तादात्म्यशून्यत्वप्रयोजकम्।

तथा चोक्तानुमाने हेतुरप्रयोजक इति चेन्न। हेतोर्हेत्वन्तरादूपकत्वात् घटपटयोस्तादात्म्याभावे तदयोग्यत्वस्यैव हेतुत्वात्। तमसो द्रव्यत्वेन भावत्वाच्च। तार्किकास्त्वालोकाभावस्तम इत्याहुस्तन्न। तमःशब्दवाच्यो नाभावः स्वमात्रवृत्तिधर्मप्रकारकप्रतियोगिज्ञानाजन्यप्रत्यक्षविषयत्वाद्घटवत्। सन्निति प्रत्यक्षस्य घटाभाव इति प्रत्यक्षस्येश्वरप्रत्यक्षस्याभावत्वप्रकारकस्मृतेश्च। विषये घटाभावे व्यभिचारनिरासार्थानि क्रमेण विशेषणानि। किञ्चेषत्तमो गाढन्तम इत्यवस्थावत्त्वाच्चलत्वाद्रूपवत्त्वाच्च भाव एव तमः अपाकजनीलरूपस्याश्रयान्तराभावात्तमो द्रव्यमाश्रय इति युक्तम्। विना वार्धं नीलं तम इति प्रतीतेर्भ्रान्तित्वकल्पनायामतिप्रसङ्गापातात्। नन्वालोकसंयोगो रूपिद्रव्यप्रत्यक्षकारणं तदभावान्नीलं तम इति भ्रान्तिरिति चेन्न। गाढे तमस्यग्निव्यणुकप्रत्यक्षदर्शनात्। यद्धिषयचाक्षुषज्ञाने तमः प्रतिबन्धकं तत्रैव प्रतिबन्धकनिवृत्त्यर्थमालोकसम्बन्धापेक्षणात्। न च तमसो रूपित्वे स्पर्शवत्त्वापत्तिः। वायोरपि स्पर्शवत्त्वे रूपित्वापत्तेः। अतो वायौ तमसि च व्यभिचाराद्रूपस्पर्शयोर्न मिथो व्याप्तिः। किन्तु भूम्यप्तेजस्सु साहचर्यमात्रमिति मन्तव्यम्। महाविद्युदादिवन्माया झटिति तमो जनयति। एवमुत्पत्तिज्ञप्तिहेतुसत्त्वात्तमो द्रव्यमिति सिद्धम्। किञ्च एकैकालोकाभावस्य तमस्त्वे सर्वत्र तमोबुद्ध्यापत्तिः। यावदालोकाभावकूटस्य तमस्त्वे मन्दप्रदीपे गृहे तमोबुद्धिर्न स्यात्। अतिस्थूलप्रदीपे तमो नास्तीति बुद्धिर्न स्यात् एकस्य प्रदीपस्य तमःशब्दिताभावकूटाभावत्वायोगात्। यावदालोकानामेवाभावकूटाभावत्वात्। आलोकसामान्याभावस्य तमस्त्वे तम उत्पन्नं, नष्टमिति बुद्धिर्न स्यात्। यत्तु निमीलितनयनस्यापि तमोदर्शनाद्रूपदर्शनाभाव एव तम इति प्रभाकरोक्तं, तन्न। पिहितकर्णपुटस्यान्तरशब्दोपलब्धिवदान्तरतमोद्रव्योपलम्भसम्भवात्। न चैवं सत्यञ्जनद्रव्योपलब्धिः स्यादिति वाच्यम्। फलबलेनायोग्यताकल्पनात्। तमोन्तःस्थस्य बहिरालोकरूपदर्शनेन सह तमोदर्शनाच्च न रूपदर्शनाभावस्तम इत्यलमतिप्रसङ्गेन। एवञ्च तादात्म्यायोग्यत्वादात्मानात्मनोस्तादात्म्यं नास्ति तमःप्रकाशवदित्यनुरूपो दृष्टान्तः। अत्राह सिद्धान्ती। आत्मनि अहङ्कारादेस्तादात्म्याभावे कथमध्यासानुपपत्तिरित्युच्यते? अधिष्ठानसामान्यांशस्यारोप्यविशेषेण तादात्म्यं क्वचित्सत्यं वाच्यम्। अन्यथा तत्प्रमाजन्यसंस्कारालाभादहं कर्तेत्यध्यासे तु चिदात्मैव

सामान्यं, भ्रमे भासमानाधिष्ठानांशस्यैव सामान्यत्वात् । न च तस्याहङ्कारेण सत्यं तादात्म्यं सम्भवति द्रष्टृदृश्ययोः स्वाभाविकैक्यायोगात् । न च निरवयवस्य चिदात्मनो ऽसङ्गस्य स्वतो वा हेतूपरागाद्वा सावयवदृश्याहङ्कारात्मना परिणामः सम्भवति येन तादात्म्यं सत्यं स्यात् । ननु चिति अचिदध्यासे चिदचितोस्तादात्म्यं क्वचित्सत्यम् वाच्यम् । न तु चिदधिकरणकाचित्तादात्म्यं गौरवात् । तच्चात्र सुसम्पादम् । अहमुपलभे इत्यहङ्कारे चैतन्यतादात्म्यानुभवादिति चेन्न । अहङ्कारस्य स्वत एव चिदभेदे साक्षिवेद्यत्वव्याघातात् । समयोर्दीपयोर्मिथो ग्राह्यत्वादर्शनात् । न चाहङ्कारस्य हेतूपरागात् चित्परिणाम इति वाच्यम् । जडपरिणामस्य चित्त्वायोगात् । ननु दर्पण इव मुखस्य सन्निधानमात्राज्जडे चितः संसर्गभानमस्त्विति चेत् ? न । बिम्बप्रतिबिम्बभावस्यातात्त्विकत्वेनाध्याससिद्ध्यधीनत्वादतः क्वचिदपि चिदचितोस्तादात्म्यासत्त्वेन तत्प्रमाजन्यसंस्कारस्य हेतोरभावादध्यासो न सम्भवति । निरवयवनिर्गुणात्मनि गुणावयवसादृश्याभावाच्च । यद्यपि कर्तृत्वादिधर्माध्यासो ऽहङ्काराद्युपाधिको न साहश्यमपेक्षते तथा ऽप्यहङ्कारादिधर्म्यध्यासो निरुपाधिकः साहश्यमपेक्षते । तस्मादध्यासाभावे विषयप्रयोजनयोरभावाच्छास्त्रं नारम्भणीयमिति प्राप्ते सिद्धान्तः । आत्मानात्मनोरहमिति प्रतीतियोग्यत्वं साहश्यम् । वस्तुतो निरुपाधिकाध्यासे ऽपि न साहश्यं कारणम् । नीलं नभ इत्यध्यासात् । न हि रूपनभसोः साहश्यमस्ति । संस्कारो ऽप्यनुभवजन्यः कारणं न प्रमाजन्यो गौरवात् । तथा च रागद्वेषादिदोषकर्तृत्वभोक्तृत्वाध्यासानां बीजाङ्कुरवदनादित्वात्पूर्वपूर्वभ्रमजन्यसंस्काराद्युत्तरोत्तराध्यासः सम्भवति । एतदभिप्रेत्योक्तं भगवता भाष्यकृता । "अन्योन्यात्मकतामध्यस्य सत्यानृते मिथुनीकृत्य नैसर्गिको ऽयं लोकव्यवहार" इति । सो ऽहं ममेदमित्यध्यासः प्रवाहतो ऽनादिरित्यर्थः । प्रवाहानादित्वं हेतुहेतुमद्भावेनेति दर्शयितुम् अध्यस्य मिथुनीकृत्येति क्त्वाप्रयोगः कृतः । सत्यानृते इति शुक्लो घट इति प्रमानिरासार्थं मिथुनीकरणमध्यास एव । ननु स्वप्रकाशात्मनि अज्ञानासम्भवात्कथमध्यास इत्याशङ्क्याह मिथ्याज्ञाननिमित्त इति संस्फुरदात्मतत्त्वमाहात्म्यानाद्यनिर्वचनीयमज्ञानमध्यासं जनयति । तस्योपादानत्वे ऽपि दोषतया ऽहङ्काराध्यासकर्त्रीश्वरोपाधितया वा निमित्तत्वं मन्तव्यम् । ननु कथमज्ञानमध्यासोपादानमिति चेदन्वयव्यतिरेकाभ्यामिति ब्रूमः । ननु शुक्ति-

तत्त्वज्ञानं रजताध्यासप्रतिबन्धकं, ततश्च शुक्तिज्ञाने ऽसत्यध्यासो ऽन्यथा नेत्यन्वयव्यतिरेकौ प्रतिबन्धकाभावविषयाविति चेदुच्यते । सत्यां सामग्र्यां कार्यानुत्पादप्रयोजकं प्रतिबन्धकम् । तथैव वृद्धव्यवहाराच्च हि दोषघटिताध्याससामग्र्यां सत्यां तत्त्वज्ञानमस्ति अतो न प्रतिबन्धकम् । न च प्रातीतिकरजतस्योपादानापेक्षा नास्तीति वाच्यम् । प्रातीतिकं सर्वं कार्यं सोपादानं भावकार्यत्वात् घटवदित्यनुमानात् । न च घटेन सहोत्पन्नक्रियागुणयोर्व्यभिचार इति वाच्यम् । सहोत्पत्त्यसिद्धेः । सहोत्पत्त्यङ्गीकारे तु तयोर्घटोपादानमृदुपादानकत्वात् । द्रव्यस्य स्वासमवायिकारणसामानाधिकरण्यनियमे ऽपि रूपादीनां तदभाववत्स्वोपादानवृत्तित्वनियमस्याप्यभावात् । नन्वध्यासस्याज्ञानादन्यदुपादानमस्त्विति चेन्न तावदात्मा रजततज्ज्ञानात्मकाध्यासस्योपादानम् अपरिणामित्वात् । इदमंशसंयुक्तचक्षुषेदमाकारज्ञानपरिणाम्यन्तःकरणमपि न प्रातीतिकरजतोपादानं प्रतीतेः प्रागसति रजते इन्द्रियसंयोगासम्भवेन बहिरस्वतन्त्रस्य मनसः प्रतीत्युपादानत्वायोगात् । न हि प्रतीतिं विना प्रातीतिको ऽर्थः स्यातुमर्हति । न च साक्ष्येव प्रतीतिरिति वाच्यम् । तथाप्यन्तःकरणाध्यासे ऽन्यस्योपादानत्वासम्भवेनाज्ञानस्यैव सर्वत्रोपादानत्वौचित्यात् । नापि प्रमातृकरणविषयदोषा रागकाचसादृश्यादयो ऽध्यासोपादानं कार्यानाश्रयत्वात्, कार्यतादात्म्यवतः कारणस्योपादानत्वात्, तेषामननुगतत्वाच्च । नापि सत्य इदमंश उपादानं कार्यस्यापि सत्यत्वापातात् परिणामस्य परिणामिसमानसत्ताकत्वादतः परिशेषादधिष्ठानचैतन्यस्थाज्ञानमेवार्थज्ञानात्मकाध्यासोपादानमित्यहङ्काराध्यासो ऽज्ञानोपादानकः अध्यासत्वात् रजताध्यासवदित्यनवद्यम् । साक्ष्यभिन्नविषयचैतन्ये ऽध्यासो ऽस्तीति भ्रान्तित्वं साक्ष्यात्मनो युज्यते । नन्वज्ञानं ज्ञानाभावः तस्य कथमध्यासोपादानत्वं, न चाज्ञानं भावरूपमस्ति मानाभावादिति चेत् । उच्यते, अहमज्ञो मामन्यञ्च न जानामीति प्रत्यक्षमहं दुःखीति प्रत्यक्षवत्सर्वसंमतं तस्य ज्ञानसामान्यविरोधिवस्तुविषयः स च नाभावः षष्ठप्रमाणवादिनामभावस्याप्रत्यक्षवादिनो ऽपि नात्मनि ज्ञानसामान्याभावः सम्भवति । ज्ञानसमवायिन्यात्मनि यावज्ज्ञानविशेषात्यन्ताभावकूटासत्त्वेन तत्समनियतस्य सामान्याभावस्यायोगात् । न चाहमज्ञ इति सामान्यविरोध्यनुभवो न भवति किन्तु ज्ञानविशेषाभावानुभव इति वाच्यम् ।

अरूपो वायुरित्यनुभवतुल्यत्वात् । न चात्मनि ज्ञानसामान्याभावानुभवो ऽपि सम्भवति धर्मिप्रतियोगिज्ञानसत्त्वासत्त्वाभ्यां तदयोगात्। तस्मात्सकलानित्यज्ञानानुगतं यन्नित्यं चैतन्यं तदेव ज्ञानसामान्यं तद्विरोध्यज्ञानसामान्यं प्रत्यक्षविषयः ॥

एवं त्वदुक्तमर्थं विशिष्य न जानामीति विशेषाज्ञानमपि भावरूपमेव विशेषज्ञानस्य सत्त्वेन तदभावायोगात् । न चात्र परोक्षज्ञानसत्त्वे ऽपि अपरोक्षज्ञानप्रागभावो ऽस्तीति वाच्यम् । धर्मं न जानामीति नित्यपरोक्षार्थं ऽप्यज्ञानानुभवात् । यस्मिन्वस्तुनि कदापि ज्ञानं न भविष्यति तत्राज्ञानं कथं प्रागभावः स्यात् ? न च तत्रात्यन्ताभावो विषय इति वाच्यम् । अनुगतभावरूपाज्ञाने सम्भवत्यननुगतविषयकल्पनानुपपत्तेः । न चानादिचैतन्येन विरोधात्तवाप्यज्ञानानुभवो न स्यादिति वाच्यम् । आवरणेन प्रतिबन्धात्स्वतो विरुद्धस्यापि चैतन्यस्याज्ञानानुभवत्वोपपत्तेः । नन्वज्ञानस्य विशेषणं विषयः कथं साक्षिचैतन्येनावभास्यते मानं विना मेयभानायोगात् इति चेत् उच्यते । सर्वं वस्तु ज्ञाततया ऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव । तत्र ज्ञातत्वं मनोवृत्त्यवच्छिन्नचैतन्यतादात्म्यम् तच्च सुखादावस्ति सुखादीनां मनोवृत्तित्वाच्छुक्तिरूप्यादावप्यस्ति इदमाकारवृत्तिसत्त्वात् । घटादौ मानाधीना वृत्तिरिति क्वचिज्ज्ञातत्ववृत्तिप्रकारेण विषयभाने प्रमाणापेक्षा न त्वज्ञानत्वेन तज्ज्ञाने मानापेक्षा ऽज्ञाततायाविरोधात् । परोक्षार्थे ज्ञातत्वानुभवस्तु वृत्तिविषयगोचर इत्यनुसन्धेयम् । तत्र सतो ऽप्यज्ञातत्वस्य वृत्तिप्रतिबन्धादननुभवः, नतु परोक्षवृत्त्या तस्य निवृत्तिरविरोधात् । अन्यथा शब्दावगतधर्मादौ संशयादिर्न स्यात् । दृश्यते हि निश्चितमहत्त्वे ऽपि चन्द्रे प्रादेशिकत्वभ्रमस्तस्मात्सविषयमज्ञानं साक्षिप्रत्यक्षसिद्धम् । ननु चिन्निष्ठाज्ञानस्याहमज्ञ इति अहङ्कारस्थत्वभानं कथमिति चेत् अहङ्काराज्ञानयोरेकत्राध्यासादिति ब्रूमः । यथा लौहित्यमुखयोः स्फटिकभित्तिप्रतिबिम्बितयोः सतोर्लौहितं मुखमिति भ्रमः तद्वदहमज्ञ इति भ्रम इति ॥

अधुना भावरूपाज्ञाने ऽनुमानमुच्यते । विवादास्पदं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं अप्रकाशितार्थप्रकाशित्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति । पक्षीकृतज्ञानस्य यः प्रागभावो यो विषयो यस्तत्रान्धकारो यच्च विषयस्थमज्ञातत्वं यश्च भ्रमस्तेषां निरासार्थं क्रमेण वि-

शेषणानि । अत्र वदन्ति । यथार्थज्ञानमात्रस्य पक्षत्वे सुखादिज्ञाने परोक्षवृत्तौ च बाधः । तयोरज्ञानानिवर्तकत्वेन साध्याभावादपरोक्षवृत्तेः पक्षत्वे धाराद्वितीयादिज्ञाने बाधः, प्राथमिकात्मापरोक्षवृत्तेः पक्षत्वे ऽपि बाध एव । अनात्मावरकाज्ञानासत्त्वादात्मज्ञानस्य पक्षत्वे चानात्मज्ञाने व्यभिचारः । साध्ये चाद्यपदं व्यर्थं स्वनिवर्त्यपदेनैव प्रागभावनिरासात् । ज्ञानस्य तन्निवृत्तित्वात् । द्वितीयपदमप्यसङ्गतम् । अनात्मनि आवरणाभावात् वृत्तेश्चिदुपरागाद्यर्थकत्वेनाज्ञानानिवर्त्तकत्वात् । स्वनिवर्त्यपदमप्यसङ्गतम् । अज्ञानस्य चिन्निष्ठत्वाद्वृत्तेर्मनःस्थत्वात्स्वदेशगतपदमप्यसङ्गतम् । हेतुरपि यद्यप्रकाशितज्ञानत्वं तदा प्रभायामसिद्धिर्यदि तज्ज्ञानहेतुत्वं तदा पक्षे हेत्वसिद्धिर्यदि तद्व्यवहारहेतुत्वं तदा कालादौ व्यभिचारः । अर्थस्य घटादेरप्रकाशितत्वं यद्यज्ञानावृतत्वं, तदा हेतोः साध्यसमत्वम् असिद्धिश्च । यदि वृत्त्यविषयत्वं तदा वृत्तिसाक्षिणि व्यभिचार इति । अत्राहुः । जन्यसविकल्पकाजन्यघटचाक्षुषप्रमाणज्ञानं पक्षः धारायां द्वितीयादिज्ञाननिरासार्थं सविकल्पकाजन्येति पदं पक्षस्य लाभार्थं जन्यत्वं सविकल्पकस्योक्तम् । पक्षस्य परमते निर्विकल्पकजन्यत्वात् सविकल्पकपदे ईश्वरज्ञाननिरासार्थं चाक्षुषपदम् । सुगममन्यत् । स्वसमानाधिकरणप्रागभावान्यस्वजननायोग्यस्वजन्यध्वंसप्रतियोगिस्वदेशगतपूर्वकत्वं साध्यम् । कदाचिद्घटज्ञानस्य घटपटसंयोगहेतुत्वमस्ति घटं दृष्ट्वा पटेनाच्छादनात् । तथा चेच्छाप्रागभावस्वजनकाहष्टात्मत्वानां त्रयाणां घटपटसंयोगप्रागभावस्य च व्यावर्तकानि क्रमेण विशेषणानि । न च लाघवादभावादन्यत्वमेवास्तु स्वप्राक्पदं व्यर्थमिति वाच्यम् । अभावान्यत्वापेक्षया विशिष्टाभावान्यत्वस्य भेदात् विशिष्टाभावत्वविशेषणं न व्यर्थं तद्विना स्वेष्टस्य विशिष्टाभावस्यालाभात् । पराभिमतप्रागभावान्यत्वमत्रेष्टमिति तत्प्रकारकानुमित्यर्थं विशेषणं युक्तमेव घटावच्छिन्नचैतन्यस्थं तद्विषयकं तूलाज्ञानं घटावच्छिन्नचैतन्यविषयया बुद्धिधिया वृत्त्या चक्षुषा निर्गत्य विषयचैतन्यस्थया स्वदेशगतं निवर्त्यत इति न कश्चिद्दोषः । यद्वा अन्धकारनिवृत्त्युत्तरक्षणवृत्तिचाक्षुषप्रमा पक्षः । स्वप्रागभावान्यस्वविषयसंशयादिजननयोग्यस्वसत्ताक्षणनियतध्वंसप्रतियोगिस्वदेशगतपूर्वकत्वं साध्यम् । परमते प्रागभावस्यैवाज्ञानत्वेन संशयादिजनकत्वात् प्रतियोग्यनिवर्त्यत्वे ऽप्यभेदे व्याप्त्यङ्गीकारेण प्रतियोगिनो

ज्ञानस्य सत्ताक्षणे नियतो यो ध्वंसो ज्ञानात्मकस्तत्प्रतियोगित्वा-त्तस्य निरासायादिपदं स्वप्राक्पदं पूर्ववदिष्टसिद्ध्यर्थं यथा ब्रह्म स्व-समानसत्ताकजीवभेदवत् अभ्रान्तत्वात् घटवदिति त्वदनुमाने स्वेष्टसत्यभेदसिद्ध्यर्थं स्वसमानसत्ताकेति पदं तद्वत् । प्रमाहेत्वह-ष्टनिरासार्थं द्वितीयपदम् । तस्याः सुखाद्यनुभवफलनाश्यत्वान्न तृती-यपदेन निरासः । आत्ममनःसंयोगनिरासार्थं तृतीयम् । अन्धकारनिरा-सार्थं चतुर्थपदम् । एतद्विषयावरणसमयावृत्तित्वे सति एतदावरण-निवर्तकत्वं हेतुः कालादिनिरासार्थं सत्यन्तम् । उत्तरकालीनघटादिनि-रासार्थं द्वितीयपदम् । संशयादिजननयोग्यमावरणशब्दार्थः । तच्च ज्ञा-ने सति नास्तीति सर्वानुभवसिद्धमिति नासिद्धिः । एवं प्रत्यक्षानु-मानाभ्यां भावरूपाज्ञानं सिद्धम् । एवं विशुद्धब्रह्मात्मनि शुक्तिकायां चाहङ्काररजतादिमिथ्यार्थावभासान्यथानुपपत्तिरपि तत्र प्रमाणम् । पूर्वोक्तरीत्योपादानान्तराभावात् । तस्य च हेत्वदर्शनादनादित्वम् । एवं च यच्चानादि स्वयं मिथ्यामिथ्योपादानं तदज्ञानमिति स्थितम् । एवं सिद्धमर्थमाह ॥

"अन्धकारस्य भावत्वं तथा ऽध्याससमर्थनम् ।
नैसर्गिकत्वसिद्ध्यर्थं तथा ऽविद्यासमर्थन"मिति ॥

कृतमिति शेषः । अनाद्यविद्यात्मना ऽध्यासस्य नैसर्गिकत्वसिद्धि-रिति भावः । तस्याज्ञानस्यात्मैव विषयः तत्प्रयुक्तावरणरूपातिशयशा-लित्वात् । अनात्मन्यावरणे प्रमाणफलयोरभावात् । ननु अज्ञातो घट इत्यनुभवो मानमिति चेन्न तावदयमनुभवः प्रत्यक्षः; घटस्य ज्ञाने स-त्यज्ञानासत्त्वात् । असति सम्बन्धिनि ज्ञानाभावात् । नाप्यनुमितिः लि-ङ्गाभावात् । ननु घटः पूर्वमज्ञातः इदानीं ज्ञातत्वात् संमतवादिति चेन्न । धाराद्वितीयादिज्ञानगम्ये दुःखादौ च व्यभिचारात् । न चेदानीमेव ज्ञातत्वं हेतुः, एवकारार्थस्यैवात्र साध्यतया विशेषणासिद्धेः । न चास्मर्यमाणत्वं हेतुः । ज्ञाते ऽप्यस्मृतिसम्भवात् । तस्मादज्ञानावृ-तचैतन्यतादात्म्येन घटादीनामध्यस्तत्वादज्ञातो घट इत्यनुभवः । साक्षिरूपचैतन्यावरणादेव जडानामपि अव्यवहारोपपत्तौ पृथगाव-रणे फलाभावात् अनात्मनि शुक्त्यादावावरणाभावे ऽपि चित्तेपदर्शना-दज्ञानविषयत्वव्यपदेशः । ननु न जानामीत्यनुभवस्य सर्ववस्तुष्वे-काज्ञानावरणविषयत्वे लाघवादज्ञानमावरणं चैकं तस्यैव जडव्य-वहारप्रतिबन्धकत्वे कथं तन्निवृत्तिं विना घटादिव्यवहार इति चेत्

उच्यते । अस्मिन्पक्षे तत्तदाकारवृत्तिज्ञानमुत्तेजकं तेन व्यवहारः । यद्वा घटादिरपि प्रातिभासिक इत्यावृतचैतन्येनैव तव्यवहारः । शुक्तिरूप्यव्यवहारवदिति रहस्यं पक्षद्वये ऽप्यात्मन्यावरणे सत्यपि जडव्यवहारो युज्यते। शुक्तिसाक्षात्कारस्तु न रूप्योपादानाज्ञाननिवर्तकः मुक्तिप्रसङ्गात् । किन्तु दण्ड इव घटस्य रूप्यस्योपादाने प्रविलयहेतुः । ननु तर्हि सविलासाज्ञाननिवृत्तेर्लोके काप्यदर्शनात्तत्त्वज्ञानस्य सा कथं दृष्टफलमित्युच्यते इति चेत् । उच्यते । लोके शुक्तितत्त्वज्ञानात्तद्विरोधिनो ऽध्यासस्य निवृत्तेर्दर्शनादज्ञानस्यापि ज्ञानविरोधित्वाद्विरोधिनिवृत्तिर्दृष्टफलमित्युच्यते । अथवा मूलाज्ञानमेव लाघवादेकं तस्य धर्मरूपाणि विषयावच्छिन्नचैतन्ये साक्षिणि च व्यासज्यवृत्तीनि अवस्थापदवाच्यान्यनन्तानि कल्प्यन्ते । ज्ञानेनाज्ञानं निवृत्तमित्यबाधितानुभवात् । तानि च मूलाज्ञानवत्स्वाश्रयचैतन्यमेवावृण्वन्ति नानात्मानमिति सिद्धम् । तत्सङ्गृह्णाति ॥

" जडावृतिनिरासश्चाप्यज्ञानावरणैकता ।
अथ वा मूलमायैका ऽवस्थाज्ञानं तु भिद्यते " इति ।

नन्वात्मावरणं नाम कीदृशं, किं तत्र प्रमाणं, किं फलमिति चेदुच्यते । ब्रह्म तावत्स्वप्रकाशं प्रत्यगभिन्नं सर्वश्रुतिसिद्धं, तथापि लोको नास्ति ब्रह्म न प्रकाशते इति व्यवहरति । तथा चास्ति प्रकाशते इति व्यवहारे सामग्र्यां सत्यां नास्तीत्यादिविपरीतव्यवहाररूपफलान्यथानुपपत्तिरेव विपरीतव्यवहारयोग्यत्वरूपमावरणं कल्पयति । तथा ऽप्यनुभवो ऽप्यस्ति मूढो ऽहं न किं चिज्जाने इति । अतः स्वप्रकाशेपि आत्मनि विचित्रशक्तिभावरूपाविद्याप्रयुक्तमावरणं दुरपह्नवम् । नन्वज्ञानप्रयुक्तमावरणमस्तु अज्ञानं तु अग्रहणमिथ्याज्ञानतत्संस्कारकर्मभ्यो ऽन्यन्न पश्याम इति चेन्न । सुषुप्तावात्मानवभासानुपपत्तेः । न हि स्वयम्प्रकाशस्यात्मनो जडाया मनोवृत्तेर्ग्रहणशब्दिताया अभावेनानवभासो युक्तः खद्योताभावेनेव सवितुः । न सुषुप्तौ भ्रान्तिरस्ति नापि संस्कारः आवरकः भ्रान्तिसंस्कारे सत्यपि शुक्तितत्त्वावभासदर्शनात् । नापि कर्मावरकं मानाभावात् पूर्णानन्दत्ववच्चैतन्यस्याप्यस्फूर्तिप्रसङ्गाच्च । अज्ञानस्य तु भावरूपस्य प्रत्यक्षत्वात्स्वसाधकं चैतन्यांशं विहाय स्वाश्रयविशेषांशावरकत्वं युक्ततरं स्वमपीतो भवतीत्यहङ्कारस्य सुषुप्तौ नाशश्रवणात् । कर्मसंस्काराश्रयत्वेनाविद्या ऽवश्याभ्युपेया । नन्वखण्डतमो द्रव्यमावर-

कमिति चेन्न । तस्य नित्यत्वे मुक्त्ययोगात् ज्ञाननिवर्त्यत्वे तस्यैवाज्ञानत्वात् । अत्र कश्चिद्भेदाभेदाभ्यां सर्वसङ्करवादी जल्पति । अग्रहणमिथ्याज्ञानतत्संस्कारा एवाज्ञानमिति स प्रष्टव्यः । किं तन्मिथ्याज्ञानमिति ननु मनुष्योऽहमिति भ्रम इति चेन्नायं भ्रमः भेदाभेदज्ञानत्वात् । खण्डो गौरिति ज्ञानवत् । ननु यथेदमिति प्रतिपन्नं रूप्यं तत्रैव निषिद्ध्यते तद्वदहमिति ज्ञातं मनुष्यत्वं निषिद्ध्यते । नाहं मनुष्यः किन्तु ब्रह्मेति तथा चायं भ्रमः स्वविशेष्ये बाधितार्थज्ञानत्वाद्रूप्यज्ञानवदिति चेन्नायं गौः खण्डः किन्तु मुण्ड इति गोत्वावच्छिन्नैक्येन ज्ञातस्य खण्डस्य तत्रैव निषेधात् । खण्डो गौरिति ज्ञाने व्यभिचारात् । ननु खण्डो गौरिति प्रतिपन्नोपाधौ गोत्वावच्छिन्नमात्रे विशेष्ये खण्डो न बाध्यते किन्तु गोत्वावच्छिन्ने मुण्डे स बाध्यते, अतस्तत्र हेत्वभावान्न व्यभिचार इति चेन्न । तथा सति पक्षे हेतुस्वरूपासिद्धेः न ह्यहन्त्वावच्छिन्ने मनुष्यैक्यनिषेधः किं त्वहन्त्वावच्छिन्ने ब्रह्मणीति तुल्यत्वात् । ननु जातिव्यक्तिगुणगुणिकार्यकारणविशिष्टस्वरूपांशांशिभावाः पञ्च यत्र, तेष्वेव भेदाभेदाविति न हेत्वसिद्धिरिति चेन्न । तव क्षपणकशिष्यत्वेन सर्ववस्तुषु भेदाभेदवादित्वव्याघातात् । मनुष्यशब्दितदेहस्य ब्रह्माभिन्नात्मकार्यत्वाच्च । तस्मात्सर्वत्र भेदाभेदयोः सत्त्वे भ्रान्तिस्तव मते दुर्लभेति सिद्धम् । किं च भ्रान्तेर्मनोधर्मत्वे आत्मन्यविद्या न स्यादिति बन्धमुक्तिवैयधिकरण्यम् न चात्मनः परिणामो भ्रमः । ज्ञानरूपस्य नित्यज्ञानगुणकस्य वा ज्ञानान्तरपरिणामायोगात् । यावद्द्रव्यभाविस्वसमानजातीयगुणान्तरावरुद्धे एकमात्रवृत्तिगुणान्तरस्यानुदयात् । अतो न शब्दद्वित्वादौ परमते व्यभिचारः । आत्मनो नित्यज्ञानं सुषुप्त्यनुसन्धानान्यथानुपपत्त्या सिध्यति । तस्माद्भ्रान्त्यादिमूलत्वेनानिर्वचनीयभावरूपमज्ञानमनाद्येष्टव्यमिति तस्याध्यासोपादानत्वं युक्तमेव । एवमुपादानात्मना प्रवाहरूपेण वा नैसर्गिको ऽध्यासो हेतुहेतुमत्त्वान्नैमित्तिक इत्युच्यते भाष्यकृता मिथ्याज्ञाननिमित्त इति । एवं निष्कलङ्कचैतन्यैकताने निरंशानन्दैकरसे ज्ञानादिसाक्षिणि अज्ञानाध्यासो ऽनादिस्तत्कार्याध्यात्मिकाध्यासानामहमिति प्रथमो ऽध्यासः । नन्वधिष्ठानारोप्यांशद्वयानुपलम्भान्नायमध्यास इति चेन्न । अहङ्कारटीकायामंशद्वयस्य वक्ष्यमाणत्वात् । नन्वहङ्कारेन्द्रियाणां साक्षिभेदानुपलम्भादस्त्वध्यासः, शरीरस्य तु मम शरीरमिति भेदोपलब्धेरिन्द्रिय-

ग्राह्यत्वाच्च नाध्यास इति चेन्न । कल्पितस्याहङ्काराख्यस्य भोक्तृ-भोगोपकरणत्वेनाध्यस्तत्वानुमानात् । मायाविना कल्पितस्य राज्ञश्छत्रादिवदिति । भेदोपलम्भस्तु परोक्षः । इन्द्रियग्राह्यत्वं च नाध्यस्तत्वविरोधि । तथा चाधिष्ठानसामान्यज्ञानचैतन्यं पूर्वपूर्वभ्रमजन्यसंस्कारश्च निमित्तं अनाद्यज्ञानमुपादानं दोषश्च । अज्ञातात्मा कर्तेति सामग्रीसत्वादध्यासः सम्भवति । तस्माद्विषयप्रयोजनसम्भवाच्छास्त्रमारम्भणीयमिति सिद्धम् ।

अधुना लक्षणसम्भावनाप्रमाणैरध्यासः साध्यते । तत्राह—को ऽयमध्यासो नामेत्यादि ? कथं पुनः प्रत्यगात्मनीत्यस्य प्राक्तनं लक्षणभाष्यं तदादिसम्भावनाभाष्यं तमेतमविद्याख्यमात्मानात्मनोरित्यारभ्य सर्वलोकप्रत्यक्ष इत्यन्तं प्रत्यक्षानुमानार्थापत्त्यागमाख्यप्रमाणपरमिति विभागः? ननु लक्षणस्येतरभेदज्ञानं फलं, सम्भावनाया असम्भावनानिरासः फलम् । असम्भावना नाम ग्राह्यवस्त्वभावबुद्धिः । एवञ्च प्रमाणेन सर्वतो व्यावृत्तवस्तुसत्तानिश्चये सति लक्षणसम्भावनेन वक्तव्ये तयोः फलस्यार्थसिद्धत्वादिति चेत् ? उच्यते । यदि वस्तुसाधकमानेन लक्षणं ज्ञायेत यथा चक्षुषा घटत्वं, तदा स्वयं ज्ञानलक्षणसामर्थ्यात्तत्फलसिद्धेः पृथग्लक्षणं न वाच्यम् । इह तु अध्यासे साक्षिप्रत्यक्षं व्यवहारो ऽध्यासमूलः । तदन्वयाद्यनुविधायित्वादित्यनुमानं व्यवहारानुपपत्तिः । ब्राह्मणो यजेतेत्याद्यागमश्चाहं मनुष्य इति ज्ञानमात्रे मानं; न तु तज्ज्ञानस्याध्यासत्वं तेन ज्ञातुं शक्यं किन्तु बाधेनाध्यासत्वं शुक्तिरूप्यादिज्ञानस्य ज्ञायते । तल्लक्षणयोगादहं मनुष्य इति ज्ञानस्याध्यासत्वं स्पष्टं भवति नान्यथा । तस्मादस्य ज्ञानस्य प्रमातो भेदज्ञानाय लक्षणं वाच्यम् । भेदज्ञानं विना बाधानुदयादिति सिद्धम् । आत्मानात्मनोः परोक्षं भेदज्ञानमादायाहं[1] नर इत्यादिज्ञाने लक्षणं योज्यम् । यद्यपि क्वचित्प्रमाणेनैवासम्भावना निरस्यते यथा पक्षिणामाकाशगमने, तथापि क्वचित् प्रत्यक्षसिद्धे ऽप्यसम्भावना दृश्यते । यथा दूरदृष्टवता दृष्टे सवितृसुषौ एवमात्मनि अविषये ऽसङ्गे गुणावयवशून्ये स्वतोभासमानविशेषे आरोप्य विशिष्टज्ञानविषयत्वस्य दोषानुषङ्गस्य सादृश्यस्य विशेषादर्शनस्य चाध्यासव्यापकस्याभावादध्यासासम्भावना स्यादिति पृथक् सम्भावनाऽपि वाच्या ।

अतो लक्षणसम्भावनाप्रमाणानि क्रमेणोच्यन्ते । अथ सिद्धान्तन्यू-

(१) भेदज्ञानायाहमिति पाठान्तरम् ।

नाधिकोक्तिभिः पञ्चहेत्वाभासैश्च वर्जिता प्रमाणयुक्तिभ्यां तत्त्वनिर्णय-फलावादकथा । तद्रूपमिदं शास्त्रमिति सूचनार्थं लक्षणप्रश्नभाष्ये आहेति परोक्तिः । स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यध्यासलक्षणं भाष्यम् । अस्यार्थः । स्मृतिः स्मर्यमाणं वस्तु तद्रूपस्तत्सदृशः । सादृश्यं स्फोटयति । पूर्वेति । दृष्टं दर्शनं संस्कारद्वारा पूर्वदर्शनादवभास्यत इत्यर्थः । तथा च संस्कारजन्यज्ञानविषयत्वं शुक्तिरूप्यस्य स्मर्यमाणेन सादृश्यम् । एवं च स्मर्यमाणसदृशत्वे सति परत्रावभास्यत्वमध्यस्तत्वम् । योग्याधिकरणे प्रत्यभिज्ञायमाने देवदत्ते ऽतिव्याप्तिनिरासाय परत्रेति पदम् । अयोग्याधिकरणपरमुपात्तम् । अधिकरणस्यायोग्यत्वं कल्पितार्थात्यन्ताभावरूपत्वं तदत्यन्ताभाववत्वं वा । यद्यप्येकावच्छेदेन स्वसंसृज्यमानाधिकरणे स्वात्यन्ताभाववत्यवभास्यत्वं साद्यनाद्यध्यस्तसाधारणं निर्दुष्टं लक्षणम् । संयोगे ऽतिव्याप्तिनिरासायैकावच्छेदेनेति । कालभेदेन स्वात्यन्ताभाववत्यवभास्ये घटे ऽतिव्याप्तिनिरासाय स्वसंसृज्यमानेति पदम् तेनाभावकाले तदधिकरणे प्रतियोगिसंसर्गस्य वर्तमानतोच्यते । ननु संयोगादिकमध्यस्तं लक्ष्यमिति चेत्सत्यम् । चैतन्ये सर्वमध्यस्तं न तु जडे वृक्षादौ संयोगादिकमध्यस्तमित्यलक्ष्यमेतत् । तथापि स्मृतिरूपपदं न व्यर्थम् । तद्बलेनैव परत्रावभासपदाभ्यामुक्तलक्षणलाभात् । तत्पदं विना परत्रावभास इत्युक्तावन्यथाख्यातिशङ्का स्यात् । तत्पदेन परत्रावभास्यो ऽर्थः । स्मर्यमाणसदृश इत्युक्त्वा स्मर्यमाणाद्भिन्नो ऽर्थस्तत्र वर्तत इत्युक्तं भवति । तत उक्तलक्षणलाभः तस्मिन्नर्थे पूर्वोक्तसामग्रीस्मरणार्थं पूर्वदृष्टपदेन संस्कारजन्यत्वमुक्तमित्यनवद्यम् । अन्ये तु परत्रावभासपदाभ्यामध्याससाधारणलक्षणमुक्तं स्मृतिरूपपूर्वदृष्टपदाभ्यां प्रातीतिकाध्यासलक्षणमुच्यते । अत्र रूप्यस्य स्मर्यमाणेन प्रमाणाजन्यज्ञानविषयत्वं सादृश्यं स्मृतिरूपशब्दार्थः । स्मृतिभ्रमयोः प्रमाणाजन्यज्ञानत्वात् । पूर्वदृष्टपदं तु पूर्वदृष्टजातीयपरम् । अभिनवरूप्यस्य पूर्वदृष्टत्वाभावात् । सद्यो जातघटे स्मर्यमाणे चातिव्याप्तिवारणाय पदद्वयम् । न चाविद्यायां पूर्वमदृष्टायामव्याप्तिः तस्या व्यावहारिकत्वात् । यदि तस्याः प्रातीतिकत्वेन लक्ष्यत्वं तदा तज्जातीयत्वं नामानीतदर्शनाविषयत्वमिति संक्षेपः । एतदभिप्रेत्याह–

अग्रहभ्रान्तिसंस्कारकर्मभिर्नावृतिर्भवेत् ।
सर्वसङ्करवादी च मूलाज्ञानस्य सिद्धये ॥

निरस्तो ऽध्यासभाष्यस्य विभागस्तस्य लक्षणमिति।

अत्राहाख्यातिवादी रजतं स्मर्यमाणमेव न तत्सदृशमत्रापरोक्षमनुभूयते अनुभाव्याभावात् बाधविरोधेनार्थासत्वाच्च । तन्न । अधिष्ठानसामान्यज्ञानदोषादीनामनुभावकत्वात् । इदं रजतमिति पुरोवर्तित्वापरोक्षानुभवबलेनार्थसत्तानिश्चयाच्च । न च बाधानुपपत्तिः । बाधयोग्यार्थस्वीकारात् । तस्मादत्र कालत्रये ऽपि रजतं नास्तीत्यबाधितानुभवरूपबाधादत्यन्ताभावः सत्यः । अपरोक्षानुभवविषयो ऽर्थः सन्नपि मिथ्येति न विरोधः । अनुभवबलेन समानसत्ताकयोरेव भावाभावयोर्विरोधकल्पनात् । पुरोवर्तिविषयकरजतज्ञानानङ्गीकारे इदं रजतत्वेन साक्षात्करोमीत्यनुभवविरोधः । इदमि प्रवृत्त्यनुपपत्तिश्च । ज्ञानस्येष्टतावच्छेदकविशिष्टस्वविषये प्रवर्तकत्वात् । तद्विशिष्टस्य देशान्तरस्थत्वात्तव मते तत्रैव प्रवृत्तिः स्यादिति । ज्ञानाध्यासलक्षणं तु स्मृतिसदृशत्वे सति परत्रावभासत्वम् । सादृश्यं संस्कारजन्यत्वे सति स्मृतिभिन्नत्वम् । विशेषणकृत्यं पूर्ववत् । ननु भ्रमो न संस्कारजन्यः अस्मृतित्वादभिज्ञावदिति चेन्न । संप्रयोगमात्रजन्याभिज्ञाप्रत्यक्षादन्येषां ज्ञानानां सर्वेषामपि पूर्वानुभवजन्यसंस्कारजन्यत्वात् । व्याप्त्यनुभवजसंस्कारे सत्यनुमितिरन्यथा नेत्यन्वयव्यतिरेकदर्शनात् । तथा च हेतोरनुमितौ व्यभिचारः । अतो रजतज्ञानस्य संस्कारजन्यत्वे ऽपि न स्मृतित्वम् । स्यादेतत् रजतभानं स्मृतिरेव । संस्कारमात्रजन्यज्ञानत्वात् । गङ्गास्मृतिवत् । न च हेत्वसिद्धिः संप्रयोगस्याधिष्ठानज्ञाने उपक्षयात् । अनुभवस्मृत्यात्मकस्य सर्वस्य ज्ञानस्य यथार्थत्वेन भ्रान्तेश्चासत्त्वेन दोषस्य हेतुत्वे मानाभावात् । न च साध्याविशेषः स्मृतित्वस्य जातित्वात् । अननुभवत्वं वा साध्यम् । नचैवं रजतं स्मरामीत्यनुभवापत्तिः स्मरणाभिमानस्य प्रमोषात् । इदमित्यनुभवाव्यवधानेनोत्पन्नरजतज्ञानादिदमि प्रवृत्तिर्युज्यते । ननु बालस्य तिक्तानुभवाभावात्तिक्तो गुड इति स्मृतिः कथमिति चेत्? उच्यते । पित्ताख्यो दोष एव जन्मान्तरीयसंस्कारमुद्बोध्य स्मृतिं जनयति माधुर्यज्ञानं प्रतिबध्नाति स्मृतित्वं च मुष्णातीति । तस्मादख्यातिर्भ्रान्तिरिति सिद्धम् । अत्रोच्यते । केयमख्यातिः? न तावद्विशिष्टज्ञानाभावमात्रं सुषुप्तौ भ्रान्तिप्रसङ्गात् । नाप्यविविक्तानेकपदार्थज्ञानत्वं भ्रान्तित्वं यदि पदार्थयोरविविक्तत्वं भेदाज्ञानं तर्ह्यसम्भवः, इदं रजतमित्यपुनरुक्तशब्दद्वयस्मृतिहेतु-

त्वेन सामान्यविशेषयोर्भेदज्ञानस्य सत्वात् । यद्यैक्यज्ञानं तदा मदिष्टसिद्धिः । तादात्म्यसंसर्गज्ञानलाभात् । खण्डो गौरिति प्रमायामतिव्याप्तिश्च । यद्यविविक्तं ज्ञानद्वयं भ्रमस्तर्ह्यज्ञाते भेदयोर्घटपटज्ञानयोर्भ्रान्तित्वापत्तिः । कदाचिद्भेदज्ञानं प्रकृतेऽपि तुल्यम । तस्मादख्यातिवादिनां लोके भ्रान्तिव्यवहारोच्छेदः । अतो मिथ्यार्थज्ञानं भ्रम इत्यकामेनाप्यङ्गीकार्यम । किञ्च रजतज्ञानस्य स्मृतित्वे स्मरामीत्यनुभवेन ग्रहणादिविवेकापत्तिः । न च स्मरणाभिमानः प्रमृष्ट इति वाच्यम । न तावत्स्मृतिरेव स्मरणाभिमानः तस्याः सत्त्वेन प्रमोषाभावात् । नापि स्मृतिध्वंसः, तस्याप्यसत्वात् । न च स्मृतित्वस्याज्ञानं प्रमोष इति वाच्यम । तज्ज्ञानस्यैवापाद्यत्वात् । न च दोषात्तदज्ञानं सोऽयमिति प्रत्यभिज्ञाभ्रमे सत्यपि दोषे तं स्मरामीति ज्ञानात् । एतेन पूर्वानुभवदेशकालवैशिष्ट्यं स्मर्यमाणस्य तत्तारूपः स्मरणाभिमानः तदज्ञानं प्रमोष इति निरस्तम । सोऽयमिति भ्रमे तज्ज्ञानस्य सत्त्वेनायमित्यनुभवात् स इति ज्ञानं भिन्नम । स चायञ्च भिन्न इति विवेकापत्तेः । अनुभवस्य स्वाविषयत्वेन स्वविषयमात्रविषयकस्वजन्यस्मृतिविषयत्वायोगाच्च । अनुभूतो घट इति स्मृतिस्तु न घटव्यवसायजन्या, किन्तु तदनुव्यवसायजन्या अनुव्यवसायश्च सिद्धान्ते साक्षिरूपः । स च विषयविशिष्टत्वेनानित्य इति संस्कारहेतुः । न चानुभवस्य स्वप्रकाशत्वात्स्वजन्यस्मृतिविषयत्वं कार्यमात्रस्य जडत्वात्पदार्थस्मृतेर्मूलानुभवागोचरत्वदर्शनाच्च । न स्मर्यमाणे क्वापि पूर्वानुभवसम्भेदः यस्तव स्मरणाभिमानो भवेत् पदार्थस्मृतेरप्यनुभवगोचरत्वे ऽनुभवस्य शब्दार्थता स्यात् । अत्र प्रसङ्गात् कश्चिदाह । शब्दास्यार्थेन संयोगतादात्म्ययोरसत्त्वात्सम्बन्धान्तरादर्शनाच्चाप्रामाण्यमिति । तन्न । शक्तेः सम्बन्धस्य सत्त्वात् । नन्वव्युत्पन्नस्य शब्दादर्थस्मृत्यदर्शनाच्छब्दार्थयोः सम्बन्धज्ञानमर्थस्मृतेः प्राग्वक्तव्यम । शक्तिस्तु स्मृतिरूपकार्यलिङ्गानुमेयेत्यन्योन्याश्रयः । सम्बन्धज्ञाने जाते स्मृतिजन्म तेन च तज्ज्ञानमिति चेन्न । व्युत्पत्तिकाले शब्दस्यार्थे शक्तिग्रहानन्तरं शब्दश्रवणात् शक्तिग्रहजसंस्कारोद्बोधमात्रेण पदार्थस्मृत्यङ्गीकारात् । अर्थस्मृतेः प्रागेव शब्दस्यार्थेन सम्बन्धज्ञाने तु शब्दवैयर्थ्यं स्यात् सम्बन्धविशेषणत्वेनार्थस्य ज्ञातत्वादित्यलम । ननु यदि पूर्वानुभवसम्भेदो न स्मृतिविषयस्तर्हि स्मृतेरनुभवात् विषयविशेषाभावात्कथं भेद इति चेत् ?

कथं तव घटस्मृतेर्घटानुमितितो भेदः ज्ञानसम्भिन्नार्थगोचरत्वाविशेषात् । ननु करणविशेषादनुमितिस्मृत्योर्भेद इति चेदिहापि तुल्यम। संस्कारमात्रस्य स्मृतिहेतुत्वात् । तदन्यस्यानुभवहेतुत्वात् तस्मात्संस्कारमात्रजन्यत्वमेव स्मृतेरनुभवाद्विशेषः । नेतो ऽन्यः स्मरणाभिमानो नाम कश्चिदस्ति यस्य प्रमोपादविवेकः कल्प्येत । किञ्च स्वप्ने आत्मा गृह्यमाणः अन्यत्सर्वं स्मर्यमाणं तत्र गृह्यमाणाविवेके ऽहं नीलमिति स्यात्स्मर्यमाणानामेवान्योन्यमविवेके परोक्षता स्यात्तस्मान्नाख्यातिर्भ्रमः । रजतज्ञानस्य शुक्तिगोचरत्वाभावे तत्र प्रवर्तकत्वायोगाच्च । एतेनासत्यप्रवृत्तिहेतुज्ञानत्वं भ्रान्तित्वमिति निरस्तम् । तस्माद्रजतज्ञानं पुरोवर्तिविषयकम् । तत्र प्रवर्तकज्ञानत्वाच्छुक्तिज्ञानवदिति सिद्धम् । विशिष्टज्ञानात्मको भ्रमः । स्मृतित्वानुमाने हेतोः स्वरूपासिद्धिः । रजतं साक्षात्करोमीत्यनुभूयमानज्ञानस्य संस्कारमात्रजन्यत्वाभावादिति स्थितम् । तार्किकास्तु सादृश्यादिदोषदुष्टमिन्द्रियं देशान्तरस्थरजतात्मना शुक्तिकां गृह्णातीत्यन्यथाख्यातिरित्याहुः । तदयुक्तम् । इदं रजतमिति भ्रमे किमिदमि रजततादात्म्यमारोप्यं रजतत्वसंसर्गो वा ? आद्ये किं रजतांशज्ञानस्य शुक्तिर्विषयः रजतं वा ? नाद्यः । अनुभवविरोधात् । द्वितीये देशान्तरस्थरजते प्रवृत्तिः स्यात् ज्ञानस्य स्वविषय एव व्यवहारहेतुत्वात् । एतेन रजतज्ञानस्य शुक्तिर्विषयः तज्जन्यव्यवहारास्पदत्वादिति निरस्तमुक्तबाधात् । द्रव्यज्ञानाद्द्रव्येण सहार्थादादीयमानगुणादौ व्यभिचाराच्च । किञ्च सामान्यविशेषयोरत्यन्तभेदवादिना तादात्म्यस्यासत्त्वेन प्रत्यक्षत्वायोगः, जन्यप्रत्यक्षविषयत्वे इन्द्रियसन्निकर्षाश्रयत्वस्य व्यापकत्वादसति तदभावात् । एतेन संसर्गारोपो निरस्तः । शुक्तिकेदंरजतत्वाभ्यां निरूपितसंसर्गस्यात्यन्तासत्वात् रजतत्वस्य स्वातन्त्र्येणोपस्थित्यभावेनारोपासम्भवाच्च । भेदाभेदवादिनां तु तादात्म्यस्य सत्यत्वान्न कापि भ्रमः स्यात् । यत्तु शुक्तिका रजताकारेण परिणमतीत्यन्यथाख्यातिरिति तन्न । दुग्धपरिणामस्य दध्न इवास्य बाधासम्भवात् । तस्मान्नान्यथाख्यातिः । अत्राहात्मख्यातिवादी बौद्धः । रजतं बुद्ध्यभिन्नं इन्द्रियासन्निकृष्टत्वे सति अपरोक्षत्वाद् बुद्धिवत् । बुद्धेरजताकारत्वे तद्बुद्धिसन्ताने पूर्वं कदाचिदुत्पन्नरजतबुद्धिरेव संस्कारशब्दिता हेतुः व्यवहितस्यापि शालिबीजस्य स्वसमानाकारबीजहेतुत्वदर्शनात् । तस्माद् बुद्ध्यात्मकं रजतम् बहिर्वत्स्यात् इत्या-

त्मख्यातिरिति । स वक्तव्यः–रजतं कुतो जायते ? इति न तावदर्थात् ज्ञानाद्वाह्यार्थानङ्गीकारात् । नाप्यतीतरजतज्ञानात् । अतीतस्याहेतुत्वात् अन्यथा चिरध्वस्तवन्हेरिदानीं धूमप्रसङ्गः । न च यस्य ज्ञानस्याकारो रजतं तस्मादेव तज्ज्ञायत इति वाच्यम् । अभेदे तदयोगात् । भेदे तु क्षणिकस्य जनकज्ञानस्य पश्चाद्भावि रजतं न विषयः ज्ञानान्तरं तु रजतस्य दुर्लभमित्यज्ञातमेव रजतं स्यादिति । तस्मान्नात्मख्यातिः । ननु तर्हि रजतज्ञाने का सामग्री, किं तज्ज्ञानं, कस्तस्य विषय इति उच्यते । अधिष्ठानसामान्यज्ञानं संस्कारो दोषश्च निमित्तम् न च दोषस्य विशेषज्ञानप्रतिबन्धकत्वमेव न विपरीतकार्यहेतुत्वमिति वाच्यम् । वेत्रबीजे दावदाहाख्यदोषस्य कदल्यङ्कुरहेतुत्वदर्शनात् । ज्ञानं त्वधिष्ठानारोप्यविशिष्टज्ञानमेकमैन्द्रियकं न सम्भवति इन्द्रियसंप्रयोगस्याधिष्ठानसामान्यवृत्तावुपक्षयात् । रजतस्य प्रातीतिकस्य प्रतीतेः पूर्वं सन्निकर्षाभावात् । किन्तूक्तनिमित्तसहिताविद्यारजततद्वृत्त्याकारेण परिणमते । एवं चाधिष्ठानारोप्ययोर्वृत्तिज्ञानभेदे ऽपि सत्यानृतयोस्तादात्म्येनैक्यादेकविषयावच्छिन्नं चैतन्यरूपमेकं विशिष्टज्ञानं फलरूपं भ्रान्तिज्ञानम् । तस्य च मिथ्यारजतं विषयः । भ्रान्तेर्मिथ्याज्ञानत्वप्रसिद्ध्यन्यथानुपपत्तिर्विषयस्य मिथ्यात्वे मानम् । स्वतो ज्ञानस्याबाधेन मिथ्यात्वायोगादिति । तत्र चाविद्यावृत्तावनाग्रहः वृत्तिं विनापि रजतस्य सुखादिवत्साक्षिभास्यत्वसम्भवात् । इदमाकारवृत्तिनाशादेव रजतस्मृतियोगात् । यद्वृत्त्यवच्छिन्नं चैतन्यं यावतां सत्तानिश्चयरूपं तद्वृत्तिनाशात्तावद्गोचरसंस्कार इति नियमात् । पूर्वानुभवसंस्कारस्य प्रातीतिकरजतं प्रत्येव हेतुत्वोपपत्तेरिति संक्षेपः । ननु सिद्धान्ते रजतं पश्यामीति चाक्षुषत्वानुभवः कथमिति चेत् ? इदमाकारचाक्षुषवृत्त्यभिव्यक्तचैतन्यविषयत्वादिति ब्रूमः । यत्तु संप्रयोगस्यानुभवे संस्कारस्य स्मृतौ निरपेक्षत्वादनुभवस्मृत्यात्मकं ज्ञानद्वयमेव युक्तं नैकं विशिष्टज्ञानं निरपेक्षहेत्वोरेककार्यकारित्वादर्शनादिति, तन्न । ज्ञानद्वययौगपद्याभावेन प्रवृत्त्यनुपपत्तेः । धूमज्ञानस्य स्वकार्ये धूमव्यवहारादौ निरपेक्षस्यैव व्याप्तिसंस्कारसहितस्यानुमितिहेतुत्वदर्शनात् । न च व्याप्तिस्मृतिरेव सहायः अस्या अपि स्वकार्ये निरपेक्षत्वेन निरपेक्षहेतोरेककार्यकारित्वानपायात् । धूमदर्शनोद्बुद्धसंस्कारादेवानुमितिसम्भवेन मध्ये ऽननुभूयमानव्याप्तिस्मृतिकल्प-

नानौचित्याच्च । एतेन परामर्शो हेतुरित्यपास्तम् । पक्षतावच्छेदकावच्छिन्नवृत्तिहेतावव्यभिचरितसाध्यसादेश्यरूपव्याप्तिपरामर्शाङ्गीकारे तदानीमेव पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुमित्युच्छेदापत्तेः सिद्धसाधनत्वादसन्निकृष्टवन्हिव्याप्तेः प्रत्यक्षत्वासम्भवाच्च । ज्ञानस्याप्रत्यासत्तित्वादिति दिक् । संस्कारसंप्रयोगयोरेव प्रत्यभिज्ञाकारित्वदर्शनाच्च । भिन्नजातीयज्ञानहेतुभ्यो नीलादिभ्यश्चित्ररूपाभिज्ञाप्रत्यक्षदर्शनाच्च । तस्माद्दोषेण सह संस्कारसंप्रयोगाभ्यामेकं भ्रान्तिज्ञानं युक्तम् । यद्यपि संप्रयोगस्याधिष्ठानसामान्यवृत्तावेव हेतुता दोषसंस्कारयोस्तु मिथ्यारजते तदवृत्तौ च तथापि विशिष्टभ्रान्तिज्ञानरूपचैतन्यमपि वृत्त्यादिविशिष्टत्वेन जायमानं सत्परम्परया संप्रयोगादिजन्यमित्युच्यते इति मन्तव्यम् । किञ्च सर्वेषामेव पुरोदेशे रजतानङ्गीकारवादिनामत्र तत्साक्षात्करोमीत्यनुभवविरोधः । ननु तवाप्यस्तीत्यनुभूतस्य सद्भिन्नत्वे ऽनुभवविरोध इति चेन्न । रजते इदन्तासंसर्गवदधिष्ठानसत्तासंसर्गारोपात् । ननु सर्वस्याविद्यकस्याधिष्ठानचैतन्यरूपसत्त्वसम्बन्धाविशेषे कथं प्रातीतिकव्यावहारिकविभाग इति चेत् ? उच्यते । अविद्यातिरिक्तदोषाजन्यं जडं व्यावहारिकं आगन्तुकदोषजन्यं प्रातीतिकं तथा तत्सम्बन्धादेकमेव सत्त्वं त्रिविधमित्युच्यते । कालत्रयाबाधिते ब्रह्मणि स्वरूपे पारमार्थिकं सत्त्वं घटादौ व्यावहारिकं तदेव सत्त्वं रजतादौ प्रातीतिकमिति । अन्ये तु त्रीणि सत्त्वानि भिन्नान्येव व्यवहाराय कल्पितानीत्याहुः तच्चिन्त्यम् । सर्वत्र सद्बुद्धेरेकाकारत्वाल्लाघवाच्च । तस्मादुपाधिभेदादेव सत्त्वस्य त्रैविध्यम् । एवं चानुभवाविरोधान्मायामयं रजतं प्रत्यक्षभ्रान्तिविषय इति सिद्धम् । एतदभिप्रेत्याह –

अख्यातिभङ्गः शब्दार्थसम्बन्धकथनं तथा ।
अन्यथात्मख्यातिभङ्गो मिथ्यारजतसाधनमिति ॥

अत्र केचित् । अविद्यामयं रजतं न मायामयम् । माताविद्ययोर्भेदप्रसिद्धेरित्याहुः । अत्रोच्यते । किं लक्षणभेदात्तयोर्भेदः, उत व्यवहारतः ? नाद्यः । अनिर्वचनीयत्वस्वरूपलक्षणस्य तत्त्वावरकत्वविशेषलक्षणस्य भ्रान्त्युपादानत्वोपलक्षणस्य चाविशेषात् रजतादेरप्यविद्यात्मकत्वेन लक्ष्यत्वान्नाद्यस्यातिव्याप्तिः । यथा पृथिवीलक्षणस्य गन्धस्य पृथिवीत्वेन लक्ष्ये घटे नातिव्याप्तिः तद्वत् । न च सत्यमन्त्रादिकमेव मायेत्यनिर्वचनीयत्वासिद्धिरिति वाच्यम् । अनिर्वचनीयका-

र्योपादानस्यैव मायापदार्थत्वात् । अस्ति हि मायाविना सृष्टेषु मिथ्यागजादिषु मायापदप्रयोगः । स च तदनुस्यूतोपादानविषयः । गजादीनां व्यावृत्तानां तदर्थत्वासम्भवात् । तथा च मिथ्योपादानं स्वयं मिथ्यामायापदार्थः । अघटितकारित्वगुणयोगान्मन्त्रादौ मायाशब्दो गौणः । न च स्वाश्रयाव्यामोहिका माया तद्व्यामोहिका ऽविद्येति भेद इति वाच्यम् । एकस्या अपि भ्रमविरोधिज्ञानवत्यव्यामोहकत्वस्य तच्छून्ये मोहकरत्वस्य च सम्भवात् । तस्मान्न लक्षणतो भेदः । नापि व्यवहारतः । "तत्त्वभावाद्विश्वमायानिवृत्ति"रिति श्रुतौ । "तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते । योगी मायाममेयाय तस्मै विद्यात्मने नम" इति च स्मृतौ । तत्त्वज्ञाननाश्याविद्यायां मायाशब्दप्रयोगात्तथैव भाष्यकारादिभिर्व्यवहारादिति न माया ऽविद्ययोर्भेदः । किन्त्वेकैवाविद्या सर्वसाधारणभ्रमशक्त्या विक्षेपशक्त्या वा माया असाधारणभ्रमशक्त्या आवरणशक्त्या वा अविद्येत्युच्यते । तस्माद्भवत्यविद्यं रजतं मायामयमिति । न च रजतं पारमार्थिकमिति सत्ख्यातिर्युक्ता, शुक्तिवत्सर्वदा ग्राह्यतापत्तेः । कालत्रये ऽपि नास्तीति बाधानुपपत्तेश्च । तेन हि बाधेन प्रतिपन्नस्य रजतस्याधिष्ठाने ऽत्यन्ताभावप्रतियोगित्वरूपमिथ्यात्वमेव विषयीक्रियते । एतेन बाधप्रत्यक्षमपि मिथ्यात्वे मानमित्युक्तं भवति । इदं चाभावः प्रत्यक्ष इति परमतेन द्रष्टव्यम् । सिद्धान्ते तस्यानुपलब्धिग्राह्यत्वात् । यद्वा सिद्धान्ते ऽप्यभावो ऽनुपलब्धिसहितसाक्षिप्रत्यक्ष इति मन्तव्यम् । बाधानन्तरं मिथ्यैव रजतमभादित्यनुभवो बाधस्य मिथ्यात्वविषयतां द्रढयति । ननु को ऽयं बाधः? न तावदन्यार्थिनो ऽन्यत्र प्रवृत्तिध्वंसो बाधः वीतरागाणां प्रवृत्त्यनुदये ऽप्यधिष्ठानदर्शने बाधप्रसिद्धेः । न चाभेदेन ज्ञातयोर्भेदज्ञानं बाधः । शुक्लो घट इति ज्ञातयोर्घटस्य शौक्ल्यमिति भेदज्ञानस्य बाधत्वापत्तेरिति उच्यते । किं मिथ्यात्वव्यवहारहेतुर्बाध आक्षिप्यते, तत्त्वसाक्षात्कारसाध्यो वा ? नाद्यः । प्रतिपन्नस्याधिष्ठाने ऽत्यन्ताभावप्रमाया एव तद्धेतुत्वेन बाधत्वात् । तदुक्तं बाधप्रत्यक्षसिद्धं विद्यात्वमिति । न द्वितीयः । कार्यात्मना परिणताज्ञाननिवृत्तेस्तत्साध्यत्वेन बाधत्वादित्यनवद्यम् । एवं ख्यात्यन्तरनिरासेन मिथ्यारजते परत्रा ऽवभास्यत्वमध्याससाधारणलक्षणमुपपादितम् । तत्र स्मृतिरूपदेन ज्ञानाध्यासे संस्कारजन्यत्वं स्मृतिसादृश्यमुक्तम् । अत्र के चित् । भ्रमस्य संस्कारमात्रजन्यत्वेन स्मृतिसादृश्यायोगात् सादृश्यवाचि-

ना स्मृतिरूपपदेन दोषसंप्रयोगसंस्कारजन्यत्वं लभ्यते । तच्च कार्याध्यासस्य लक्षणमित्याहुः । तत्र दोषादेरन्वयव्यतिरेकाभ्यां रजताद्यर्थे ऽपि हेतुत्वं मन्तव्यम् । नन्विदं लक्षणद्वयं स्वप्नाध्यासे नास्तीत्यव्याप्तम्, न हि तत्रेन्द्रियसम्प्रयोगो ऽस्ति, इन्द्रियाणामुपरतत्वात् । अतः कार्याध्यासलक्षणमत्र नास्ति अधिष्ठानादर्शनात् । परत्रावभास्यत्वमपि नास्तीति चेत् ; उच्यते । निद्रादोषपूर्वानुभवजन्यसंस्कारसहितं मनः स्वसंप्रयुक्तात्मन्यविद्यां क्षोभयित्वा शुद्धाविद्याविवर्तगजादिपदार्थसमकालं तद्गोचरं ज्ञानमुत्पादयति । अतो लक्षणद्वयमत्र स्वप्ने ऽस्त्येव, मनःसम्प्रयोगसत्त्वान्मनउपहितात्मनो ऽधिष्ठानत्वात् । वस्तुतस्तु मनोध्यासं प्रतीन्द्रियसम्प्रयोगालाभादधिष्ठानसामान्यज्ञानमेव हेतुरिति तदेवानुगतं सम्प्रयोगपदेन विवक्षितमिति न कश्चिद्दोषः । अत्र निष्कृष्टाहङ्कारचैतन्यमात्रमिति विवरणवाक्येन स्वप्नाधिष्ठानचैतन्यं प्रति मनसो विशेषणत्वं निषिध्यते । अहं नीलमिति भाननिरासाय तूपाधित्वमपि निषिध्यते । तदवच्छिन्नचैतन्यस्थाविद्यावर्तः स्वप्नप्रपञ्च इति टीकाया अन्तःकरणेनावच्छिन्नेत्यादि स्वव्याख्यानेन च विरोधात् । स्वप्नस्यानुपहितचैतन्यस्थत्वे स्वे शरीरे यथाकाममिति श्रुतिविरोधश्च । मनोवच्छिन्नात्मवेद्यत्वासम्भवश्च । संबन्धाभावात् । तस्मात्स्वप्ने घटः स्फुरतीति चैतन्यतादात्म्यानुभवाच्चैतन्यमेवाधिष्ठानं तस्योपाधिर्मनोरूपाहङ्कारः न विशेषणम् । अयं घट इत्यहङ्कारात्पृथक्त्वेन विच्छेदावभासादिति । इदमभिप्रेत्याह —

मायाविद्यैक्यमत्रोक्तं सत्ख्यातेश्च विमानता ।
स्वप्नाध्यासे लक्षणोक्तिर्बाधरूपोक्त्यनन्तरम् ॥ इति ।

किञ्च जागरणे ऽपि प्रत्यगात्मसाक्ष्यभिन्नचैतन्यमेव सर्वप्रपञ्चाधिष्ठानं किमु वक्तव्यं स्वप्ने चैतन्यमधिष्ठानमिति । न हि जागरणे स्वतश्चैतन्यहीनानां विषयाणां चैतन्यात्मनि कल्पितत्वं विना मयाऽयं घटादिरिति भानं सम्भवति संबन्धाभावात् । न च घटपटादिचैतन्यानां भेदात्तद्भेदे प्रत्यगात्मनो ऽपि भेदः स्यादिति वाच्यम् । नियमेन घटाद्युपाधिज्ञानपूर्वकं भासमानचैतन्यभेदस्यौपाधिकतया प्रातिभासिकत्वात्स्वतश्चैतन्यभेदे मानाभावादिति आद्वितीयं चैतन्यं जागरइव स्वप्ने ऽधिष्ठानमित्यलवद्यम् । परत्रावभास इति लक्षणम् । अत्रावभासो ज्ञानं अतो नाज्ञे ब्रह्मदृष्टौ नातिव्याप्तिः । तस्या विधेयायाः कृतिसाध्यत्वेन क्रियात्वात् । न हि ज्ञानं कृतिसाध्यं कृतिं

प्रति साधनत्वादयत्नतो दुर्गन्धादिज्ञानदर्शनाच्चेति । अत्राह शून्यवादी। परत्रेति पदं व्यर्थं केशोण्डुकभ्रमे ऽधिष्ठानाभावात्तस्मादर्थज्ञानं भ्रम इत्येव लक्षणमिति। तत्तुच्छम्। शून्यज्ञानस्यापि भ्रमत्वापातात्। करसंमृदितनयनराश्मिषु केशस्य पिण्डाकारभानात्। तस्मात्परत्र परावभास इति लक्षणं सर्वमतेष्वनुस्यूतं तत्र सिद्धान्तगत्या सत्ये वस्तुनि मिथ्यासम्भेदावभास इति पर्यवस्यतीति मत्वाह—

जागरे चिदभेदोक्तिः स्वप्नावस्थानसिद्धये ।
ज्ञानस्यायत्नसाध्यत्वं भ्रमे ऽधिष्ठानसाधनमिति ॥

यत्तु संविद्रजतयोर्बीजाङ्कुरवत्परस्पराधिष्ठानत्वान्न सत्याधिष्ठानको भ्रम इति, तन्न। इष्टान्तवैषम्यात्। न हि यस्माद्बीजाद्यो ऽङ्कुरस्तस्मादेवाङ्कुरात्तद्बीजं जायते। अन्योन्याश्रयापत्तेः। किन्तु पूर्वस्मादङ्कुरान्तरात्। ननु भवत्वस्माकमपि संविदो रजते ऽध्यासस्तस्यापि पूर्वसंविदि तस्या अपि पूर्वरजते इति परम्परेति चेन्न। इदं रजतमिति ज्ञायमाने रजते पूर्वसंविदादीनामनन्वितत्वेनाधिष्ठानत्वायोगात्। बीजस्याप्यनन्वितत्वेनाङ्कुरं प्रति निमित्तमात्रत्वात्। अन्वितद्रव्यान्तरस्यैवोपादानत्वेनाधिष्ठानत्वात् संविद्रजतयोः निमित्तनैमित्तिकभावस्याप्यदृष्टस्य कल्पनानौचित्यात्। तस्मादिदं रजतमिति ज्ञाकारावभासनादन्वितसत्याधिष्ठानको भ्रमः। अपि चैकस्मिन्नाकारे आकारान्तराभावज्ञानस्य बाधत्वात्साधिष्ठान एव भ्रमः। अन्यथा बाधो ऽपि निरधिष्ठान एव स्यात्। अधिष्ठानप्रसक्त्यभावात्। नन्वाप्तवाक्यान्न सर्प इति निरधिष्ठानो बाधो ऽस्तीति चेन्न। सर्पाभावविशिष्टाधिष्ठानसामान्यस्य तत्राप्यवगतत्वात्। किं तदिति विशेषाकाङ्क्षादर्शनात्। किं बहुना सर्वदा सर्वत्राव्यभिचारिसाक्ष्यवधिकः सर्वस्य बाध इति न शून्याधिष्ठानको भ्रमः। यत्तु असदेव ख्यायते इत्यसत्ख्यातिरिति, तन्न। असतो ऽपरोक्षत्वायोगात्। सत्त्वमपि बाधान्नास्तीत्युक्तम्। न चान्यत्र सत एवान्यत्र बाध इति नियमादेशान्तरे सत्त्वमिति वाच्यम्। यदि प्रतिहर्ता विच्छिद्यात्सर्ववेदसन्द्याद्यद्वृद्धाता तर्ह्यदक्षिणो यज्ञ इति ऋत्विग्विच्छेदनिमित्तप्रायश्चित्तयोर्निमित्तयोगपद्ये विकल्पः। पूर्वापाये[1] तु पूर्वस्योत्तरेण बाध इति सिद्धान्तः। न हि तत्र प्रतिहर्तृविच्छेदनिमित्तसर्वस्वदानकर्तव्यतात्र बाधिता ऽन्यत्रास्ति, इह भक्षवटस्यान्यत्रासत एव बाधदर्शनाच्च।

(१) पूर्वापर्ये इति क्वचित्पाठः ।

तस्मात्सत्ये वस्तुनि परत्र सदसद्विलक्षणवस्तुसम्भेदावभासो भ्रम इति पर्यवसन्नम् । अत्र भ्रान्तिविषयमिथ्यात्वस्य लोकानुभवसिद्धत्वान्न युक्त्यपेक्षेत्याह भाष्यकारः । शुक्तिका हि रजतवदवभासते एकश्चन्द्रः स द्वितीयवदिति बाधसिद्धमिथ्यात्वस्यात्र वच्छब्देनानुवादः । तत्रात्मनि अहङ्काराध्यासे रज्जुसर्पोदाहरणं जीवेश्वरभेदाध्यासे द्वितीयोदाहरणमिति भावः । नन्वहङ्कारे परत्रावभास्यत्वमिति लक्षणमव्याप्तम् । दोषादित्रयजन्यत्वमपि तत्र नास्ति । तथा हि । विशिष्याज्ञातं सामान्यतो ज्ञातमधिष्ठानं शुक्त्यादिकं परत्रपदार्थः, नात्मा, निःसामान्यविशेषस्वप्रकाशत्वादतः परत्रेत्यंशाभावादव्याप्तिः । निरवद्यात्मनि दोषाभावात्स्वप्रकाशे वस्तुनि अविद्यारूपदोषस्याप्यभावात् । दोषघटितसामग्र्यपि नास्ति । स्वप्रकाशत्वं नाम स्वव्यवहारे प्रकाशान्तरानपेक्षत्वम् तच्च यावत्सत्त्वम्[1] भासमानात्मन्यस्त्येव । परप्रकाश्यत्वे प्रकाशाभावदशायामात्मनि सत्त्वसंशयापत्तेः । अत्रायं पुरुषः स्वयंज्योतिः आत्मैवास्य ज्योतिरिति श्रुतेश्च । अत्र हि ज्योतिरात्मेति सामानाधिकरण्यादात्मनो ज्ञानरूपत्वं भाति । स्वयमिति विशेषणेनात्मनो घटादिवच्छिद्रेद्यत्वं प्राप्तं वार्यते । ज्योतिरेव स्वयं न ज्योतिर्विषय इत्यर्थः । यत्तु ज्योतिःपदं ज्ञानकर्तृपरं स्वयमिति च स्वज्ञाने कर्त्रन्तरनिरासार्थमिति, तन्न । तमोविरोधिप्रकाशे रूढस्य ज्योतिःपदस्य ज्ञानकर्तरि लक्षणाया अन्याय्यत्वान्मुख्यार्थग्रहे ऽनुपपत्त्यभावात् । न चानित्यज्ञानस्य गुणस्य नित्यद्रव्याभेदानुपपत्तिरिति वाच्यम् । ज्ञानस्यानित्यत्वे गुणत्वे च मानाभावात् । किञ्चानादित्वात् ज्ञानस्य तत्कर्तृलक्षणा न युक्ता । ज्ञानं स्वाश्रये सति न जन्यते प्रकाशत्वात् प्रदीपरूपवदिति अनादित्वानुमानात् । प्रकाशत्वं तमोविरोधित्वं, स्वविषये संशयादिजननयोग्यत्वं तमस्त्वं, तच्च ज्ञानसाधारणं तमोनिवृत्तौ भास्वररूपमेव हेतुः, न प्रदीपद्रव्यमिति न तत्र व्यभिचारः । निर्गुणोत्पत्तेर्निरस्तत्वात् । अथवा स्वाश्रयसत्त्वस्यानेकक्षणव्याप्यत्वस्य विवक्षितत्वान्न दृष्टान्ते साध्यवैकल्यमिति बोध्यम् । परमतेन प्रत्यक्षगुणत्वं वा विशेषणमस्तु । अतो नादृष्टे व्यभिचारः । अत एव नाश्रयासिद्धिः । परमते तस्य प्रसिद्धत्वात् । परं प्रति बोधकानुमाने परकीयप्रसिद्धेरेवोपगमात् । अतः सत्याश्रये प्रकाशगुणस्य का ऽपि जन्माऽदर्शनादनाद्यात्म-

(१) यावत्स्वत्वमिति पाठान्तरम् ।

नि ज्ञानमनादि । ननु सति मनसि वृत्तिर्जायते इति चेत्सत्यम् । तस्या अप्रकाशत्वान्न व्यभिचारः । अथ वा ज्ञानं क्रियाजन्यसंस्कारेषु संस्कारत्ववज्ज्ञानप्रभारूपसाधारणं प्रकाशत्वमखण्डं व्यवहारबलादस्त्विति न कश्चिद्दोषः । ज्ञानं न जायते ज्ञानत्वादीश्वरज्ञानवत् व्यतिरेकेण घटादिवच्चेति वा प्रयोक्तव्यम् । तस्य ज्ञानस्योपाधिं विना भेदादर्शनादद्वितीयस्य नाशकाभावाज्जन्मादिप्रतीतेः वृत्तिविषयत्वादनन्तस्यात्मनः सकाशाद्भेदे मानाभावादुक्तश्रुत्यात्मत्वमित्यात्मनः स्वयंप्रकाशत्वमनवद्यम् । तदेतदभिप्रेत्याह—

उदाहरणभाष्यार्थः स्वयं ज्योतिष्ट्वमात्मन इति ।

तस्मादहङ्कारे लक्षणाव्याप्तिः कारणाभावश्चेति प्राप्ते ब्रूमः । निरंशेष्यात्मनि चित्पूर्णानन्दादिपदवाच्यरूपा अंशाः कल्पिताः सन्ति । तत्र चिदंशरूपाधिष्ठानसामान्यज्ञानं स्वप्रकाशत्वादस्ति पूर्णानन्दत्वादिविशेषावरणाज्ञानं चास्ति तदेवाधिष्ठानमावृत्याहङ्कारादिभ्रमं करोतीति दोष इत्युच्यते । अतोऽहङ्कारे परत्रात्मन्यवभास्यत्वम् अधिष्ठानसामान्यज्ञानदोषसंस्कारजन्यत्वं चास्ति । यत्तु स्वप्रकाशे कथमविद्येति । तन्न । अनादिस्वरूपाज्ञानस्यानुभवबलेनाविरोधित्वात् । अनुभवस्त्वहमज्ञ इत्यादिः पूर्वं दर्शितः । अनुमानमपि दर्शितम् । श्रुतिरपि जीवस्य सुषुप्तौ भ्रान्त्यादिप्रतिबन्धकाभावात्स्वप्रकाशत्वाद्ब्रह्मस्वरूपावभासप्राप्तौ प्रतिबन्धकमविद्यादोषं दर्शयति । "सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा" इति । प्रत्यूढा आवृताः । हिशब्देन साक्ष्यनुभवसिद्धत्वमुच्यते । अनृतेनेति मिथ्यात्वोक्त्या ज्ञानाभावत्वं पराभिमतं वार्यते । अत एवाज्ञानस्य न प्रामाणिकत्वम् । अनुभवसिद्धाज्ञाने प्रमाणैरभावव्यावृत्तिमात्रबोधनात् । यद्यपि भावत्वबोधकप्रमाणानामज्ञानं विषयस्तथाप्यज्ञातभावत्वांशएव तेषां प्रामाण्यं यद्यप्यज्ञानस्य धर्मत्वाद्यावहारिकप्रमाणगम्यत्वे ऽपि न क्षतिर्मिथ्यात्वेनाधिष्ठानज्ञाननिवर्त्यत्वसम्भवात् । तथाप्यज्ञाने साक्ष्येव सत्तासंशयविरोधिनिश्चयत्वाद्धर्मिग्राहकं प्रमाणमिति वस्तुगतिरुक्ता । नीहारेण प्रावृताः, "अज्ञानेनावृतं ज्ञान"मिति श्रुतिस्मृती अपि भावरूपाविद्यादोषे प्रमाणम् । ज्ञानान्मुक्तिश्रुत्यन्यथानुपपत्तिरपि ज्ञाननिवर्त्याविद्यायां मानमिति । एवं स्वरूपज्ञानस्याविद्यायाः साधकत्वेनाविरोधात्प्रमाणबलात्स्वप्रकाशात्मनि ब्रह्मस्वरूपविषयमज्ञानमस्तीति सिद्धम् । न

चात्मब्रह्मणोरैक्यादाश्रयविषयभेदाभावात्कथमज्ञानमिति वाच्यम् । अज्ञानस्यावरकत्वेन तमोवदावृत्तविषयनिष्ठत्वसम्भवात् । न च काचादौ व्यभिचारः । करणानाश्रयत्वे सतीति विशेषणात् । ननु तर्हि आवृत्ताखण्डब्रह्मनिष्ठाज्ञानाज्जीवस्याज्ञत्वभ्रान्तत्ववदीश्वरस्या ऽपि तत्प्रसङ्ग इति चेन्न असर्वज्ञत्वात् । यद्यपि चित्त्वाकारेण जीव इवेश्वरेऽप्यज्ञानमस्ति, तथा ऽपि नित्यसर्वज्ञेश्वरं विम्बरूपं ब्रह्म खण्डस्वरूपं नावृणोत्यज्ञानमिति नाज्ञत्वादिप्राप्तिः । स्वप्रतिविम्बरूपं जीवं प्रति त्वखण्डस्वरूपमावृणोतीति तस्याज्ञत्वादिप्राप्तिः उपाधेः प्रतिविम्बपक्षपातित्वात् । एतेनाखण्डचिदेकरसे ब्रह्मणि कुतो जीवेश्वरभेदो येनाज्ञत्वसर्वज्ञत्वादिव्यवस्था स्यादिति निरस्तम् । मूलाविद्यात एवानादेर्भेदस्याङ्गीकारात् । तन्नाशे नाशादनादेरपि भेदस्याविद्यामूलत्वं युक्तम् । यत्त्वभिन्ने वस्तुनि भेदसम्पादको ऽतिरेको नाम कश्चिद्धर्म इति, तन्न । भेदातिरिक्ते तस्मिन्मानाभावात् । यदप्यन्तःकरणं भेदकमिति, तदपि न । तस्य सत्यत्वे मिथ्याभेदप्रयोजकत्वानुपपत्तेः । जीवब्रह्मभेदस्य मिथ्यात्वमद्वैतश्रुत्या दृश्यत्वाद्भेदत्वाच्चन्द्रभेदवदित्यनुमानेन च सिद्धम् । सुषुप्तावन्तःकरणस्य स्वमपीतो भवतीत्यादिना नाशावगमात्प्रत्यहं तद्भेदाज्जीवभेदापत्तिः सूक्ष्मतायाः अविद्योपादानं विना दुर्निरूपत्वादुपादाने लीनकार्यस्यैव शक्तिरूपस्य सूक्ष्मशब्दार्थत्वात् । नन्वस्त्वविद्योपादानकमन्तःकरणं कल्पितमेवा मोक्षात् स्थूलसूक्ष्मभावनानुस्यूतं भेदोपाधिरिति चेन्न । तस्य प्रमातृजीवभेदोपाधित्वे ऽप्यनादिजीवब्रह्मभेदोपाधित्वायोगात् । तस्मात्तदुपादानादनाद्यविद्याया एवावरकत्वेन कल्पितायास्तदुपाधित्वमिति सिद्धम् । ननु किमाश्रयेयमविद्या भेदभ्रमहेतुरिति चेत् ? लोके सुखमात्रसम्बन्धिनो दर्पणस्य विम्बप्रतिविम्बभेदभ्रमहेतुत्ववच्चिन्मात्राश्रयाविद्यायास्तद्धेतुत्वमिति ब्रूमः । नन्वसङ्गस्वप्रकाशचिन्मात्रस्याऽविद्याश्रयत्वानुपपत्तेरहमज्ञ इत्यनुभवाच्चान्तःकरणविशिष्टाश्रयमज्ञानमिति चेदहो पाण्डित्यमायुष्मतः ! विशिष्टस्य विशेषणमात्रत्वे विशेष्यचिदंशे ऽनुपपत्तितादवस्थ्यात् । जडस्य कार्यस्य मनसः कारणाविद्याश्रयत्वानुपपत्तेश्च । अतो अनुपपन्नद्वयाश्रयत्वाद्धरमेकचिदाश्रयत्वं चितिकल्पितायाअविद्याया अनुपपत्तेरङ्गीकारत्वाद्विशिष्टस्यान्यत्वे तन्निष्ठाऽविद्यया चिदात्मनि बन्धमुक्ती न स्याताम् । अतो यस्य मुक्तिस्तस्य बन्धस्तस्याविद्येति नियमाच्चिन्मात्राश्रयाविद्या । अहमज्ञ इति धीस्तु अहङ्कारा-

ज्ञानयोरेकचित्सम्बन्धाद्दृष्ट्या । अयो दहतीत्ययसि दग्धृत्वधीवत् । एतेन केवलान्तःकरणमेवाविद्याश्रय इति कस्य चिज्जल्पनमपास्तम् । अत्र संग्रहश्लोकः—

अज्ञानं स्वप्रकाशे ऽस्ति स्वावृते तद्विवर्तते ।
तन्मूलो जीवभेदः स्यान्नातिरेकान्न चेतस इति ॥

ननु भवतु स्वप्रकाशचिन्मात्रस्याविद्याश्रयत्वम् । एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुतेराश्रयान्तराभावाच्च सुषुप्तौ चिन्मात्राश्रयत्वानुभवाच्च । तथा ऽपि तस्य नाविद्याविषयत्वं भासमानस्यावृतत्वाख्याज्ञानविषयत्वविरोधादिति चेन्न । घटं न जानामीत्यज्ञानविशेषणस्य घटस्य भासमानस्यैवाज्ञानविषयत्वानुभवात् । सविषयकवस्तुज्ञाने विषयस्य भासमानत्वनियमात् अतो ऽनुभवबलात्स्वरूपचैतन्येन भासमानत्वमविद्याविषयत्वाविरोधीति कल्पनीयम् । नन्वेवमप्यनावृतसाक्ष्यभिन्ने ब्रह्मणि कथमावरणमिति चेन्न । पूर्णानन्दाद्यंशे भेदेनावरणस्योक्तत्वात् । किं च भासमाने ऽप्यावृतत्वं युक्तं, स्वतो ऽपरोक्षसाक्ष्यात्मनि देहाद्भेदे भासमाने ऽप्यावृतत्वदर्शनात् । तथा हि अपरोक्षसंविद्रूपसाक्षितादात्म्येना ऽत्मनो ऽपरोक्षत्वं देहाद्भेदः साक्षिणि तद्रूपस्तद्धर्मो वा धर्मिप्रतियोगिनोर्भासमानयोः साक्षितादात्म्येनात्मनो ऽपरोक्षतया भासतएव । तथाप्यावृतो मनुष्यो ऽहमित्यभेदभ्रमात् । अत्र कश्चिदाह । भेदो भासते ऽनावृतश्च अभेदज्ञानं तु गौणं मुख्यत्वे प्रमात्वापत्तेः । न चायायमशरीर इत्यादिश्रुत्या देहः स्वातिरिक्तद्रष्टृकः दृश्यत्वादित्यनुमानेन च देहात्मत्वे शास्त्रानर्थक्यकृतहान्यादितर्कैश्च बाधान्मुख्यत्वे ऽपि भ्रान्तित्वमिति वाच्यम् । अभेदप्रत्यक्षविरोधे श्रुत्यादीनामबोधकत्वादिति तन्न । भेदस्यानावृतत्वे देहातिरिक्तात्मनि वादिनां विवादाभावप्रसङ्गात् । न हि माणवकाग्न्योर्भेदे वा कश्चिद्विवदति । तस्माद्भेदे विवादादेहात्मज्ञानं मुख्यमेव । उक्तबाधेन भ्रान्तित्वनिश्चयात् न प्रमात्वापत्तिः । केवलश्रुत्यादीनां प्रत्यक्षादुर्बलत्वे ऽपि तर्कसहकृतानां प्रबलत्वात् । नाऽयं सर्प इति वाक्यादाप्तोक्तत्वात्तर्कसहकृतात्प्रत्यक्षबाधदर्शनात् । ननु तर्हि श्रुतितर्कज्ञानवतो ऽहंप्रत्ययेन भिन्नात्मभानादभेदज्ञानं गौणमिति चेत्, किं तज्ज्ञानेनाऽहंप्रत्ययस्य भेदविषयत्वं क्रियते उत भेदांशे सत्तानिश्चयत्वान्नाद्यः । ज्ञानस्याप्त्यासत्तित्वेन ज्ञानान्तरोपनीतभे-

दस्य प्रत्यक्षाहंप्रत्ययाविषयत्वात् । न हि घटज्ञानेन[1] पदविषयकं ज्ञानं भवति । शब्दयुक्त्यनुसन्धानात्प्रागप्यहंप्रत्ययस्य साक्ष्यात्मनि भेदगोचरत्वाच्च तस्य भेदांशे सत्तानिश्चयत्वाभावाद्भासमाने ऽपि भेदे आवृतत्वमुक्तम् । द्वितीयस्त्विष्ट एव । न च श्रुतियुक्तिभ्यामहंप्रत्यये भेदे सत्तानिश्चये सति अभेदज्ञानं गौणमिति वाच्यम् । परोक्षनिश्चयस्यापरोक्षभ्रमाविरोधित्वात् । अत एव भगवत्पादैर्विदुषां पश्वादिभिरविशेष उक्तः । अपरोक्षनिश्चये तु सर्वस्य बाधात्कस्य गौणत्वमित्यलम् । तस्माद्भासमानस्याप्यात्मनो ऽविद्याविषयत्वं युक्तमिति मत्वाह—

भासमाने ऽप्यावृतत्वं दृष्टं देहात्मभेदगमिति ।

एवं स्वयंप्रकाशात्मनि तदाश्रिततद्विषयाविद्यादोषसाधनेनाऽहङ्काराध्यासे दोषादिकारणत्रयजन्यत्वं सिद्धम् । अहङ्कारभ्रमस्य साक्षिरूपस्य विषयविशिष्टत्वेन जन्यत्वं मन्तव्यम् । परत्रात्मनि अवभास्यत्वं च लक्षणं सिद्धम् । नन्वधिष्ठानारोप्ययोरेकज्ञानविषयत्वमध्यासव्यापकं तदभावादविषयात्मन्यहङ्काराध्यासो न सम्भवतीति चेन्न । एकज्ञाने भासमानत्वस्यैव तद्व्यापकत्वात् । चैतन्यस्याऽहमिति ज्ञानरूपस्यान्तःकरणस्थत्वेन स्पष्टं भासमानत्वादर्पणस्थत्वेन सौरालोकवत् । तदाह भाष्यकारः । अस्मत्प्रत्ययविषत्वादिति । ननु तथा ऽप्यहमिति ज्ञानं नाध्यासः । अधिष्ठानारोप्यांशद्वयानुपलम्भादिति चेन्न । अहमुपलभे इति अंशद्वयानुभवस्य सर्वसंमतत्वादयो दहतीति दग्धृतादात्म्येनायस इवा ऽत्राप्युपलब्धृसाक्षितादात्म्येनाहङ्कारस्य भानात् । अहङ्कारस्य दृश्यत्वेन घटवद् द्रष्टृत्वायोगात् । कर्मत्वकर्तृत्वयोरेकस्यां क्रियायामेकस्यायोगेन स्वद्रष्टृत्वायोगाच्च । द्रष्टृहङ्कारौ भिन्नौ तादात्म्येनाऽहमिति प्रतिभासेते । दृश्यस्याऽपि विषयविशिष्टचैतन्यवत्त्वेन द्रष्टृत्वं मन्तव्यम् । एवं दुःखित्वपरमप्रेमास्पदत्वाभ्यां जडात्मांशद्वयमूढं तयोरेकत्र सम्भवादित्याह :—

अंशद्वयमहङ्कारे सर्वानुभवसाक्षिकमिति ।

अत्र प्राभाकराः प्रत्यवतिष्ठन्ते । घटमहं जानामीति विषयसंविदाश्रयत्वेन केवल आत्मा भासते । नात्रेदमंशो ऽस्ति । यः कल्पितः स्यात् । तथा चोपलब्धैवाहङ्कारो न तद्भिन्नः । अयोव्यतिरेकेण वन्हि-

(१) घटज्ञानपदज्ञानेनेति क्वचित्पाठः ।

वदहङ्कारातिरेकेणात्मनः कदाप्यदर्शनात्तत्र घटस्य कर्मत्वेन संविदः स्वप्रकाशत्वेनात्मनः तदाश्रयत्वेनापरोक्षत्वान्न कर्मकर्तृत्वविरोधः । अत्र सांख्याः —

बुद्धिस्थचित्प्रतिबिम्बस्तादृशविम्बाधीनः प्रतिबिम्बत्वात् मुखप्रतिबिम्बवदित्यात्मनो ऽनुमेयत्वं वदन्ति । ज्ञाततालिङ्गेन ज्ञानमनुमेयमिति भाट्टाः । सौत्रान्तिकास्तु संवेदनेषु प्रत्यक्षा अर्थप्रतिबिम्बास्तादृशविम्बाधीना इति बाह्यार्थानामनुमेयत्वमाहुः । तदयुक्तम् । घटमहं साक्षात्करोमीति प्रमातृप्रमाप्रमेयाणां प्रत्यक्षत्वानुभवविरोधात् । किञ्च बाह्यार्थानामनुमितौ साक्षाद्विषयत्वे प्रत्यक्षे ऽपि तेषामेव विषयता किं न स्यादनुमितेरपि प्रतिबिम्बग्राहित्वे बिम्बार्थासिद्धिर्मानाभावात् । तस्माद्ये ऽप्यपरोक्षाः । अत्राह विज्ञानवादी । यदपरोक्षं तद्विज्ञानाभिन्नं यथा विज्ञानं अपरोक्षश्च घटादिरिति । तथा च विज्ञानाभेद एवार्थस्यापरोक्षत्वं न तु विज्ञानकर्मत्वमिति तन्न । घटं जानामीति भेदानुभवविरोधात्तस्मादिन्द्रियजापरोक्षज्ञानकर्मत्वमेवार्थस्यापरोक्षत्वम् । यदप्याहुर्भाट्टास्तार्किकाश्चात्मा मानसप्रत्यक्षविषय इति, तदपि न । कर्तृकर्मविरोधात् । विषयसंविदाश्रयत्वेनैव तस्य प्रत्यक्षत्वसम्भवेन तद्विषयकज्ञानकल्पनागौरवात् ज्ञानविषयत्वे चानात्मत्वप्रसङ्गात् । अतो ज्ञानाश्रयत्वमेवात्मनो ऽपरोक्षत्वम् । यत्तु ज्ञानमनुव्यवसायगम्यमिति तार्किकास्तन्न । अनवस्थापत्तेः । निश्चितसत्ताकस्यैव ज्ञानस्यार्थसत्तानिश्चयत्वेनानुव्यवसायग्रहस्यावश्यकत्वात् । किञ्च । व्यवसायस्यानन्तरं ज्ञानत्वविशेषणज्ञानेन नाशान्नानुव्यवसायः जन्यप्रत्यक्षे विषयस्य हेतुत्वात् । न च विनश्यदवस्थो ऽनुव्यवसायो ऽस्तीति वाच्यम् । वर्तमानस्यैव प्रत्यक्षविषयत्वात् । अन्यथा प्रत्यक्षापि निष्कम्पा प्रवृत्तिर्न स्यात् । जानामीति वर्तमानतानुभवाच्च । किञ्च येनात्मनःसंयोगेन व्यवसायः, तेनैवानुव्यवसायो जायते, संयोगान्तरेण वा? नाद्यः । अनुव्यवसायमालाप्रसङ्गात् । संयोगभेदं विना ज्ञानभेदायोगाच्च । समूहालम्बने घटपटादिविषयभेदेन सामग्रीभेदे ऽप्यसमवायिकारणसंयोगैक्येन ज्ञानैक्यदर्शनात् । न द्वितीयः । क्रियाविभागादिन्यायेन संयोगान्तरोत्पत्तौ व्यवसायस्य चिरातीतत्वात्प्रत्यक्षत्वायोगात् । न च ज्ञानं बहुक्षणावस्थायि अपसिद्धान्तात् । आत्मनियुगपज्ज्ञानद्वयायोगाच्च । तस्मादुत्पन्नमात्रे ज्ञाने संशयादर्शनात्स्वप्रकाशत्वमेव ज्ञानस्यापरोक्षत्वम् ।

यदाहुर्भाट्टा ज्ञाततास्यो ऽनुभवो विषयनिष्ठश्चाक्षुषप्रत्यक्षः संयुक्तादात्म्यादिति । तन्न । अयोग्यानुभवग्राहित्वे चक्षुषस्तन्निष्ठ-रसादिग्राहकत्वप्रसङ्गात् । घटस्याऽनुभवाश्रयत्वे चेतनत्वापत्तेश्च । तस्मादात्मसमवेतस्वप्रकाशज्ञानमेव प्रमाणफलं न ज्ञातता । प्रमाणं त्वात्ममनइन्द्रियार्थानां सम्बन्धः । एतेन ज्ञानमेवार्थाकारत्वेन प्रमाणम् । अर्थाभेदेन प्रमेयं ज्ञानत्वेन फलमिति बौद्धोक्तं निरस्तम् । स्वस्य स्वहेतुत्वायोगात् । नन्वात्मा संविद्विषयः संविदन्यत्वाद्घटवत् । न च कर्मकर्तृत्वविरोधः । द्रव्यबोधरूपत्वादात्मनो द्रव्यांशेन कर्मत्वं बोधांशेन कर्तृत्वमित्यविरोधादिति चेन्न । ज्ञानकर्मत्वेन द्रव्यांशस्य घटवदनात्मत्वाज्ज्ञानकर्त्रंशस्यैवात्मत्वात् । तस्य च निरंशस्य ज्ञान-क्रियां प्रति गुणभूतस्य कर्तुस्तां प्रति प्राधान्यरूपकर्मत्वाविरोधतादवस्थ्यात् । तस्मात्संविदाश्रयत्वेनाऽहङ्कारस्य भानादात्मत्वमिति प्राप्तमिमं प्राभाकरकृतं पूर्वपक्षं संक्षिपति—

मातृमेयप्रमाणत्वं परोक्षत्वं निराकृतम् ।
अनुव्यवसितिर्मानमेयाभेदश्च दूषितः॥

प्राभाकरमुखेनैव द्रव्यबोधात्मदूषणमिति । एवं प्राप्ते ब्रूमः । स्व-प्रकाशानुभूतिरेवात्मा न जडाहङ्कार इति । तथा हि । किं प्रकाशस्यात्मनो जडानुभवाश्रयत्वेन सिद्धिरुत स्वप्रकाशानुभवाश्रयत्वेन, किं वा जडस्यात्मनः स्वप्रकाशानुभवाश्रयत्वेन सिद्धिरिति? नाद्यः । प्रमाणफलस्यानुभवस्य जडत्वे ततः काप्यज्ञानावरणनिवृत्त्ययोगाज्जगदान्ध्यप्रसङ्गात् । तस्मादनुभवः स्वनिवर्त्यसजातीयेनाऽनावृतः साक्षादावरणनिवर्तकत्वात्प्रदीपवत् । अनुभवे चाज्ञानशून्यत्वमनावृतत्वं पर्यवस्यति तच्च नानुव्यवसायादित्युक्तम् । अतः स्वत एवानुभवस्यानावृतत्वं वाच्यमिति स्वप्रकाशत्वसिद्धिः । न हि स्वप्रकाश आत्मा जडानुभवप्रसादात्सिध्यतीति युक्तं वक्तुम् । न द्वितीयः । उभयोः स्वप्रकाशत्वे मानाभावाद्दौरवान्मिथो वार्तानभिज्ञतया ऽऽश्रयाश्रयिभावासिद्धेश्च । न तृतीयः । तथा हि । अहङ्कारधर्मरूपो यो जन्यानुभवः स न स्वप्रकाशः कार्यत्वात् घटं जानामीति दृश्यत्वात् घटवत् स्वस्य स्वविषयत्वायोगादनुव्यवसायनिरासाच्च । जन्यानुभवविषयकं ज्ञानमहङ्कारधर्मातिरिक्तमित्यकामेनाप्यङ्गीकार्यम् । किञ्चा ऽहङ्कारो ज्ञानविषयः ज्ञानान्यत्वात् घटवत् । विपक्षे व्यवहारानुपपत्तिः ज्ञानान्यस्य व्यवहारविषयत्वे ज्ञानविषयत्वस्य प्रयोजकत्वात् ।

न चानात्मत्वापत्तिर्दोष इष्टत्वात्। तच्चाऽहङ्कारविषयकं ज्ञानं नाऽहङ्कारकर्तृकं कर्तृकर्मविरोधात्। सत्याश्रये प्रकाशगुणस्य काप्युत्पत्तेरदर्शनाच्च। तथा चाहङ्कारतद्धर्मसाक्षिभूतं ज्ञानं लाघवादेकं तदेव स्वप्रकाशम्। स्वप्रकाशत्वस्यैकव्यक्तिवृत्तित्वे लाघवात्। तच्चानादि नित्यम्। जन्मविनाशप्रतीतेश्चक्षुरादिजन्यवृत्तिविषयत्वात्। तच्चाद्वितीयम्। उपाधिपरामर्शं विना भेदाप्रतीतेः। तदेव चात्मा तद्भिन्नस्यानात्मत्वात्। भेदे मानाभावाच्च। आत्मा स्वप्रकाशानुभूत्यभिन्नः अनुभूतिकर्मत्वाभावे सत्यपरोक्षत्वादनुभूतिवत्। ततश्च स्वप्रकाश आत्मा तद्दृश्यो जडो नात्माहङ्कार इत्यहमित्यध्यासैशद्धयं सिद्धम्। ननु सिद्धान्ते स्वप्रकाशचिदात्मैवा ऽहङ्कार इत्यङ्गीक्रियतामिति चेन्न। दुःखादिपरिणामिनश्चिदात्मत्वायोगात्। सुषुप्तौ चिन्मात्रात्मनि भासमाने ऽप्यहमित्यभासमानत्वाच्च। देहादिवदनात्मैवाहङ्कार इत्यभिप्रेत्याऽऽह—

अनुभूतेः स्वयं भात्वमैक्यमात्मत्वमेव च।
अहङ्कारस्य नात्मत्वं सुषुप्त्यादावभासनात्॥ इति।

ननु चिदात्मन एवाहमित्युल्लेखे विषयानुभवो हेतुस्तदभावात् सुषुप्तावहमित्युल्लेखाभावो युक्त इति चेन्न। सापेक्षनिरपेक्षयोर्भेदात्। चिदात्मा विषयज्ञानानपेक्षः सुषुप्तौ भाति तन्मात्रगोचरत्वे ऽहमुल्लेखस्य तदपेक्षा न युक्ता। अतः सापेक्षो ऽहमुल्लेखविषयो ऽहङ्कारो विषयनिरूप्यश्चिदात्मनो भिद्यते। नन्वहमुल्लेखो ऽपि चिदात्मभानवद्विषयभानापेक्ष एव अतो ऽनपेक्षत्वात्तयोरैक्यमिति चेन्न। सुषुप्तावहमित्युल्लेखापत्तेः। न चेष्टापत्तिः। अननुभवात्। सुषुप्तिभङ्गप्रसङ्गाच्च। ह्यस्तनाहङ्कार इव सुषुप्तावहमित्यभिमन्यमान एवासमित्युत्थितस्य स्मृत्यापत्तेश्च। स्वप्रकाशाहङ्काराभिमानस्याप्यनुभवात्। ननु सुषुप्तावहङ्कारे न स्मृतिः अनुभवनाशाभावादिति चेत्तर्हि ह्यस्तने ऽपि सा न स्यात्। ननु सिद्धान्ते कथमहङ्कारस्मृतिरिति चेदुच्यते। अहङ्कारानुभवो वृत्त्यवच्छिन्नचैतन्यरूपो वृत्तिनाशान्नश्यति नाशेन संस्कारात्स्मृतिः। न च वृत्तिकर्तुस्तत्कर्मत्वे विरोध इति वाच्यम्। कर्तरि वृत्तिकृता ऽतिशयाभावेन कर्मत्वाभावात्। अहङ्कारे चिदंशो जडांशान्तःकरणकर्तृकवृत्तिविषयः, जडांशो वृत्त्यवच्छिन्नचैतन्यविषय इत्यविरोधात्। शालग्रामादिज्ञानधाराकालीनाऽहङ्कारस्य स्मृतिर्धारावृत्तिनाशादेव भवति। तद्वृत्त्यवच्छिन्नचैतन्यस्य वृत्तितद्विषयतदाश्रयाहङ्काराणां सत्तानिश्चयानुभवत्वादिति मन्तव्यम्। यत्तूत्थितस्य सुख-

महमस्वाप्समिति परामर्शसद्भावात्सुषुप्तौ सुखाश्रयत्वेनाहङ्कारानुभवो ऽस्तीति। तत्राह टीकाकारः। नाऽयं परामर्शः सुखगोचरः स्मृतिरूपः सुषुप्तौ विषयानुभवजन्यसुखानुभवाऽसम्भवान्नित्यसुखे मानाभावात्। किन्तूत्थितस्य दुःखाभावगोचरेयमनुमितिरिति। इदञ्चाहङ्कारात्मवादिनं प्रति तन्मतमाश्रित्य समाधानम्। सिद्धान्ते तु साक्षिस्वरूपसुखसद्भावात्सुषुप्तौ विक्षेपाभावादज्ञानसुषुप्तिसुखसाक्षिगोचराविद्यावृत्तिप्रतिबिम्बितचैतन्यात्मकसुखानुभवो जायते। तन्नाशे सति संस्कारो ऽप्यविद्यावच्छिन्ने साक्षिण्यनुभवितरि जायते। स एव साक्षी स्मरति सुखमहमस्वाप्समिति। स्मर्तृसाक्षितादात्म्यादहङ्कारे स्मर्तृत्वावभासः। अहङ्कारस्तु स्वमपीतो भवतीति श्रुत्या सुषुप्तावसत्त्वादननुभवाच्चोत्थितेन न स्मर्यते। किन्त्विदानीमभिव्यक्तो ऽनुभूयते। अन्ये तु साक्षिस्थसंस्कारेणाऽहङ्कारः स्मरति तस्यानुभवितृसाक्षितादात्म्यान्नानुभवस्मृत्योर्वैयधिकरण्यमित्याहुः। अस्मिन्मते सौषुप्तसुखस्मृतिर्मनोवृत्तिरेव। पूर्वस्मिन्मते तु अविद्यावृत्तिरिति भेदः। तदेतत्संगृह्णाति—

सुखसुप्तिपरामर्शो दुःखाभावैकगोचरः।
इति टीकाकृदुक्तिर्या सा न्यायमतसंश्रया॥
स्वरूपसुखसद्भावात्सिद्धान्ते सुखगोचरः। इति।

एवं स्मृतिमूलं सुषुप्तौ सुखानुभवो ऽस्तीति सिद्धम्। दुःखाभावस्तु सुषुप्तौ सुखलिङ्गेनोत्थितेना ऽनुमीयते। विशेषज्ञानाभावो ऽपि भावरूपाज्ञानेनाऽनुमीयते। तस्मात्सुषुप्तावहङ्कारस्य भाने साधकाभावात्सुषुप्तिभङ्गादिबाधकाच्चात्मनि भासमाने ऽप्यभासमानत्वाद्विनाशित्वात्परिणामित्वाद्दृश्यत्वाच्चानात्मत्वम्। श्रुतावथातो ऽहङ्कारादेश इत्यहङ्कारमुपदिश्याथात आत्मादेश इत्यहङ्कारान्निष्कृष्यात्मोपदेशान्महाभूतान्यहङ्कार इति स्मृतावहङ्कारं क्षेत्रेन्तर्भाव्य तत्साक्ष्यात्मनः क्षेत्रज्ञस्य दर्शितत्वाच्चाहङ्कारस्यानात्मत्वमिति सिद्धम्। तच्चाहङ्कारस्याविद्या माया प्रकृतिरग्रहणमव्यक्तम् तमःकारणं लयः शक्तिर्महासुषुप्तिर्निद्रा ऽक्षरमाकाशमिति नामकमज्ञानमुपादानम्। ईश्वरः कर्त्ता भ्रान्तिकर्म संस्कारानिमित्तं विज्ञानक्रियाशक्तिद्वयं स्वरूपं कर्तृत्वादिकं कार्यं साक्षी प्रमाणमिति मन्तव्यम्। तस्याहङ्काराख्यान्तःकरणस्य सांशत्वात्सुषुप्तौ प्राणव्यापारानुकूलः क्रियाशक्त्यंशस्तिष्ठति। ज्ञानशक्त्यंशो लीयते। सांख्यास्तु विचित्रपरिणामस्वभावस्य चेतनाऽनधिष्ठितस्य प्रधानस्य परिणामो बुद्धिरहङ्कारः कर्तृत्वादिमानित्याहु-

स्तत्र । कर्तृत्वादीनामात्मसम्बन्धाभावेन परोक्षत्वापत्तेर्बन्धमोक्ष-वैयधिकरण्याच्च । न ह्यसङ्गात्मनः परनिष्ठकर्तृत्वादिसंबन्धेन सत्यः संबन्धो युज्यते । अतः ख्यात्यन्तरनिरासादाविद्यक एव संबन्धो वाच्य इत्यविद्यया ऽऽत्मन्यध्यस्ता बुद्धिरहङ्कारः । नैयायिकास्तु बुद्धिनिमित्त-कज्ञानाख्यो गुण आत्मधर्मः मनस्तत्र कारणं तदतिरेकेण कर्तृत्वादि-मान् बुद्ध्याख्यो ऽहङ्कारो ऽप्रमाणिक इत्याहुः । अत्रोच्यते । कामादी-नामसङ्गस्वप्रकाशाचिदात्मधर्मत्वासम्भवात् कामः संकल्प इत्यादिश्रु-त्या ऽहमिच्छामि करोमीति दृश्यमानधर्मवत्त्वेन मनो द्रव्यमेव बुद्धि-रहङ्कार इत्युच्यते । बुद्धेर्गुणेनाऽऽत्मा स्वतो महानप्यारात्रमात्रो दृष्ट इति श्रुत्या परिमाणगुणवत्त्वाद् बुद्धिर्द्रव्यमेव । बुद्धिर्यदा नेङ्गते, त-दा परमात्मानमश्नुते इति श्रुत्या चेष्टावत्त्वाच्च । सा च बुद्धिर्मन एव कामः संकल्प इत्यादिश्रुतौ धीर्मन इत्यभेदनिर्देशात् स एवाहङ्कारः कामादिधर्मित्वादित्यलम् । तदेतत्संगृह्णाति —

अहङ्कारस्य हेतुश्च स्वरूपं कार्यमेव वा ।
प्रदर्शितं तथा तस्य द्रव्यत्वं बुद्धिरूपतः ॥ इति ।

तथा च यथा स्फटिके लौहित्यं कुसुमसान्निध्यदोषात्कल्पित-मेवं प्रत्यगात्मनि कर्तृत्वादिर्बन्धो ऽहङ्कारसान्निध्यात्कल्पित इत्यसं-सारिब्रह्मैक्यशास्त्रार्थे न कश्चिद्विरोधः । अत्रायं प्रयोगः आत्मनि कर्तृ-त्वादिकं मिथ्या सोपाधिकत्वात्स्फटिके लौहित्यवत् । इत्याह—

अत आत्मनि बन्धः स्याल्लौहित्यं स्फटिके यथा इति ।

ननु चक्षुःसंयुक्तसमवायेन कुसुमरूपस्य गृह्यमाणस्फटिके-नाविवेकमात्रं न मिथ्यारूपमिति दृष्टान्तासिद्धिरिति चेन्न । कुसुम-स्य लौहित्यं स्फटिके नास्तीति विवेके ऽपि लोहितः स्फटिक इति प्र-तीतेः, चक्षुःसंयुक्तस्फटिकसन्निहिते कुसुमे घटादिव्यवहिते रूप-ग्रहणासम्भवाच्च । एतेन गृह्यमाणारोप इत्यन्यथाख्यातिर्निरस्ता । उक्तव्यतिरेकनिश्चयस्य ग्राह्यज्ञानमात्रप्रतिबन्धकत्वात् । यत्तु रू-पप्रतिबिम्बभ्रमो ऽयमिति, तन्न । द्रव्यं विना रूपमात्रप्रतिबिम्बायो-गात् । सद्द्रव्यरूपप्रतिबिम्बे स्फटिके लोहितं कुसुममिति धीः स्यात् । यदपि कुसुमप्रभासंयोगात्तथा भ्रम इति, तदपि न । पद्मरागादेरिव कुसुमस्य प्रभायां मानाभावात् । तथा ऽपि रूपितादात्म्यस्य रक्तः स्फटिक इत्यपरोक्षज्ञानविषयस्य मिथ्यात्वावश्यम्भावादसतो ऽप-रोक्षत्वायोगात् । तस्माद्रक्तद्रव्यसन्निधिदोषात् मिथ्यारूपं जायते इति

दृष्टान्तसिद्धिः। नन्वेवं सति स्फटिके कुसुमे च रूपद्वयवदात्मनि अहङ्कारे च कर्तृत्वद्वयं भायादिति चेन्न । धर्मिणोरेकत्वाध्यासेन दीपयोरैक्ये प्रभयोरेकत्वभानवत्कर्तृत्वयोरेकत्वभानाऽविरोधात् । यद्वा कर्तृत्वादिधर्मको ऽहङ्कार आत्मनि स्वरूपेण तादात्म्येन च कल्पित इति एकमेव कर्तृत्वादिकम्। न च दृष्टान्तासङ्गतिः। उपाधिसान्निध्यान्मिथ्याधर्मभानमित्यंशे तत्सङ्गतेः । अत एव वृत्तिं विनैव साक्षितादात्म्यादहङ्कारस्य दृश्यत्वलक्षणत इदमर्थस्या ऽपि न व्यवहारत इदमर्थत्वम्। शरीरादेस्तु वृत्तिव्यवधानसिद्धिकत्वाद्व्यवहारतो ऽपीदमर्थत्वमिति विशेषः। एवं बन्धस्यौपाधिकत्वेन मिथ्यात्वादसंसारिब्रह्माभेदाविरोधे सति युज्यते । जीवो ब्रह्मैव। तत्प्रतिबिम्बत्वाद्दर्पणजलादिषु मुखसूर्यादिप्रतिबिम्बवदित्याह--

जीवब्रह्मविभागस्तु लोके बिम्बानुबिम्बवत् इति ।

न च हेत्वसिद्धिः । यथा ह्ययं ज्योतिरात्मा विवस्वानपोभिन्ना बहुधैको ऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजो ऽयमात्मा। स एष इह प्रविष्ट इत्यादिश्रुतेः। यथा ऽयं विवस्वानेको ऽपि भिन्ना अपो ऽनुगच्छन्ननुप्रविष्टः सन् बहुधा क्रियते एवमात्मा चिन्मात्र एको ऽप्युपाधिना जलवत्स्वच्छया मायया भेदरूपो भिन्नो जीवः सन् क्षेत्रशब्दितान्तःकरणादिषु बहुधा क्रियते इति योजना । प्रतिबिम्बभावातिरिक्तप्रवेशासम्भवाद्बिम्बकूटस्थेश्वरस्य प्रवेशवाक्यमपि जीवस्य प्रतिबिम्बत्वे मानम्। "एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति"स्मृतिरपि। ननु यद्यस्य प्रतिबिम्बं तत्तदेवेति न व्याप्तिः। मुखे इमे भिन्ने इति भेदानुभवविरोधात्प्रत्यङ्मुखत्वादिविरुद्धधर्मवत्त्वाच्च अतो बिम्बमुखस्य छायामुखान्तरं वा प्रतिबिम्ब इति चेन्न। स्पष्टदन्तनेत्राद्यनुभवेन छायात्वासम्भवात्। ग्रीवास्थमेवेदं मुखमित्यभेदप्रत्यभिज्ञया मुखान्तरत्वायोगात्। अतो बिम्बाधीनचेष्टावत्तया तत्र छायाशब्दो गौणः। किञ्च किं मुखान्तरं दर्पणे सत्यं मिथ्या वा ? नाद्यः। शशमस्तके विषाणस्येव दर्पणे मुखस्योत्पत्तिकारणाभावाद्दर्पणावयवानां दर्पणे स्थिते परिणामान्तरायोगात् । दर्पणनाशस्त्वनुभवबाधितः । दर्पणे पर्वताद्युत्पत्तौ गुरुत्वातिशयात्पतनप्रसङ्गाच्च । बिम्बापाये ऽपि स्थितिप्रसङ्गाच्च । न चापेक्षाबुद्धिनाशाद्धित्वादिनाशवन्निमित्तापाये नैमित्तिकप्रतिबिम्बद्रव्यापाय इति वाच्यम् । द्वित्वादेर्यावद्द्रव्यभाविसतो ऽपेक्षाबुद्धिव्यङ्ग्यत्वान्निमित्तनाशे द्रव्यनाशायोगाच्च ।

दर्पणस्यान्तर्मुखादेरुत्पत्तौ कठिनदर्पणभागव्यवधानेना ऽनुपलम्भप्रसङ्गाच्च । उपर्युत्पत्तावान्तरत्वानुभवविरोधात् । त्वगिन्द्रियग्राह्यत्वापत्तेश्च । अतो न सत्यं मुखान्तरम् । यत्तु बिम्बस्य प्रतिमुद्रा प्रतिबिम्ब इति, तन्न । स्निग्धसमपङ्क्ते पादस्येव दर्पणे मुखस्य संश्लेषाभावात्परिमाणभेदाच्च । नापि मिथ्या मुखान्तरं नेदं रजतमिति रजतस्वरूपबाधवन्नेदं मुखमिति स्वरूपबाधप्रसङ्गात् । तस्मान्ना ऽत्र दर्पणे मुखमिति संसर्गमात्रबाधान्मदीयमेवेदं मुखमित्यबाधितप्रत्यभिज्ञानात्तदेव । तत्प्रत्यङ्मुखत्वादिविरुद्धधर्मास्तु कल्पितभेदादुपपद्यन्ते । ननु मुखस्याचाक्षुषत्वात्तत्प्रतिबिम्बं कथं चाक्षुषमिति चेन्न । नासिकाद्यवयवसन्निकर्षेण मुखस्य चाक्षुषत्वाद्दर्पणाभिहता नेत्ररश्मयः परावृत्य मुखं व्याप्य व्यत्यस्तं दर्शयन्ति । ननु लोके भवतु बिम्बप्रतिबिम्वयोरभेदः, न तु जीवब्रह्मणोः तत्त्वमसीति संसारिस्वरूपबाधादिति चेत् ? अहो कष्टा तव मतिः ! अन्तःकरणोपाधिकल्पितः संसार इति विरोधं परिहृत्य बिम्बप्रतिबिम्बदृष्टान्तेन सम्भावितमैक्यं वाक्यस्वारस्येन प्रमीयमाणं परित्यजति निश्रेयसार्थिनो नायं चाङ्गीकरोति । तस्मात्सो ऽयं देवदत्त इतिवदभेदार्थमिदं वाक्यं न बाधार्थमिति सिद्धमित्याह—

तत्त्वमस्यादिवाक्यं च न बाधार्थमितीरितमिति ।

एवं बिम्बमेवोपाधिस्थत्वेन भासमानं प्रतिबिम्बमिति प्रतिबिम्बं सत्यमेव उपाधिस्थत्वादिधर्मा एव कल्पिता इति तदंशे भ्रमः । नन्वयं भ्रमो न युक्तः उर्ध्वाग्रा वृक्षो न जलस्थ इत्यपरोक्षविशेषदर्शने ऽपि अधोग्रत्वादिमत्तया जले वृक्षभानात्तद्धेत्वज्ञानाभावादिति चेन्न । प्रतिबिम्वविभ्रमस्य मूलाविद्याकार्यत्वात् न च व्यावहारिकत्वापत्तिः आगन्तुकदोषजन्यत्वेन स्वप्नवत्प्रातिभासिकत्वोपपत्तेः । अस्ति चोपाधिसन्निधिदोषः । के चित्तूपाधिदोषप्रतिबन्धाद्बिम्वप्रतिबिम्वयोरैक्यापरोक्षज्ञानं नास्तीति ऐक्यावच्छिन्नात्मस्थमवस्थाज्ञानं तदावरकं भ्रमहेतुरस्तीत्याहुः । अन्ये त्वैक्यस्य बिम्बस्वरूपत्वात्प्रत्यक्षज्ञानमस्त्येवेति न तत्रावरणमस्ति । अज्ञानमात्रं तु भ्रमान्यथानुपपत्त्या ऽस्तीति कल्प्यते । कालान्तरे न जानामीत्यनुभवाच्च निरुपाधिकभ्रम एवावरणं हेतुः । सोपाधिभ्रमे तूपाधिः । भ्रमत्वावच्छिन्नं प्रत्यज्ञानं हेतुरिति व्यवस्थामाहुः । विद्यमानमप्यज्ञानमावरणाभावाद्विशेषदर्शनप्रतिबन्धाच्च तत्काले न व्यवह्रियते । विशेषदर्शनमप्यु-

पाधिप्रतिबन्धान्न भ्रमं निवर्तयति । नन्वेवं सति अहं ब्रह्मेति तत्त्वज्ञानमप्यहङ्कारोपाधिप्रतिबन्धात्कर्तृत्वादिभ्रमं न निवर्तयेत् । तथा चोपाधिनिरासार्थं किमपेक्षितमिति तत एव मुक्तिः स्यादिति चेदुच्यते । तत्त्वज्ञाननिवर्त्याज्ञानकार्यत्वादहङ्कारोपाधिर्न प्रतिबन्धकः । दर्पणादिस्तु मुखादितत्त्वज्ञाननिवर्त्याज्ञानकार्यत्वाभावात्तत्त्वज्ञानकार्यप्रतिबन्धक इति । ननु देवदत्तप्रतिबिम्बस्येव जीवस्य प्रतिबिम्बत्वे तत्त्वज्ञानाश्रयत्वं न स्यादिति चेन्न । देवदत्तशरीरप्रतिबिम्बस्याचेतनत्वाज्ञानानाश्रयत्वे ऽपि चेतनप्रतिबिम्बस्य जीवस्य चेतनत्वेन तदाश्रयत्वसम्भवात् । ननु तथा ऽपि तत्त्वज्ञानं बिम्बस्येव देवदत्तस्य दृष्टमित्यत्राऽपि बिम्बेश्वरस्यैव तत्त्वज्ञानाश्रयत्वं स्यादिति चेन्न । भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वे भ्रान्तत्वस्यैव प्रयोजकत्वात् । जीवस्यैव भ्रमहेत्वज्ञानवत्त्वेन भ्रान्तत्वात्तस्यैव तदाश्रयत्वम् । यद्यपीश्वरस्याऽपि जीववच्चित्त्वेनाज्ञानवत्त्वमस्ति तथापीश्वरस्य कुत्राप्यावरणाभावान्न भ्रमहेत्वज्ञानवत्त्वमिति न भ्रान्तत्वमित्युक्तं पुरस्तात् । अतो देवदत्तस्याऽपि भ्रान्तत्वादेव तत्त्वज्ञानवत्त्वं न बिम्बत्वादित्यनवद्यम् । जीवस्यामूर्तनीरूपेश्वरप्रतिबिम्बत्वमाकाशस्य साभ्रनक्षत्रस्याल्पजले प्रतिबिम्बदर्शनादुपपन्नम् । केचित्तु घटाकाशवदविद्यावच्छिन्नो जीवो न तत्प्रतिबिम्ब इत्याहुस्तन्न । घटानवच्छिन्नाकाशस्य घटाद् बहिरेव स्थितिवदविद्यानवच्छिन्नेश्वरस्याविद्यकब्रह्माण्डाद् बहिरेव स्थितिप्रसङ्गात् । तथा च सर्वसम्बन्धाभावात्सर्वोपादानत्वसर्वज्ञत्वादिकं न स्यात् । न ह्यवच्छेदकाभावविशिष्टास्याऽनवच्छिन्नस्याऽवच्छेदकेन सम्बन्धो युज्यते । ननु बिम्बत्वविशिष्टस्येश्वरस्य कथं प्रतिबिम्बोपाध्यविद्यासम्बन्धः बिम्बमुखस्य दर्पणसम्बन्धादर्शनादिति चेत् । उच्यते । बिम्बत्वं हि यावद्बिम्बस्वरूपव्यापित्वेन मुखादावनुभूयते । न त्वनवच्छिन्नत्ववदव्याप्यवृत्ति । तथा च सर्वगतचिन्मात्रस्थं बिम्बत्वचिन्मात्रव्यापीत्ति भवति बिम्बत्वविशिष्टं ब्रह्म सर्वगतं चिन्मात्रसम्बन्ध्यविद्यायां प्रतिबिम्बचैतन्यसम्बन्धश्चास्तीति चिन्मात्रस्य बिम्बचैतन्यस्य च सम्बन्धद्वयमादाय बिम्बस्य द्विगुणीकृत्य वृत्तिरित्युच्यते अनवच्छिन्नस्य तु चिन्मात्रसम्बन्धव्यवच्छेदकसम्बन्धाभावान्न द्विगुणीकृत्य वृत्तिरिति विशेषः । तस्मात् प्रतिबिम्बो जीव इति पक्ष एव श्रेयानिति सिद्धम् । यत्तु अनवच्छिन्नस्यापि चिन्मात्रत्वरूपेण सर्वसम्बन्धो ऽस्तीति । तन्न । जीव-

व्यावृत्तरूपेणैवेश्वरस्य सर्वगतत्वादेर्वक्तव्यत्वात्। अन्यथा साङ्कर्यात्। यदप्यवच्छेदकसमानसत्ताकाभावावच्छिन्नस्यावच्छेदकासम्बन्धेऽपि पारमार्थिकाभावावच्छिन्नस्याविद्यावच्छेदकसम्बन्धोऽस्तीति स ईश्वर इति, तन्न। अभावस्य सर्वोपादानत्वाद्यप्रयोजकस्येश्वरोपाधित्वायोगात्। तस्मान्मायिनं तु महेश्वरमिति मायावच्छिन्नस्येश्वरत्वश्रुतेः तस्योपादानत्वादिप्रयोजकत्वाच्च श्रुतिस्मृतिन्यायसिद्धत्वात्प्रतिबिम्बभावस्य जीवव्यावृत्तबिम्बत्वाकारेण मायावच्छिन्न एवेश्वर इति पक्षः साधीयानित्यलमतिविस्तरेण । एवमविद्याप्रतिबिम्बत्वाक्रान्तं शुद्धं चिन्मात्रमेव सुषुप्तिसाक्षी प्राज्ञो जीव इत्युच्यते । स चाविकल्पचिन्मात्रादीपद्धिकल्पार्हः। उत्थाने परामर्शयोग्यप्रकाशत्वात् । स चाविद्यया चिन्मात्रादीपद्भिन्नः प्रतिबिम्बो जीवः पुनरन्तःकरणप्रतिबिम्बः सन् स्वप्ने तैजसः प्रमाता कर्त्ता ऽहमित्यादिस्फुटविकल्पार्हो भवति। ततःपुनरन्तःकरणसंसृष्टे स्थूलदेहे ऽभिव्यक्तः सन् जागरणे विश्वाख्यो मनुष्यो ऽहमित्यादि स्फुटतमविकल्पार्हो भवति। एवं पूर्वोपाध्यवच्छिन्नस्यैवोत्तरोपाध्यवच्छेदाङ्गीकारादुपाधिभेदे ऽपि नैकत्र देहे जीवभेदस्तत्र प्राज्ञेश्वरयोर्भेदो ऽनादिरज्ञातसत्ताकश्चानादेरप्यविद्यासम्बन्धवदविद्याधीनस्थितिकत्वादविद्यातन्त्रत्वं युज्यते । तैजसादिभेदस्तु कार्योपाधिकत्वात्कार्य इति अविद्योपादानकः प्रातीतिकश्चेति विभागः । एवं चिन्मात्रस्यैवाविद्याचित्तदेहैरुपाधिभिः संसार इति न बन्धमुक्तिवैयधिकरण्यम् । जीवेश्वरयोः कल्पितभेदान्न सर्वज्ञत्वादिसाङ्कर्यमिति सर्वं सुस्थम्। तदेतत्प्रमेयं संगृह्णाति—

प्रतिबिम्बस्य सत्यत्वमवच्छिन्नेन जीवता ।
अज्ञानचित्तदेहैश्च जीवभेदः स्फुटीकृत इति ॥

अवच्छिन्ने जीवता नेति सम्बन्धः । नन्वात्मनि अहङ्काराध्यासो न युक्तः उपाध्यभावादिति शङ्कानिरासार्थं रज्जुसर्पमुदाहरन्ति पूर्वाचार्याः । यथा पूर्वानुभवसंस्काराद्रज्जौ सर्पो निरुपाधिको ऽध्यस्यते तथा ऽहङ्कार आत्मन्यध्यस्यते । नन्वात्मनि कर्तृत्वादेरध्यासो नास्ति स्वतः कर्तृत्वादिसम्भवात् । न चाऽसङ्गो ह्ययं पुरुष इत्यादिश्रुत्या निमित्तसङ्गाभावान्न कर्तृत्वादिसम्भव इति वाच्यम् । लोके वस्तुमात्रस्य सङ्गित्वेनाऽसङ्गत्वस्यासम्भवादिति चेन्न । आकाशवन्निरवयवत्वेनात्मनो ऽसङ्गत्वसम्भवादिति वक्तुं घटाकाशमुदाह-

रन्ति। न ह्याकाशे घटसंयोगः सम्भवति। निरवयवे वस्तुन्यवच्छेदक-भेदालाभेनाव्याप्यवृत्तिसंयोगविरोधादिति मत्वाह—

निरुपाधिरहङ्कारो रज्जुसर्पवदिष्यते।
आत्मासङ्गत्वसिद्ध्यर्थं घटाकाशोऽप्युदाहृत इति॥

नन्वात्मनोऽसङ्गत्वे प्रमातृत्वानुपपत्तिः। तथा च प्रमातृत्व-पूर्वकः सर्वो व्यवहारो लुप्येतातः सङ्गशीलः कर्तृत्वादिरूप एवात्मेति न कर्तृत्वादेरध्यासः। न चान्तःकरणं प्रमातृ जडत्वात्। न च स्वरूपज्ञानवत्त्वमेवात्मनः प्रमातृत्वमिति वाच्यम्। सर्वदा सर्वार्थज्ञानापत्तेः। अत्राह वैतण्डिकः। कर्त्रात्मवादेऽपि विषयविशे-षप्रमातृत्वं न युक्तमिति। तथा हि। घटचक्षुःसंयोगाद्यज्ज्ञानं वि-श्वात्मनि जातं तत्किमालोकरूपवद्यावदाश्रयव्यापि उत देहाव-च्छिन्नात्ममात्रवृत्ति? आद्ये आलोकसंयुक्तसर्वार्थप्रकाशवदात्मसं-युक्तसर्वार्थभानं स्यात्। न च स्वजनकेन्द्रियनिरूपितसन्निकर्षाश्रय एव विषयो नान्य इति व्यवस्थेति वाच्यम्। अस्मिन् ज्ञाने घटस-न्निकर्षजन्यतावच्छेदकस्य ज्ञानान्तराव्यावृत्तस्याऽभावेन जन्यजनक-भावस्य दुर्ग्रहत्वात्। न द्वितीयः। देहावच्छिन्नात्मनो घटाद्यसम्ब-न्धेन ज्ञानस्यार्थेन स्वाश्रयद्वारकसम्बन्धस्याभावात्। असम्बन्धा-र्थभाने सर्वभानापत्तेः। एतेनाणुपरिमाणात्मवादेऽप्यव्यवस्था दर्शिता। तस्मान्न कस्याऽपि मते ज्ञानस्य विषयव्यवस्थेति।

अत्रोच्यते। अविद्याप्रतिबिम्बचैतन्यं जीवः बिम्बचैतन्यमीश्वर इत्युक्तम्। तत्र घटादयो बिम्बचैतन्यविवर्तत्वादीश्वरेण नित्यसम्ब-द्धाः न तु जीवेन तेषां सम्बन्धोऽस्ति। तेषु जीवस्यानुपादानत्वा-दन्तःकरणेन तु जीवस्य स्वभावविशेषात्सम्बन्धोऽस्ति। यथा गोत्वादेर्दण्डायमानत्वेन सर्ववस्त्वव्यवहितत्वेऽपि सास्नादिमत्पिण्डे-नैव सम्बन्धो नान्येन; तद्वत् जीवस्यान्तःकरणं प्रत्युपादानत्वाच्च तेन सम्बन्धो युज्यते। तथा च यदा घटादयश्चक्षुरादीन्द्रियैः संयु-ज्यन्ते तदा जीवाध्यस्तान्तःकरणस्य विपुलावस्थारूपाविषयसंयु-क्तैव वृत्तिर्जायते। तया वृत्त्या विषयावच्छिन्नबिम्बचैतन्यमवच्छि-द्यते। एवं जीवोऽन्तःकरणेनावच्छिन्नविषयाधिष्ठानचैतन्यं तेनाव-च्छिन्नं न भवतीति अन्तःकरणावच्छेदाऽनवच्छेदकृतो भेदो यः पूर्वं स्थितः स वृत्त्यवच्छेदान्निवर्तते। वृत्तिवृत्तिमतोरभेदेन वृत्तिद्वारा ऽन्तःकरणेन विषयचैतन्यस्यावच्छेदात्। एवमन्तःकरणोपहित-

जीवचैतन्यस्य साक्षिणो विषयावच्छिन्नेश्वरचैतन्यस्याऽऽविद्यकभेदे सत्येवैकान्तःकरणोपाध्यवच्छेदादभेदे जाते सति विषयस्य साक्ष्यभिन्नचैतन्यतादात्म्यरूपः सम्बन्धो भवति । एवं स्वतोऽपरोक्षसत्तिसम्बद्धोऽर्थोऽपरोक्ष इत्युच्यते । तादृशापरोक्षार्थविषयतया वृत्तिरपरोक्षेत्युच्यते । तया वृत्त्या वृत्तिसंसृष्टाविषयेण वा विषयावच्छिन्नचैतन्यस्थमावरणमभिभूयते । एकाविद्यावरणवादे ब्रह्मज्ञानं विनाऽऽवरणस्य निवृत्त्ययोगात् । न च कार्येण कारणस्य कथमभिभवः? इति वाच्यम् । अग्नेरिन्धनाभिभावकत्वदर्शनात् । अवस्याज्ञाननानात्वपक्षे त्वावरणं निवर्तते । तथा च विषयापरोक्षत्वव्यवहारप्रतिबन्धकावरणानिवृत्तौ सत्याम् अनावृतं चैतन्यमज्ञानं नाशयति । न तु वृत्तिः । ज्ञानस्यैवाज्ञाननाशकत्वात् । एवमावरणाज्ञाननिवृत्तिरूपाभिव्यक्तियुक्तं विषयावच्छिन्नचैतन्यं फलं स्फुरणं प्राकट्यमिति चोच्यते । ननु अन्तःकरणस्थाया घटविषयाया वृत्तिरूपक्रियायाः साक्षिभेदेनाभिव्यक्तं स्फुरणं कल्पितभेदेन साक्षिस्थं कथं फलम् ? भिन्नाश्रयत्वात् । लोके गमनादिक्रियाफलस्य ग्रामप्राप्त्यादेः कर्तृस्थत्वदर्शनात् । स्फुरणस्य घटो न विषयः । वृत्त्यैव तद्व्यवहारोपपत्तेः । अतो वृत्त्यवच्छिन्नान्तःकरणादिरेव स्फुरणस्य विषय इति भिन्नविषयत्वाच्च तन्न तस्याः फलमिति चेन्न । साक्ष्यन्तःकरणयोरैक्याध्यासेन वृत्तेः साक्षिस्थत्वेन स्फुरणसमानाश्रयत्वाद्व्यवहारे व्यवहर्तव्यप्रकाशस्यैव हेतुतया व्यवहर्तव्यो घटः स्फुरणस्य विषय इति समानविषयत्वाच्च ।

के चित्तु विषयसंसृष्टावृत्तिस्थप्रतिबिम्बचैतन्यं फलमित्याहुः । तत्र टीकायां चैतन्यविवर्तत्वाद्वृत्तिसंसृष्टो विषयोऽन्तःकरणावच्छिन्नचैतन्याभेदेन स्वावच्छिन्नचैतन्यरूपामपरोक्षतामभिव्यनक्तीत्युक्तिविरोधात् । तत्र हि विषयस्यास्वच्छस्य कथं चैतन्यव्यञ्जकत्वमित्याशङ्क्यान्तःकरणस्य स्वास्मिन्निव स्वसंसर्गिण्यभिव्यक्तियोग्यताहेतुत्वाद्वृत्तिसंसर्गाद्विषयस्यावरणाभिभावकत्वरूपं व्यञ्जकत्वमित्युपपाद्य विषयेण व्यङ्ग्यस्य चैतन्यस्याभावमाशङ्क्य चैतन्यविवर्तत्वाद्विषयस्याधिष्ठानत्वेन चैतन्यमस्तीति प्रतिपादितम् । तस्माद्विषयावच्छिन्नमेव चैतन्यमज्ञातं सत्प्रमेयम् । अभिव्यक्तं सत्फलं वृत्त्यवच्छिन्नं चैतन्यं प्रमावृत्तिमदन्तःकरणावच्छिन्नं प्रमातृ इति व्यवस्था सिद्धा । यद्यप्यज्ञानोपाधिना शुद्धचिन्मात्रमेव

सर्वसाक्षि तथाऽपि देवदत्तादिप्रमातुरसङ्कीर्णव्यवहारहेतुत्वमन्तः-करणोपहितत्वेनैव वाच्यमित्यन्तःकरणोपहितो ऽसङ्कीर्णव्यवहारा-ङ्गसाक्षीत्युच्यते। सर्वसाक्षिणः सर्वव्यवहारहेतुत्वयोग्यस्य परि-च्छिन्नव्यवहारहेतुत्वायोगात्। एवं साक्षिणो विषयेण तदवच्छि-न्नचैतन्याभेदद्वारा सम्बन्धार्थमावरणभङ्गार्थं वृत्तेर्निर्गमनमावश्य-कमित्युक्तार्थं द्वाभ्यां संगृह्णाति—

जीवस्य व्यापिनः सङ्गसिद्धावावृत्तिभञ्जने।
वृत्तिर्हेतुरभेदार्था वेति पक्षा उदाहृताः॥
धीनित्यसङ्गी विषयव्यक्तचिद्बिम्बसङ्गि यत्।
अपरोक्षं तदेवेति प्रतिकर्मव्यवस्थितिः॥ इति।

यदन्तःकरणवृत्तिसंसृष्टो यो विषयः तस्यैव तदन्तःकरणाविशि-ष्टप्रमात्रपेक्षया तदुपहितसाक्ष्यपेक्षया वा ऽभेदेनाभिव्यक्तबिम्बचैत-न्यरूपस्फुरणतादात्म्यादपरोक्षता नान्यस्येति प्रतिविषयव्यवस्था। अपरोक्षविषयव्यवस्था तु वक्ष्यते। ननु साक्ष्यभिन्नबिम्बचैतन्यस्थ-त्वेन घटस्यैव पूर्णानन्दत्वसर्वज्ञत्वादीनामपरोक्षता स्यादिति चेन्न। तदंशावरणनिवर्तकतदाकारापरोक्षवृत्त्यभावात्। तस्माद्वृत्तिमदन्तः-करणतादात्म्यादात्मनि प्रमातृत्वाद्यध्यास इत्यनवद्यम्॥

ननु साक्ष्यभिन्नसंविदभिन्नत्वेन नीलाद्यर्थानामापरोक्ष्ये विज्ञाना-तिरिक्तो ऽर्थो नास्तीत्युक्तं स्यात्तथा च बौद्धराद्धान्तापत्तिरिति चेन्न। वैषम्यात्। ते हि क्षणिकविज्ञानातिरेकेणाऽर्थक्रियासमर्थत्वरूपसत्वा-क्रान्तो ऽर्थो नास्तीत्याहुः। वयं तु अनाद्यनन्ताद्वितीयसंविदतिरेकेण ताद्दशसत्त्वाक्रान्ता अर्थाः स्थायिनः सन्तीति ब्रूम इति न सिद्धा-न्तसङ्करः। ननु संविद्विषययोर्भेदे किं मानमिति चेदुच्यते। संवि-त्तावदेका नीलाद्यर्थभेदे ऽपि संवित्संविदित्येकाकारप्रत्ययात्। न चाऽयं जातिगोचरः संविद्व्यक्तिभेदे मानाभावात्। नीलसंवित् पी-तसंविन्न भवतीति प्रतीतेरौपाधिकभेदगोचरत्वात्। तथा च संवित् व्यावृत्तार्थेभ्यो भिन्ना अनुवृत्तत्वात् घटमठादिभ्य आकाशवत्। किञ्चाऽहं नीलं पश्यामीति कर्तृकर्मभावेनालयसंविदो नीलाद्भेदः प्रत्यक्षः त्वया ऽङ्गीकृतश्च। तथा च नीलसंविन्नीलाद्भिन्ना संवित्त्वात्। आलयसंविदभिन्नत्वाद्वा आलयसंविद्वत्। न च द्वितीयहेत्वसिद्धिः। संविदैक्यस्य साधितत्वात्। न च नीलस्य स्वसंविदो भेदे तद्विष-यत्वं न स्यात्पीतवदिति वाच्यम्। अत्यन्ताभेदे ऽहं नीलं पश्यामीति

ग्राह्यग्राहकभावेन भेदानुभवविरोधात् । ननु कथं तर्हि नीलसंविदो नीलमात्रं विषयः ! भिन्नस्याऽसाधारणसम्बन्धाभावात् । न च संविदः इन्द्रियव्यापारेण यस्मिन् वस्तुनि असाधारणसम्बन्धो भवति स एव तद्विषय इत्युक्ता व्यवस्थति वाच्यम् । क्षणिकविज्ञानानां तादृशसम्बन्धानुपपत्तेः । अतो यद्यद्धानाभिन्नं तदेव तस्य विषय इत्यभेद एव सम्बन्धो ऽभ्युपेय इति । भेदानुभवो विभ्रम इति चेन्न । आत्मरूपविज्ञानस्य क्षणिकत्वे मानाभावात् । नन्विदानीं जानामीति वर्तमानक्षणावच्छिन्नतया भासमानं विज्ञानं क्षणान्तरावच्छिन्नविज्ञानाद्यावृत्तं प्रत्यक्षमिति चेन्न । वर्तमानत्वेनानुभूयमाने विज्ञाने विज्ञानान्तराद्भेदस्याप्रत्यक्षत्वात् । न चातिसादृश्याद्विज्ञानानां भेदो न स्पष्टमवभासते दीपज्वालानामिवेति वाच्यम् । भेदासिद्ध्या सादृश्यासिद्धेः । तथा हि । किं विज्ञाने विज्ञानान्तराद्भेदो धर्म्यतिरिक्तो वा धर्मिरूपो वा ? आद्येऽपि भेदः किं विज्ञानान्तरग्राह्य उत धर्मिज्ञानग्राह्यः ? नाद्यः । धर्मिप्रतियोगिरूपविज्ञानयोर्भेदग्राहिविज्ञानान्तरग्राह्यत्वापातात् । तथा च स्वप्रकाशत्वभङ्गः तयोर्ग्राहकज्ञाने कल्पितत्वमभिन्नत्वं च स्यात् । ज्ञाने ज्ञेयस्य कल्पितत्वाभिन्नत्वयोस्त्वयाङ्गीकाराच्च तथा च कस्य कुतो भेदग्रहः । न द्वितीयः । स्वातिरिक्तस्य ग्राह्यत्वानङ्गीकारात् । नाऽपि धर्मिरूपः । सादृश्यात्तस्याभाने विज्ञानस्वरूपमेव न भासते इत्युक्तं स्याच्च तथा च जगदान्ध्यप्रसङ्गः । अपि च सोऽहमित्यालयविज्ञानैक्यप्रत्यभिज्ञाविरोधान्न सादृश्यं कल्पयितुं न च सादृश्यादियं भ्रान्तिरिति वाच्यम् । भ्रान्तित्वे ज्ञाते भ्रान्तिहेतुत्वेन सादृश्यज्ञानं भिन्नयोरैक्यभ्रमे सादृश्यस्य हेतुत्वात् । एवं सादृश्ये ज्ञाते तेन तिरोहितभेदनिश्चयादैक्यप्रत्यभिज्ञाभ्रान्तित्वज्ञानमित्यन्योन्याश्रयात् । न हि गोसदृशो गवय इतिवद्विज्ञानानां सादृश्यं प्रत्यक्षं येनान्योन्याश्रयो न भवेत् । तस्मात् ज्ञानानां स्वतः प्रामाण्याद्बाधकानुपलम्भाच्च प्रत्यभिज्ञा प्रमेति न क्षणिकत्वमित्याह—

संविद्विषययोरैक्ये बौद्धवादो भवेदिति ।
आशङ्क्यैक्यं निरस्तं च तथा क्षणिकता तयोः ॥ इति ।

ननु केयं प्रत्यभिज्ञा नाम ? ननु पूर्वानुभवसंस्कारसहितादिदानीन्तनकारणाज्जातं पूर्वापरकालद्वयोपलक्षितं वस्तुगोचरमेकज्ञानमिति चेन्न । तर्ह्यात्मनि सा सम्भवति स्वप्रकाशात्मरूपानुभवस्य नित्यत्वेन तन्नाशजन्यसंस्काराभावात् । स्वप्रकाशस्यानुभवकारणाभा-

वाच्च । सामग्र्यभावात्सो ऽहमित्यत्र स इत्यहमित्याकारभेदेन विषयभेदात् ज्ञानैक्यासम्भवाच्च । स्वप्रकाशस्याविषयत्वेन विषयाभावाच्च । अतो युक्तिबाधात्प्रत्यभिज्ञाभ्रान्तिरिति चेत् उच्यते । अन्तःकरणविशिष्टात्माहङ्कारस्तस्या विषयः । न च सुषुप्तौ तस्य नाशान्न प्रत्यभिज्ञाविषयत्वमिति वाच्यम् । तदापीतेरिति न्यायेन तदानीमपि सूक्ष्मजड़ांशसत्त्वेनान्तःकरणरूपधर्मिमात्रविशिष्टचैतन्यस्यामोक्षं स्थायित्वात् । अहमाकारवृत्तिनाशजन्यसंस्कारसहितान्तःकरणं तस्याः सामग्रीत्याह—

आत्मनि प्रत्यभिज्ञा या सामग्रीविषयस्थितेः ।
सवासनाधीः सामग्री विषयो ऽहं मनोयुतः ॥

या प्रमेत्यर्थः । तत्र हेतुः सामग्रीति । ननु पूर्वानुभवसंस्कारप्रत्यभिज्ञा एकविषया वाच्या । न ह्यात्मा वृत्त्यवच्छिन्नचैतन्यरूपस्य पूर्वानुभवस्य विषयः जडांशस्यैव तद्विषयत्वात् । तस्मान्न चिदंशस्य प्रत्यभिज्ञाविषयत्वमिति चेन्न । पूर्वानुभवे भासमानस्यैव स्मृताविव प्रत्यभिज्ञायां विषयत्वप्रयोजकत्वात् । भासमानत्वं चानुभवप्रयुक्तः संशयाद्यभाव इत्युक्तम् । जड़विशिष्टत्वेन चिदंशस्याऽपि विषयत्वोपपत्तेश्च । एतेन प्रत्यभिज्ञाविषयत्वमात्मनो व्याख्यातम् । नन्वहङ्कारस्य प्रत्यक्षप्रत्यभिज्ञायां कर्मत्वं कर्तृत्वं च विरुद्धमिति चेन्न । स्वतो ऽनावृत्ताहङ्कारे वृत्तिरूपप्रत्यभिज्ञाकृतातिशयाभावेन कर्मत्वाभावात् । भावे वा चिदंशविशिष्टान्तःकरणत्वेन कर्तृत्वं पूर्वापरकालोपलक्षितजडविशिष्टचिदंशत्वेन विषयत्वमित्यविरोधात् । वृत्त्यवच्छिन्नचैतन्यरूपप्रत्यभिज्ञायां तु चित्प्राधान्येनाश्रयत्वं जडप्राधान्येन विषयत्वमित्यनवद्यम् । यदुक्तमाकारभेदान्न ज्ञानैक्यं तन्न । विज्ञानं क्षणिकमिति विज्ञानस्याकारभेदे ऽप्येकत्वात् अन्यथा ज्ञाने क्षणिकत्ववैशिष्ट्यं न सिध्येत् । विशिष्टज्ञानाभावात् । तच्चैकं प्रत्यभिज्ञानं तत्रांशे संस्कारातिरिक्तहेत्वभावात् स्मृतिरूपं द्रष्टव्यम् । यत्तु प्रत्यभिज्ञाश्रयत्वेनैवात्मनः स्थायित्वमिति प्राभाकरोक्तं तदयुक्तम् । ज्ञानान्यस्य ज्ञानविषयत्वनियमात् । अन्यथा सो ऽहमिति ज्ञानस्य निर्विषयत्वापत्तिः । किञ्च क्षणिकप्रत्यभिज्ञा ह्याश्रयं तत्कालीनं साधयति । न तु तस्य स्थायित्वमनपेक्षितत्वात् । ननु सो ऽहमिति व्यवहारमात्रं, न ज्ञानं न च स्थायित्वासिद्धिः, इदानीन्तनस्मृत्या घटो ऽनुभूत इत्येवंरूपया तद्विषयानुभवेन च पूर्वकालीनेनात्मनस्तदाश्रयत्वे-

न पूर्वापरकालीनत्वसिद्धेरिति चेन्न । स्मृत्यनुभवाभ्यां तत्तत्कालीनात्मसिद्धावप्यैक्यासिद्धेः । न चानुभवस्मृत्योर्भिन्नाश्रयत्वानुपपत्त्याऽऽश्रय आत्मैक इति ज्ञायते इति वाच्यम् । अर्थापत्तिज्ञानस्याप्यात्मविषयत्वायोगात् । तद्विषयत्वे च सर्वजनसिद्धप्रत्यभिज्ञाविषयत्वं दुर्वारमित्यलम् । तस्माद्विज्ञानात्मनः प्रत्यभिज्ञाप्रमया स्थायित्वं सिद्धम् । एवं घटादिविषयस्यापि स्थायित्वम् । यत्तु घटोत्पत्त्यव्यवहितानन्तरक्षणे एतद्घटध्वंसवान् एतदुत्पत्त्यनन्तरत्वात् एतद्ध्वंसक्षणवदित्यनुमानात्क्षणिकत्वमिति, तन्न । एतद्ध्वंसक्षणा एतद्घटवन्तः कालत्वादुत्पत्तिक्षणवदिति प्रत्यनुमानात् । न च ध्वंसानुभवविरोधः । उत्पन्नो घटो ऽनन्तरमस्तीत्यनुभवेन तदनुमानस्यापि बाधितत्वात् । घटस्योत्पत्त्यनन्तरं सर्वसम्मतनाशक्षणात्पूर्वक्षणा एतद्घटाधारा एतद्घटप्रागभावस्य सम्मतध्वंसस्य चानाधारक्षणत्वात् उत्पत्तिक्षणवदित्यनुमाने बाधाभावाच्च । अथ सर्वे भावाः क्षणिकाः अर्थक्रियाकारित्वाद्यतिरेकेण नरशृङ्गवत् । न चाप्रयोजकत्वं, स्थायिनो ऽर्थक्रियाकारित्वासम्भवात् । तथा हि । किं तस्य क्रमेण कार्यकारित्वम्, उत सकृदेव यावत्स्वकार्यकारित्वम् ? नाद्यः । अनेकानि कार्याणि कर्तुं शक्तश्चेद्युगपदेव कुर्यान्निरपेक्षहेतौ सति कार्यक्रमायोगात् । न द्वितीयः । एकस्मिन् क्षणे यावज्जीवकृत्यसमाप्तौ क्षणान्तरे सत्त्वायोगादर्थक्रियाकारित्वरूपत्वात् सत्त्वस्येति । अत्रोच्यते । न तावत्सकृत्कृत्वा तूष्णीम्भूतस्यासत्त्वप्राप्तिः । प्रमाणाबाधितत्वरूपसत्त्वानपायात् । न चार्थक्रियाकारित्वमेव सत्त्वमिति वाच्यम् । तथा हि । किं स्वविषयकज्ञानमर्थक्रिया उत समानजातीयकार्यान्तरम् अथ वा यत्किञ्चित्कार्यान्तरम् ? नाद्यः । स्वप्रकाशसंविदामसत्त्वापातात् । नन्वेकधीसन्तानसंविदां परस्परविषयत्वे ऽपि सर्वज्ञेश्वरसन्तानसंविदं प्रति विषयत्वेन जनकत्वमस्ति, प्रत्यक्षज्ञाने विषयस्य हेतुत्वादिति चेन्न । सर्वज्ञसंविदो ऽसत्त्वापातात् । किञ्च सर्वज्ञविशुद्धसंविदः सोपप्लवजीवसंविद्विषयकत्वे सोपप्लवत्वापत्तिः । ज्ञानस्य त्वन्मते ज्ञेयाभेदात् । न च सर्वज्ञसंवित् जीवस्य शोकाद्युपप्लवान्विहाय ज्ञानमात्रं विषयीकरोतीति वाच्यम् । ज्ञानाभिन्नोपप्लवविषयताया दुर्वारत्वात् । उपप्लवाज्ञाने तन्निवृत्त्युपायोपदेष्टृत्वायोगाच्च । न द्वितीयः । चरमक्षणस्यासत्त्वप्रसङ्गात् । तथा हि । सांसारिकज्ञानानि स्थायित्वादिभिरुपप्लवैरुपेतानि हेतुहेतुमद्भावेन स-

न्तन्यमानानि भवन्ति। तत्र सर्वं क्षणिकमिति सर्वं स्वलक्षणं शुद्धमिति सर्वं दुःखमिति सर्वं शून्यमिति चतुर्विधभावनाभिः क्रमेण स्थायित्वं नामजात्यादिसम्बन्धः शोकफलकप्रवृत्तिहेतुरागादिः विज्ञानानां सविषयत्वं चेति चतुर्विधा उपप्लवाः क्षीयन्ते। ततो निरुपप्लवो विशुद्धविज्ञानरूपस्तत्त्वबोधापरनामा चरमक्षण उपजायते। तस्य कार्यान्तराभावाच्चरमत्वमिति परस्य मतम्। तथा चार्थक्रियाशून्यत्वात्तस्यासत्त्वप्रसङ्गः। ततः पूर्वविज्ञानस्यापि कार्यासत्त्वादसत्त्वमिति क्रमेण सर्वमसदेव मन्दबुद्धेर्बोधस्य प्राप्नोति। एतेन तृतीयः कल्पो निरस्तः। न च चरमक्षणोऽपि सर्वज्ञविज्ञानं विशुद्धत्वेन सजातीयं जनयतीति वाच्यम्। सर्वज्ञसन्तानस्थपूर्वक्षणादेव निरपेक्षात्तदुत्पत्तेरस्याजनकत्वात्। न च विषयतया सोऽपि जनक इति वाच्यम्। चरमत्वव्याघातात् सन्तानविच्छेदात्मकमुक्त्यभावप्रसङ्गाच्च। न च संसारसन्तानापेक्षया चरमत्वं सर्वज्ञसन्तानैक्यरूपमुक्तिश्चेति वाच्यम्। विषयविषयिणोरेकसन्तानत्वायोगात्। तुल्ययोः प्रदीपयोरिव विषयविषयिभावासम्भवाच्च। स्वप्रकाशसंविद्भेदे मानाभावाच्च। तस्मान्नार्थक्रियाकारित्वं सत्त्वं; किं तु बाधाभावोपलक्षितस्वरूपत्वमित्यर्थक्रियाशून्यस्यापि सत्त्वमुपपन्नम्। यदुक्तं स्थायिनः क्रमकारित्वायोग इति तन्न। सहकारिसन्निधिक्रमात्कार्यक्रमोपपत्तेः। ननु शक्तस्यान्यापेक्षा न युक्ता। अशक्तत्वे तु सुतरां न युक्तेति चेन्न। शक्तस्यैव मृदादेः प्रधानकारणस्य दण्डचक्रादिसहकार्यपेक्षानुभवादित्याह सार्द्धेन—

न कार्यकारिता सत्ता किन्त्वबाधस्वरूपता।
स्थायिनः क्रमकारित्वं सहकारिक्रमाद्भवेत्॥
शक्तस्याऽपि सहापेक्षा त्वन्वयव्यतिरेकत इति॥

न चात्रैव मृद्घटं प्रति शक्तसामग्रीक्षणसिद्धये सहकारिणमपेक्षते इति वाच्यम्। सामग्र्यां मृदः शक्तत्वेऽन्यापेक्षा न युक्ता अशक्तत्वे तु न सुतरामिति त्वदुक्तदोषानपायात्। तस्मादन्वयव्यतिरेकाभ्यां कार्यकारणभावमभ्युपगच्छता प्रधानकारणस्य शक्तस्येव सहकार्यपेक्षा ऽन्वयव्यतिरेकानुभवबलादभ्युपेया। ननूपकारादर्शनात्सहकारिष्वपेक्षा न युक्ता। न चाङ्कुरे शक्तस्य बीजस्य जलादिभिरुच्छूनत्वरूपो विशेष उपकारो दृष्ट इति वाच्यम्। तं विशेषं यदि जलादयो बीजे विशेषान्तरं कृत्वा कुर्युस्तदा विशेषानवस्थाप्रसङ्गात्।

यदि विशेषान्तरमकृत्वैव निर्विशेषे बीजे विशेषाख्यं कार्यं कुर्युस्तर्ह्य-स्मिन्कार्ये बीजस्य स्वस्मिन्ननुपकारकेषु तेषु अपेक्षा न युक्ता किन्तु कार्यमेव स्वजनकत्वेन तानपेक्षते इति चेत्तर्हि स्थायिकारणाज्जा-यमानं कार्यमेव सहकारिसन्निधिमपेक्ष्य क्रमेण जायतामिति तुल्यम् । नन्वस्त्यत्र वैषम्यम् । क्षणिको भावः स्वसमकालैः क्षणिकैः सहकारिभिरुत्तरकार्यक्षणं जनयति । सोऽपि तथा कार्यान्तरमिति का-र्यक्रमः क्षणिकवादे युज्यते । स्थायिवादे तु प्रधानहेतोः सहकारिणां च स्थायित्वेन तत्कृतसन्निधेरपि सदा सत्त्वात्तत्कार्याणां सदा ज-न्मप्रसङ्गे नक्रमो न युज्यते इति । मैवं विषमं मंस्थाः । साम्यस्य सत्त्वात् । तथा हि । न तावत्त्वन्मते व्यक्त्योः कार्यकारणताग्रहः सम्भवति । क्षणिकयोरन्वयव्यतिरेकबुद्धिक्षणद्वयस्थित्यभावात् । न चान्वयमात्रात्कारणताग्रहः । पूर्ववर्तिमात्रस्य सर्वस्य हेतुतापत्तेः । तथा च धूमार्थिनः कारणविशेषाज्ञानाद्वह्नौ प्रवृत्तिर्न स्यात् । तस्माद्वि-ज्ञानात्मसन्तानो द्रष्टा धूमाग्निसन्तानयोर्धूमत्वादिसामान्येनान्वयव्य-तिरेकाभ्यां हेतुतां गृहीत्वा प्रवर्तते इति वक्तव्यम् । तत्राप्यग्निसन्तानम-त्तदङ्गारावस्थायां धूमानुपपत्तेः । काष्ठस्वलक्षणसन्तानः सहकार्यभ्यु-पेयः । तथा चाग्निकाष्ठसन्तानयोर्नित्यत्वेन तत्संयोगस्य नित्यत्वात्तव सदा धूमजन्मप्रसङ्गः । यदि संयोजकसन्तानकृतः संयोगो न नित्य इत्युच्यते तर्ह्यस्मिन्मते स्थायिहेतुसहकारिसन्निधेः कादाचित्क-त्वात् क्रमेण कार्यक्रम इति तुल्यम् । इयान्विशेषः । सन्तानातिरिक्त-सन्तानाभावात्तव कार्यकारणताग्रहो दुर्लभः । प्रत्यभिज्ञाबाधश्चा-ऽतिदारुणो न स्थायिवादिनामित्यलमतिप्रसङ्गेन । एवमनाद्यनन्ताद्वि-तीयसंविदोऽन्येऽर्थक्रियासमर्थाः स्थायिनोऽर्थाः सन्तीत्यङ्गीकारान्न सर्वक्षणिकत्ववादिना वेदबाह्येन वैदिकशिरोमणीनां वेदान्तिनां सि-द्धान्तसाङ्कर्यम् । यदि पुनः संविदभेदेनार्थापरोक्षोक्तिमात्रेण वेदान्तिनां बौद्धसाम्यं तदा सर्ववादिनां बाह्यसिद्धान्तसाङ्कर्यं स्यादित्याह—

यत्किञ्चिद्बौद्धसाम्यं चेत्सर्वसिद्धान्तसङ्कर इति ।

मन्त्रार्थवादेतिहासपुराणानां स्वार्थे प्रामाण्यानङ्गीकाराद्विग्रह-वद्देवतेश्वरप्रसिद्धस्वर्गलोकवेदान्तसिद्धतत्त्वानामनङ्गीकाराच्च लौ-कायतबौद्धसाम्यं प्राभाकरस्य भेदाभेदाभ्युपगमाच्च वार्तिककार-स्य क्षपणकसाम्यं च परिमाणभेदेन द्रव्यस्य क्षणे क्षणे नाशं वद-न्तस्तार्किका वैनाशिकतनया एव । बन्धमोक्षादीनां साङ्कर्यं भेदा-

भेदाभ्यां वदतः सर्वसङ्करवादिनः क्षपणकांशपरिणतत्वं स्फुटमेव। एतेन विज्ञाने परिकल्पितत्वं पदार्थानां बौद्धवेदान्तिनोस्तुल्यमिति प्रलापोऽपि कस्य चिन्निरस्तः। विज्ञाने प्रतिभास्यत्वं वदतस्तस्याऽपि बौद्धतुल्यत्वापत्तेः। तस्मात्कल्पितमत्यन्तासदिति वदता बौद्धेन वेदान्तिनां कल्पितस्यासद्वैलक्षण्यं यथानुभवं कार्यकारित्वं स्थायित्वं च वदतां साम्यं ब्रुवाणो विवेकिभिः संप्रदायशून्यः परमहंसप्रद्वेषीत्युपेक्षणीयः। एवमुक्ता तावदपरोक्षविषयव्यवस्था। परोक्षे तु विषयस्य वर्तमानत्वानियमेन वृत्तिं प्रति कारकत्वाभावान्न स्वावच्छिन्नचैतन्यव्यञ्जकत्वं कर्मकारकस्यैव वृत्तिसंसृष्टस्यावरणनिवृत्तिरूपाभिव्यक्तिहेतुत्वात्। तस्मादभिव्यक्तचैतन्यतादात्म्यरूपं फलव्याप्यत्वाख्यमपरोक्षत्वमनुमेयादेर्नास्तीत्याह—

परोक्षे वृत्त्यसम्बन्धान्नापरोक्ष्यमिति स्थितिरिति।

वृत्तिविषयत्वं तु वृत्त्याकारतया विद्यते। न चासाधारणसम्बन्धाभावे कथं कश्चिदेव वन्ह्यादिरनुमितावाकारो नान्य इति व्यवस्थेति वाच्यम्। अभावासम्बद्धस्यापि घटस्य तन्निरूपकत्वबद्वन्ह्यादेरनुमितिनिरूपकत्वरूपाकारत्वसम्भवात्। या ऽनुमितिर्यद्याप्यत्वज्ञानजन्या सा तदाकारेति व्यवस्थोपपत्तेश्च। एवं शक्तिसादृश्यादिसम्बन्धमहिम्नोपमित्यादेर्विषयव्यवस्था ज्ञेया। वस्तुतस्त्वविद्यैवासम्भावितावभासनचतुरा वृत्त्यवच्छिन्ने साक्षिणि विषयावच्छिन्नचैतन्ये च दण्डायमानतया स्थिता सती तयोर्विषयविषयिभावं घटयतीति मायावादे न क्वाऽप्यनुपपत्तिः। सा चावस्था ज्ञानाख्या विद्यासाक्ष्यात्मस्थत्वेन वन्ह्यादिव्यवहारप्रतिबन्धिका सुषुप्तिरित्युच्यते। विषयावच्छिन्नचैतन्यस्थत्वेन संशयभ्रमादिहेतुरिति स्थितिः। तन्न। परोक्षवृत्त्या ऽप्यात्मस्थाज्ञानांशो नश्यति। तदुक्तम्। अनुमेयेषु सुषुप्तिव्यावृत्तिरिति। तथा च विषयावच्छिन्नचैतन्यावरकाज्ञानांशसत्त्वे ऽपि तदाकारवृत्त्यवच्छिन्नसाक्षिणा ज्ञानांशनाशवता वस्तुत एवाभिन्नचैतन्यद्वारा विषयस्य सम्बन्धाद्वह्निं जानामीत्यादिव्यवहारो युज्यते। वृत्तिनिर्गमनाभावेनावरणानिवृत्तेर्विषयस्याऽऽपरोक्ष्याभावश्चेत्यनवद्यम्। एवमन्तःकरणोपाधिना परोक्षापरोक्षविषयप्रमातृत्वमसङ्गचिदात्मन उपपन्नम्। तत्पूर्वकं च कर्तृत्वादिकमहमित्यनुभवे भासमानात्मन्यध्यस्तमिति सविकल्पकाधिष्ठाने सविकल्पकाध्यासस्य सम्भवो दर्शितः अस्मत्प्रत्ययविषयत्वादिति भाष्येण। वस्तुतस्तु निर्विक-

ल्पकेऽपि स्वप्रकाशत्वेनाऽपरोक्षे चिदात्मन्यहङ्कारादिसविकल्पकाध्यासः सम्भवति। अपरोक्षत्वं चात्मनः पुनः सर्वलोकानुभवसिद्धम । न च स्वप्रकाशत्वं विना तत्सम्भवति। न च घटादिकर्मकस्वप्रकाशसंविदाश्रयत्वेनात्मनो ऽपरोक्षत्वं सम्भवतीति वाच्यम् । संविदो ऽन्यस्य संवित्कर्मत्वं विना ऽपरोक्षत्वायोगात् । न च संवित्कर्मत्वेनात्मत्वापत्तिः । संविदन्यत्वे ऽपि तदापत्तेरपरिहारात् । अस्तु ज्ञानकर्मत्वेनापरोक्षत्वमिति चेन्न । कर्तृकर्मत्वविरोधात् । किञ्च घटानुभवकाले तदाश्रयात्मानुभवो ऽस्ति न वा? न चेन्मया ऽनुभूतो घट इत्यात्मानुभवयोः सम्बन्धज्ञानं न स्यात्। सम्बन्धिज्ञानाभावात्। न च पश्चादात्मनि ज्ञाते अनुभवसम्बन्धज्ञानमिति वाच्यम् । अनुभवस्य नष्टत्वेन तत्सम्बन्धप्रत्यक्षायोगात् । घटानुभवकाले ऽनुभवस्य स्वात्मसम्बन्धाऽनिश्चये घटो मया परेण वा ऽनुभूत इत्यग्रे संशयापत्तेश्च । अथ तत्काले स्वात्मानुभवो ऽस्तीति चेन्न। युगपदात्माऽनात्मज्ञानद्वयानुपपत्तेः। शालग्रामादिध्यानकाले ध्यानतदाश्रययोर्ज्ञानासम्भवाच्च । तज्ज्ञाने ध्यानविच्छेदादज्ञाने च मया ध्यातमिति स्मरणावशिष्टव्यवहारयोरसम्भवः । तस्माद्ध्यातृध्यानध्येयसाक्ष्यात्मा स्वप्रकाशत्वेनैवाऽपरोक्ष इति युक्तस्तत्रापरोक्षाहङ्काराध्यास इत्याह —

आत्मनस्त्वपरोक्षत्वं स्वयं भात्वान्न चान्यथा । इति ।

यत्त्वपरोक्षाध्यासे ऽधिष्ठानारोप्ययोरेकेन्द्रियग्राह्यत्वनियमादिन्द्रियाग्राह्यात्मनि प्रत्यक्षाध्यासो न सम्भवतीति,तन्न। अचाक्षुषे ऽप्याकाशे प्रत्यक्षनैष्फल्याद्यध्यासदर्शनान्नियमासिद्धेः।नन्वाकाशज्ञानं कथमिति चेदुच्यते। शब्दलिङ्गात्तस्यानुमितिरिति कणभक्षात्पादपक्षपातिनः। मूर्तद्रव्यानुपलब्धिलिङ्गानुमेयो मूर्ताभाव आकाश इति बौद्धा लौकायताश्च । भावरूप एवाकाशो मूर्ताभावत्वेनोक्तलिङ्गानुमेय इति प्राभाकराः । चाक्षुष इति क्षपणका भाट्टाश्चाहुस्तन्न । नीरूपद्रव्यस्य चाक्षुषत्वायोगात् । नाप्यभाव आकाशः शब्दगुणत्वेन श्रुतिस्मृत्यादिषु द्रव्यत्वावगमात् । सिद्धान्ते तु के चिच्छब्दलिङ्गानुमेयत्वमिच्छन्ति। अन्ये तु लिङ्गज्ञानं विनैव चक्षुर्व्यापारान्वयव्यतिरेकाभ्यामालोकवृत्त्यभिव्यक्तचैतन्याभेदेन साक्षिवेद्यत्वमाहुरित्याह —

अक्षाग्राह्यमपि व्योम साक्षिवेद्यमितीरितम् । इति ।

तस्मादात्मन्यध्यासः सम्भवतीति सिद्धम् । एवं कर्तृत्वाद्यनर्थ-

स्याध्यस्तत्वान्निवृत्तिः फलं सिध्यति। तथा च भाष्यम्। यत्र यदध्यासस्तत्कृतेन गुणेन दोषेण वा ऽणुमात्रेणाऽपि स न सम्बध्यते इति।

इत्यमध्यासस्य लक्षणसम्भावने कथिते अधुना प्रमाणमुच्यते। साक्षिप्रत्यक्षं तावदहंममाध्यासे प्रमाणम्। अनुमानमपि। तथा हि। देहेन्द्रियादिष्वहंममाभिमाने सति लौकिकशास्त्रीयसर्वव्यवहारः अभिमानाभावे सुषुप्तौ व्यवहाराभाव इत्यविवादम्। तथा च व्यवहारो ऽभिमानजन्यः तदन्वयाद्यनुविधायित्वात्। यदित्थं तत्तथा यथा दण्डजन्यो घट इति। यद्वा देवदत्तस्य जाग्रत्स्वप्नकालौ देवदत्तस्य देहादिष्वभिमानवन्तौ देवदत्तस्य व्यवहारकालत्वात् व्यतिरेकेण तस्य सुषुप्तिकालवत्। देवदत्तसुषुप्तावन्येषां जाग्रत्काले बाधनिरासाय पक्षे देवदत्तस्येति, यज्ञदत्तस्याध्यासेन शुक्तिरूप्याध्यासेन चार्यान्तरतानिरासाय देवदत्तस्य देहादिष्विति क्रमेण पदद्वयम्। अन्यव्यवहारकाले देवदत्तसुषुप्तौ व्यभिचारवारणाय हेतौ देवदत्तस्येति। न च साध्याप्रसिद्धिः प्रत्यक्षत्वात्। न चानुमानस्य व्यर्थता अभ्युच्चयार्थत्वात्। यो यस्य व्यवहारकालः स तस्याभिमानवान्यथा व्याघ्रभीतयज्ञदत्तपलायनव्यवहारकाल इति अन्वयव्यतिरेकी वा ऽस्तु। एवं प्रमातृप्रमाणादिव्यवहारानुपपत्तिरप्यध्यासे प्रमाणम्। केवलासङ्गात्मनो जडान्तःकरणमात्रस्य वा प्रमाश्रयत्वायोगात्। अतो जडतादात्म्याध्यासरूपाविद्यावानेवात्मावृत्तीद्धबोधात्मकप्रमाश्रयः प्रमातेति व्यवह्रियते। तत्कारणानि प्रमाणानीत्युच्यन्ते। तदाह भगवान् भाष्यकारः। अविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति। यत्तु देहादेरात्मना स्वस्वामित्वस्वेच्छानुविधायित्वस्वभोग्यत्वादिसम्बन्धेनैव व्यवहारोपपत्तेः किं तादात्म्याध्यासेनेति; तन्न। असङ्गचिदात्मनः स्वामित्वादेरध्यासं विना ऽनुपपत्तेः। ननु स्ववंशशरीरव्यापिजीवात्मनः कथं शरीरविशेषे ऽध्यासनियम? इति चेदुच्यते। एकजीववादे तावत् नाऽयं नियमो ऽस्ति। एकस्यैव सर्वदेहाभिमानित्वात्। मनोभेदेन प्रमातृभेदान्न प्रमातृत्वादिसाङ्कर्यम्। नानाजीववादे तु यदाविद्योपाधिको यो जीवस्तदविद्याकार्यलिङ्गशरीरे एव तस्याभिमानः। यल्लिङ्गतादात्म्याभिमानी यस्तस्य तल्लिङ्गस्थकर्मारब्धे तल्लिङ्गसंसृष्टे श्लिष्टो स्थूलशरीरे ऽभिमान इति नियम इति। नन्वविद्यावदाश्रयत्वे प्रमाणानां प्रमाण्यं विरुद्धम्, आश्रयगताविद्यादोषादप्रमाण्यापातादिति चेत् उच्यते। अबाधितार्थकत्वं हि प्रामाण्यम्

तच्चाविद्यावदाश्रयत्वे ऽप्यविरुद्धम्। तत्र वेदान्तानां बाधायोग्यब्रह्मार्थकत्वात्तत्त्वावेदकत्वलक्षणं प्रामाण्यम्। प्रत्यक्षादीनां तु व्यवहारसमर्थवस्तुबोधित्वाद्व्यावहारिकं प्रामाण्यं व्यवहारकाले प्रपञ्चनाशकबाधाभावाच्च। नन्वाश्रयदोषजन्यत्वेनाप्रामाण्यापत्तिरित्युक्तमिति चेदुच्यते। वस्तुतत्त्वबोधके प्रमाणे सति तत्त्वावभासप्रतिबद्ध्यभ्रान्तिप्रयोजको दोष इत्युच्यते। यथा काचादिः। अन्तःकरणाध्यासस्तु न क्वापि दोषः प्रमातृत्वेन ज्ञानसामान्यकारणत्वात् अविद्याध्यासस्तु साक्षिचैतन्येन स्वाभिन्नाद्वितीयपूर्णानन्दब्रह्मावभासं प्रति प्रतिबद्ध्याहङ्कारादिप्रपञ्चभ्रान्तिप्रयोजकत्वाच्चैतन्यरूपप्रमाणापेक्षया दोष इत्युक्तं विद्यते एवमाप्यग्रहणाविद्यात्मको दोष इत्यत्र टीकायां नत्वियं चैतन्याद्भिन्नवेदान्तजब्रह्मावभासं प्रति दोषः। प्रमात्रादिद्वारा ब्रह्मप्रमाहेतुत्वात्। चक्षुरादिभिः प्रपञ्चज्ञाने तु भवत्येवाऽयं दोषः। परं तु नैसर्गिकदोषजन्यत्वाद्व्यवहारकाले न भ्रान्तित्वव्यवहारः। तस्माद्विद्यावदाश्रयाणि प्रमाणानीत्यनवद्यम्। ननु व्यवहारानुपपत्तिरध्यासे न प्रमाणं विवेकिव्यवहारस्याध्यासं विनाऽपि दर्शनेनानुपपत्त्यभावादिति चेन्न। विवेकिव्यवहारो ऽध्यासमूलः व्यवहारत्वात् पश्वादिव्यवहारवदित्यनुमानात्पश्वादीनां च स्वप्रकाशात्मानात्मवस्तुद्वयाज्ञानवतामाविवेकादध्यासो ऽस्तीति निश्चीयते सामग्र्यसत्त्वात्। न हि तेषामात्मानात्मविवेको ऽस्ति उपदेशं विना विवेकासम्भवात्। नराणां तु विवेके सत्यप्यध्यासविरोध्यपरोक्षज्ञानाभावादध्यासः सम्भवति। देहनिन्दादिना शोकादिदर्शनाच्च। एतेन शास्त्रीये व्यवहारे यागादौ देहान्तरोपभोगफलके देहातिरिक्तात्मनिश्चयं विना बहुवित्तव्ययायाससाध्ये प्रवृत्त्ययोगान्नाध्यासमूलत्वं व्यवहारमात्रस्येति निरस्तम्। देहातिरिक्तात्मनि कर्तरि निश्चिते ऽपि अध्यासविरोधिनिश्चयाभावात्। अत्र लब्धावसरश्चार्वाकः प्रत्यवतिष्ठते। देहातिरिक्तात्मानं विना ऽपि कर्मचोदनाप्रामाण्यमुपपद्यते। तथा हि। स्वर्गकामो यजेतेति चोदनायां कः स्वर्गः? न तावल्लोकविशेषजं सुखं कार्यार्थकचोदनामात्रप्रमाणवादिना सिद्धार्थकमन्त्रार्थवादादीनां स्वार्थे प्रामाण्याभावेन मानाभावात्। अथ सुखमात्रं स्वर्गस्तर्हि तत्फलकचोदना न देहाद्भिन्नमात्मानमपेक्षते। अस्मिन्नेव देहात्मनि सुखसम्भवात्। यत्तु विध्यर्थापूर्वरूपस्थायिकार्यानुपपत्त्यैव देहान्तरभोग्यालौकिकस्वर्गसिद्धौ तद्भोक्तुर्देहाति-

रेकसिद्धिरिति तत्रालौकिकस्वर्गो स्थितेः प्रागनुपपत्त्यभावेनापूर्वस्यानुपस्थितस्य सङ्गतिग्रहासम्भवेन विध्यर्थत्वासिद्धेः। तथा च प्रथममलौकिकस्वर्गोपस्थितिस्ततः क्षणिकयागस्य तद्धेतुत्वानुपपत्तिज्ञानं ततः स्थाय्यपूर्वोपस्थितिः ततः सङ्गतिग्रहस्ततो विधिप्रत्ययेन तज्ज्ञानं तद्बलादलौकिकस्वर्गसिद्धिरिति षट्चक्रकापत्तिः। एतेनान्त्येष्ट्याद्यपूर्वस्य देहस्थत्वानुपपत्त्या तद्भिन्नात्मसिद्धिरिति प्रत्युक्तम्। उक्तरीत्या क्रियातिरिक्तापूर्वासिद्धेः। नाऽपि नित्यनैमित्तिकविधिबलाद्देहाद्भिन्नात्मसिद्धिः निष्फलविधेर्भोक्तृनपेक्षत्वात्। पापनाशादिफलं तु देहमात्रे युज्यते। अत एव न प्रायश्चित्तविधितोऽपि भिन्नात्मसिद्धिः। पापफलभोगायापि न भिन्नात्मापेक्षा अत्रैव दुःखानुभवसम्भवात्। सिद्धार्थकवाक्याप्रामाण्येन नरकलोकासिद्धेरिति। सत्यं नास्त्येवात्रोत्तरं चोदनामात्रप्रमाणवादिनां मीमांसकमन्यानामस्माकं तु सिद्धार्थकमन्त्रार्थवादादेरप्यपौरुषेयत्वेन मानान्तरानपेक्षत्वेन प्रामाण्यात्। तत्सिद्धालौकिकस्वर्गफलकविधिसामर्थ्यादेहातिरिक्तात्मसिद्धिः। सिद्धे वाक्यप्रामाण्यं समन्वयसूत्रे विस्तरेण वक्ष्यते इत्यलं प्रपञ्चेन। तथा चार्थवादैकवाक्यतापन्नचोदनाप्रयुक्तकर्मणि व्यवहारेऽपेक्षित एवाऽतिरिक्तात्मनिश्चयस्तथापि वेदान्तवेद्याशनायाद्यतीताद्वितीयासंसार्यात्मबोधस्य कर्ममूलाध्यासविरोधित्वान्नापेक्षित इत्यध्यासमूलत्वं शास्त्रीयव्यवहारस्याऽविकलम्। तथा ब्राह्मणो यजेतेत्याद्यागमोऽपि ब्राह्मणादिशब्देन देहतादात्म्याध्यासवन्तमधिकारिणं तमनुवदन्नध्यासे प्रमाणम्।

अधुना प्रमाणसिद्धोऽध्यासो विभज्यते। तत्र शुद्धचैतन्येऽनादिरज्ञानाध्यासः। तद्वति चैतन्ये जीवाख्ये मनस्तद्धर्मकामादीनामध्यासः। मनोवच्छिन्नचैतन्ये देहतद्धर्मकार्श्यादीनामिन्द्रियधर्मकाणत्वादीनां चाध्यासः। देहावच्छिन्नचैतन्ये पुत्रादीनां वृद्धिहानिज्ञाननिमित्तकः साकल्यवैकल्याध्यास इति विभाग इत्यभिप्रेत्याह—

प्रत्यक्षमनुमानं चाप्यर्थापत्तिस्तथागमः।
मानान्यध्याससत्तायां स विभज्य प्रदर्शित इति॥

यत्तु कामादय आत्मधर्मा एव न तेषामध्यास इति, तन्न। अखण्डकूटस्थात्मनः कामादिपरिणामित्वायोगात्। मनसि सत्येव कामादीनां भावादसति च सुषुप्तावभावात्। कामः सङ्कल्प इत्यादिश्रुतेश्च मन एव कामादिधर्मि तत्तादात्म्यादात्मनि कामादीनाम-

ध्यासः । यद्यपि साक्ष्यात्मतादात्म्यं विना कामादीनामपरोक्षत्वायोगात्तादात्म्यमस्ति तथा ऽप्यहं काम इति तादात्म्येन भानं न भवति। किन्तु सत्यपि तादात्म्ये रूपी घट इतिवदहङ्कारे ऽपि अनादिवासनया सम्बन्धित्वेनैवाध्यासः । तत्रैक्यकल्पितभेदांशद्वयरूपे तादात्म्ये भेदांशमात्रभानमिति यावत् । एवमहमिति चिदचितोरैक्यमात्रभानं द्रष्टव्यम् । तच्च कामादिधर्मि मनो मध्यमपरिमाणं साक्षिप्रत्यक्षवेद्यं च। "अगमन्मे मनो ऽन्यत्र सांप्रतं च स्थिरीकृतम् । दुःखितं हृष्टमित्येवं स्वापरोक्षानुभूतितः" । तार्किकास्तु सर्वेन्द्रियेषु स्वस्वाविषयसम्बद्धेषु युगपत् ज्ञानानुत्पत्त्यन्यथानुपपत्त्या क्रमेणेन्द्रियसंयोगशाल्यणु मनः सिध्यतीत्याहुस्तन्न। समनस्कचक्षुःसन्निकृष्टे घटे युगपदनेकज्ञानप्रसङ्गात् । न च मनसः क्रमज्ञानजननसामर्थ्यं कल्प्यते इति वाच्यम् । ज्ञानकर्तृव्यतिरिक्तं मनस्तस्य क्रमेणेन्द्रियसंयोगायाणुत्वं क्रमसामर्थ्यमित्यनेककल्पनागौरवात् । अतो लाघवात्तानकर्तृयैव क्रमसामर्थ्यमात्रं कल्प्यमित्यनन्यथासिद्धानुपपत्त्या न कर्त्रतिरिक्तमनःसिद्धिः । तस्मात्साक्षिवेद्यं मन इति सिद्धमित्याह ।

मनः कामादिधर्मं स्यात्साक्षिप्रत्यक्षमेव चेति ॥

एवं प्रत्यगात्मन्यहङ्कारादीनां स्वरूपतः संसर्गतश्चाध्यास उक्तः। आत्मनो ऽप्यहङ्कारादिषु संसर्गतो ऽध्यासो वाच्यः। अनध्यस्तस्य भ्रमे भानायोगात् । रजतभ्रमे तादात्म्यसम्बन्धेन रजते ऽध्यस्ताधिष्ठानसामान्यस्य भानादनध्यस्तशुक्तित्वस्याभानादहमुपलभे इत्यहङ्कारे चैतन्यभानात्संसर्गाध्याससिद्धिः । नन्वात्मनश्चैतन्यरूपविशेषभाने कथमध्यास इति चेन्न। विशेषस्यात्मन्यभानात् । जडाहङ्कारादौ तद्भानं त्वध्यास एव । वस्तुतस्तु पूर्णानन्दब्रह्मत्वमेव विशेषः । चैतन्यं तु शुक्तेरिदंत्ववत्सामान्यमिति मन्तव्यम् । चैतन्यस्य स्वरूपाध्यासानङ्गीकारात् न शून्यतापातः । तत्र चिदात्मनो ऽन्तःकरणे ऽध्यासस्तदुपहितस्य तत्संसृष्टे देहे ऽध्यासः मनोविशिष्टस्य देहे ऽध्यासे चार्वाकस्य देह आत्मेति भ्रमायोगात्। आत्मतादात्म्यं ह्यनात्मनि अहङ्कारे वादिनामात्मभ्रमहेतुः कल्पः । विशिष्टस्त्वनात्मेत्युपहित आत्मैव देहे ऽध्यस्यते इति देहात्मत्वभ्रमो युक्तः । एवमन्योन्याध्यासः कर्तृत्वादिसर्वानर्थहेतुः सिद्धस्तस्य हेतुरनाद्यविद्येत्युक्तं पुरस्तात्तस्यास्तत्त्वमस्यादिवाक्योत्थापरोक्षतत्त्वज्ञानात्तन्निवृत्तौ सर्वानर्थनिवृत्तिरात्यन्तिकी प्रयोजनमस्य शास्त्रस्य सिद्ध भवति । नन्वनादिभावस्य कथं

निवृत्तिरिति चेदनादिप्रागभावस्येव। निवर्तकसन्निपाते सति अनादिभावस्याऽपि निवृत्तिरिति ब्रूमः। अतो ऽन्यदार्तं यदल्पं तन्मर्त्यमिति सद्विलक्षणस्य सर्वस्य नाशश्रवणात्। नन्वनर्थनिवृत्तिवदानन्दावाप्तिरपि फलं श्रुतं तरति शोकमात्मवित् ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः। पूर्णानन्दात्मकं ब्रह्म भवतीत्यर्थः। तत्कथं भाष्ये तस्यानर्थहतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते इत्यत्रानर्थनिवृत्तिमात्रं फलमुक्तमिति। उच्यते। आत्मन आनन्दरूपब्रह्मैक्यं विषय इत्युक्तावर्थादभिव्यक्तानन्दः फलमित्युक्तं भवति। अनर्थनिवृत्तिस्तु तत्त्वज्ञानान्नान्तरीयकतया जायमाना शास्त्रविषयाऽभिन्नेति मत्वा पृथगुक्तेत्याह—

एवमध्याससंसिद्धौ तन्निवृत्तिः प्रयोजनम्।
विषयश्चापि शास्त्रस्य ब्रह्मात्मैक्यं सुखं भवेदिति॥

नन्वस्थूलादिवाक्यैः प्रपञ्चाभावरूपं ब्रह्म प्रतिपाद्यते तदैक्यं तत्त्वमस्यादिशास्त्रविषय इति कथं निवृत्तिर्विषयाद्भिन्नेति? सत्यम्। प्रपञ्चात्यन्ताभावः शास्त्रविषयः। ब्रह्माभेदान्नतु निवृत्तिर्ब्रह्माभिन्ना प्रपञ्चसमानकालीनस्य ब्रह्मणस्तन्निवृत्तित्वायोगात्। ध्वंसस्य प्रतियोगिभिन्नकालत्वादिति मतेन विनिवृत्तेर्विषयात्पृथङ्निर्देशः। भवतु कल्पितस्याभावः सर्वो ऽप्यधिष्ठानमेवेति मते नेत्यनवद्यम्। सा चानन्दावाप्तिप्रतिबन्धकाभावत्वेन पुरुषार्थः। आनन्दावाप्तिस्तु मुख्यं फलमित्यन्ये। ननु प्रपञ्चाभावत्वेन ब्रह्मनिषेधवाक्यैः प्रमातुमशक्यम्। सप्रपञ्चत्वानुभवविरोधादिति चेन्न तावत्प्रत्यक्षेण सप्रपञ्चं ब्रह्मेत्यनुभवः सम्भवति ब्रह्मणो ऽतीन्द्रियत्वात्। नाप्यनुमानेन तस्य कारणमात्रगोचरत्वान्न चागमः सप्रपञ्चपरः कश्चिदस्ति। इदं सर्वं यदयमात्मेति वाक्यं तु ब्रह्मण उपादानत्वश्रुतिसामर्थ्यप्राप्तसर्वात्मत्वं नेति नेतीति निषेधायानुवदति। न प्रतिपादयति यच्छब्दयोगात्। द्वैतप्रतिपादने फलाभावादनर्थदर्शनाच्च। द्वैताभावे सुषुप्तौ सुखदर्शनात्। "अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते"। इति निषेधज्ञानान्मुक्तिश्रवणाच्च निषेधवाक्यं फलवदज्ञातार्थत्वाद्बलवदिति निष्प्रपञ्चमेव ब्रह्मेत्याह—

ब्रह्म तन्निष्प्रपञ्चं स्यान्निषेधबलवत्त्वत इति॥

सृष्टिवाक्यं तु न मुख्यतः सप्रपञ्चतां बोधयति। किं त्वन्यत्र प्र-

पञ्चसत्ताभ्रान्तिनिरासार्थं ब्रह्मोपादानकत्वमुक्त्वा तत्र निषेधेनाद्वितीयं ब्रह्म प्रतिपादयति । अर्थात्प्राप्तं सप्रपञ्चत्वमुपासनार्थमनुवदत्सर्वकर्मा सर्वकामः सर्वगन्ध इत्यादिवाक्यमप्यनन्यशेषनिषेधवाक्यविरोधान्न तत्परम् । एवं जीवोऽपि कर्तृत्वादिसंसारशून्य एव । न चाऽनुभवविरोधः । इच्छाकृतिदुःखादिग्राहकप्रमाणाभावेनानुभवस्य भ्रमत्वात् । मनसस्तदुपादानत्वेनाप्रमाणत्वात् । यत्तु दुःखादीनां स्वसत्तायां प्रकाशाव्यभिचारात्स्वप्रकाशत्वमिति बौद्धैः प्राभाकरैश्चोक्तं तन्न । ज्ञानान्यस्य घटवदस्वप्रकाशत्वात्स्वप्रकाशत्वस्यैकात्मवृत्तित्वे लाघवाच्च । तस्माच्छुक्तिरूपादिवत्साक्षिवेद्यः कर्तृत्वादिसंसार इति । वस्तुतोऽसंसार्येव जीव इति निष्प्रपञ्चब्रह्मैक्यमेवाबाधितं शास्त्रस्य विषय इति सिद्धमित्याह—

असंसारी तथा जीवो न दुःखादिः स्वयंप्रभ इति ।

नन्वनर्थनिवृत्तेः शास्त्राविषयत्वे कथं सिद्धिरिति चेदुच्यते । अहं ब्रह्मास्मीति ज्ञानाद्वाक्योत्थादनर्थमूलाज्ञाननिवृत्त्या तज्ज्ञानार्थस्य निवृत्तिर्जायते । शुक्तिज्ञानादिव प्रत्यक्षाद्रजतनिवृत्तिः । सा च प्रतियोग्यनुपलम्भसहकृतेनाधिष्ठानसाक्ष्यनुभवेन ज्ञायते इति नान्तरीयकतया सिद्धाऽनर्थनिवृत्तिः । तथा चाऽधिष्ठानज्ञानादर्थसिद्धरजतनिरासं यथा नेदं रजतमिति वाक्यमनुवदति । यथा वा देवतोद्देशेन द्रव्यत्यागरूपक्रियावाचिना यजतिना क्रियाज्ञानाऽनान्तरीयकतया सिद्धयोर्द्रव्यदेवतयोराज्यविष्ण्वादिशब्दविशेषे नियमार्थमनुवादः । तदुक्तम् । यजतिचोदना द्रव्यदेवताक्रियासमुदाये कृतार्थत्वादिति । यजतिशब्दः शक्त्या क्रियांवदस्तदविनाभूतं द्रव्यं देवतां च बोधयति । त्रयाणां समुदाये ज्ञाते सति आकाङ्क्षाशान्तेरिति सूत्रार्थः । तथानर्थनिवृत्तिं विद्वदनुभवसिद्धां तरति शोकमात्मविदिति वाक्यमनुवदतीति शास्त्रविषयाद्बहिर्भूतानर्थनिवृत्तिरिति मन्वानो भगवान् भाष्यकारस्तां पृथगभाषयत् । अस्याऽनर्थहेतोः प्रहाणायेति मत्वाह—

ज्ञानादनर्थनाशस्तु न श्रुत्यर्थोऽर्थसिद्धित इति ।

नन्वत्र भाष्ये विद्याप्रतिपत्तये इत्यत्र प्रतिपत्तिशब्दार्थः क इति चेत्, उच्यते । अविचारितवेदान्तवाक्याज्जाताया विद्याया अपरोक्षप्रत्यग्ब्रह्मगोचरत्वेनापरोक्षाया अपि चित्तस्यैकाग्र्यवृत्त्ययोग्यतादोषाद्विपरीतभावनादोषाच्चाऽज्ञानावरणनिवृत्तिरूपविषयस्यापरोक्षत्वं

प्रत्यक्षविषयत्वं(१) भवति। यथेदं फलमत्र न सम्भवतीति विषयाऽसम्भावनाबुद्धिदोषादाप्तवाक्योत्थस्य सन्निकृष्टार्द्रमरीचफलज्ञानस्य। तथा च तर्कादिना दोषप्रतिबन्धनिवृत्तौ यत्तत्क्षमत्वं साविद्यायाः स्वविषये प्रतिष्ठाप्रतिपत्तिशब्दार्थ इति। एतेन वेदान्तवाक्यस्य तर्कापेक्षत्वे प्रामाण्यस्य स्वतस्त्वभङ्ग इति प्रत्युक्तम्। न हि वयं वाक्यप्रमाणस्य तर्कापेक्षया प्रमितिहेतुत्वं ब्रूमः। किन्तु तर्केण प्रतिबन्धे निरस्ते निरपेक्षं वाक्यमेवार्थनिश्चायकमिति न स्वतस्त्वहानिः। एतच्च मानानां स्वतस्त्वं प्रथमतन्त्रे निरूपितम्। तथा हि। प्रामाण्यमप्रामाण्यञ्च स्वत इति साङ्ख्याः। तन्न दोषोत्कर्षे भ्रमोत्कर्षदर्शनादप्रामाण्यस्य ज्ञानसामान्यस्य सामग्र्यतिरिक्तदोषप्रयोज्यत्वेनोत्पत्तौ स्वतस्त्वायोगाद्दोषस्य भ्रमाऽहेतुत्वे सर्वज्ञानानाम्भ्रमत्वापातः सामान्यसामग्र्या एव भ्रमहेतुत्वात्। एवं प्रामाण्यस्य ज्ञानग्राहकमात्रग्राह्यत्वे क्वाऽपि निष्कम्पा प्रवृत्तिर्न स्यात्। भ्रान्तप्रवृत्त्युच्छेदश्च। अतो दोषजन्यम्बाधग्राह्यमप्रामाण्यम्परतः॥

एतेनाप्रामाण्यं स्वतः प्रामाण्यम्परत इति सुगतोक्तमपास्तम्। उभयम्परत इति तार्किकास्तन्न। दोषाऽजन्यज्ञानमात्रस्य प्रमात्वदर्शनेन ज्ञानसामान्यहेत्वतिरिक्तहेतुगुणजन्यं ज्ञानम्प्रमेत्यत्र मानाभावात्। जन्यप्रमा न गुणजन्या प्रमात्वात्। ज्ञानत्वाद्वा ईश्वरप्रमावत्सादृश्यादिदोषवद् गुणस्य प्रमामात्रहेतोर्दुर्निरूपत्वाच्च। न तावद्विशेषणसन्निकर्षो गुणः। तस्य जन्यप्रत्यक्षमात्रे साधारणहेतुत्वात्। न च तद्वति तत्सन्निकर्षः प्रमायामेव हेतुरिति वाच्यम्। तस्याऽपि विशेषणसन्निकर्षत्वेन प्रत्यक्षभ्रमसाधारणत्वात्। जन्यप्रत्यक्षत्वेन यावद्विषयसन्निकर्षत्वेन कार्यकारणभावे सम्भवति तद्वति तत्सन्निकर्षत्वेन जन्यविशिष्टप्रत्यक्षप्रमात्वेन कार्यकारणभावान्तरकल्पने गौरवात्। अत एव साध्यवति हेतुज्ञानमनुमितौ गुण इत्यपास्तम्। हेतुज्ञानत्वेनाऽनुमितित्वेन तद्भावे लाघवात्। एवं वक्तृयथार्थज्ञानत्वेन शब्दप्रमाणत्वेन तत्तद्भावदोषाऽजन्यत्वेनैव शब्दप्रामाण्योपपत्तेः। अतो दोषाभावे ज्ञानहेतुमात्रादेव प्रमोत्पत्तिरित्युत्पत्तौ स्वतः प्रमात्वम्। यत्तु दोषाभाव एव प्रमाहेतुर्गुण इति, तन्न। तस्य प्रमायां प्रतिबन्धकाभावत्वेनाऽन्यथासिद्धत्वात्। धर्म्यंशप्रमायां केवलान्वयिधर्मप्रकारकप्रमायाश्च दोषाप्रसिद्ध्या तदभावासम्भवाच्च।

(१) प्रत्यक्षत्वमिति पाठान्तरम्।

न हि तत्र कस्याऽपि भ्रमोऽस्ति । येन तद्धेतुर्दोषः प्रसिद्धः स्यात् । एवं ज्ञानग्रहे तद्विशेष्ये प्रकारवत्तारूपप्रामाण्यस्य ग्रहात् ज्ञप्तौ स्वतस्त्वम् । न हि निर्विषयज्ञानमात्रं ग्रहीतुं शक्यम् । न च तद्वत्तारूपविषयातिरिक्तं प्रामाण्यं नाम किञ्चिदस्ति । तद्वद्विषयकत्वस्य ज्ञानमात्रत्वात् । तत्प्रकारकत्वस्याऽपि तथात्वात् । भ्रान्तिसाधारण्यत्वाच्च । अत एव भ्रान्तोऽपि पुरोवर्तिनि तद्वत्तारूपप्रामाण्यनिश्चयान्निष्कम्पप्रवर्तते। दूरस्थजलज्ञानादौ त्वनभ्यासदोषात्प्रामाण्यग्रहस्यानिश्चयत्वमिति तत्संशयो युज्यते इत्यनवद्यम् । मीमांसकानां स्वतः प्रामाण्यमप्रामाण्यं परत इति संक्षेपः । ननु वाक्यादेवाऽपरोक्षज्ञानमुत्पन्नं प्रतिबन्धनिरासे सति विषयाऽवरणनिवर्तकमित्युक्तं तदयुक्तम् । शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यादिति चेत्सत्यम् । साक्ष्यभिन्ने प्रत्यक्षे वस्तुनि शब्दादपि अपरोक्षज्ञानं भवति । अपरोक्षार्थकत्वस्यैव ज्ञाननिष्ठाऽपरोक्षताशब्दार्थत्वात् । न चेन्द्रियजन्यत्वेन ज्ञानस्य प्रत्यक्षता मनोजन्या । अनुमितेस्तत्प्रसङ्गात् नित्यस्य सुखादिज्ञानस्य तदभावप्रसङ्गाच्च । मनसः प्रमातृत्वेनानिन्द्रियत्वात् । दशमस्त्वमसि, शुक्तिरियमित्यादिवाक्याद्भ्रमनिवर्तकाऽपरोक्षज्ञानदर्शनाच्च तत्त्वौपनिषदं वेदान्तविज्ञानसुनिश्चितार्था इति च श्रुत्या वेदान्तवाक्यजसाक्षात्कारस्यैव मुक्तिहेतुत्वावगमाच्च । तस्मात्कर्मभिर्निरस्तसमस्तकल्मषस्य भगवदनुग्रहाच्छमादिसंपत्त्या ऽनात्ममात्रे रागादिदोषनिबन्धनप्रवृत्तिविमुखस्याऽत्मप्रेप्सोः श्रवणेनाऽवधृतशक्तितात्पर्याच्छब्दान्मननं निदिध्यासनाभ्यां प्रमेयाऽसम्भावनादिदोषप्रतिबन्धनिरासे सत्येकाग्रचित्तेन्द्रिये ब्रह्मात्मत्वसाक्षात्कारो जायते । चित्तस्याऽपरोक्षधीहेतुत्वमात्रेणाऽऽचार्यैरिन्द्रियत्वोपचारः कृतः । एकत्र विजातीयकरणद्वयाऽयोगादिति मन्तव्यम् । अन्ये तु श्रुताच्छब्दाद्ब्रह्मात्मनि परोक्षधीरुदेति । शब्दस्वाभाव्यात्पश्चादुक्तैकाग्रचित्तसहकृतादपरोक्षधीरित्याहुः ।

ननु श्रवणमननध्यानानां न तावदाग्नेयादीनामिव समप्राधान्यं ज्ञानान्यस्य कस्य फलस्याभावात् । ज्ञानस्य च शब्दमात्रफलत्वात् । फलैक्याभावादेव नाऽङ्गाङ्गिभावोऽपि । यदि परम्परया ज्ञानफलकत्वेनाऽङ्गाङ्गिभावस्तर्हि ध्यानस्याऽनन्तरमेवाऽपरोक्षज्ञानहेतुत्वेन प्राधान्यम् । इतरयोस्तत्स्वरूपोपकारित्वेनाङ्गत्वमिति चेदुच्यते । श्रवणेनावधृतशक्तितात्पर्यविशिष्टवाक्यस्यापरोक्षज्ञानं प्रति करणत्वात् । करणस्य फलं प्रत्यव्यवहिततया प्राधान्यात्कर-

णकोटिनिविष्टत्वेन श्रवणं प्रधानम् । मननध्याने तु करणफलापेक्षितायाश्चित्तैकाग्रतायाः प्रतिबन्धकासम्भवनादिनिवृत्तिद्वारा सम्पादकत्वेन फलोपकार्यङ्गतामनुभवाते । अकरणचित्तसंस्कारकत्वेन व्यवधानात् । न चाव्यवधानात् ध्यानमेव करणमिति वाच्यम् । ध्यानस्य क्वापि प्रमाकरणत्वादर्शनात्तज्जन्यज्ञानस्य नष्टपुत्रसाक्षात्कारवद्भ्रान्तित्वापत्तेः । न च वेदान्तविषयसत्तानिश्चयात् ध्यानकरणकज्ञानस्य प्रमात्वमिति वाच्यम् । ध्यानजज्ञानस्य परतः प्रामाण्यापत्तेर्ध्यानाख्यप्रमाणान्तरकल्पनागौरवाच्च । नाऽपि ध्यानसंस्कृतं चित्तं करणं प्रमातृत्वात् । ब्रह्मण औपनिषदत्वविरोधाच्च । मनसैवाऽनुद्रष्टव्यमिति तृतीया मनस उपादानत्वेन हेतुत्वादविरुद्धा । तस्माद्विचारितवाक्यमेव करणमिति मननध्याने तदङ्गे इति सिद्धमित्याह—

प्रमाणानां स्वतो मात्वं शब्दादर्थाऽपरोक्षधीः ।
मतिर्ध्याने श्रुतेरङ्गे न ध्यानात्स्यात्प्रमोद्भवः ॥ इति ।

ननु वाक्योत्थस्याऽहं ब्रह्मेत्यपरोक्षज्ञानस्य देहाद्यध्यासाऽनर्थमूलविद्यानिवर्तकत्वे ज्ञानिनः सद्यः शरीरपातः स्यात् । तथा च जीवन्मुक्तिशास्त्रविरोधः । देहादिभिन्न आत्मेति विवेकज्ञानवदनिवर्तकत्वे फलाभावाच्छास्त्राऽनारम्भ इति चेन्न । विवेकज्ञानस्याऽविरोधादज्ञानाऽनिवर्तकत्वेऽपि वाक्योत्थाधिष्ठानतत्त्वगोचरज्ञानस्याऽज्ञानसमानाश्रयविषयतया विरोधादस्त्येव निवर्तकत्वम् । शरीरधारणन्तु नष्टाऽज्ञानसंस्काराद्युज्यते । रज्जुतत्त्वज्ञानिनोऽपि अहिभयाद्यनुवृत्तिवत् । अस्ति हि विनश्यद्धस्तुमात्रस्य संस्कारः ज्ञानक्रिययोरिव भावनावेगादिसंस्कारः । अन्यथा प्रलयानन्तरभाविसर्गस्य पूर्वसर्गसमानत्वायोगात् । स चाज्ञाननाशजसंस्कारोऽप्यज्ञानवदात्माश्रितो जगदपरोक्षभ्रान्तिहेतुः अपरोक्षभानहेतुस्थदोषत्वात्काचादिवत् । स च निरुपादानः । तत्त्वज्ञानसंस्कारनाश्यज्ञानसंस्कारस्तु दग्धेन्धनाग्निवत्स्वयं शाम्यतीति जीवन्मुक्तिशास्त्रबलात् कल्पनीयम् । अथ वा ज्ञानादावरकाऽज्ञानांशस्यैव नाशः । विरोधात् । विक्षेपकांशस्तु प्रारब्धाऽवसाने पूर्ववृत्त्यभिव्यक्तचैतन्यान्नश्यतीत्यविद्यालेशाद्देहधारणम् । तन्नाशे विदेहे कैवल्यमिति रमणीयमित्याह—

संस्काराद्यनुवृत्तिः स्यात्संसृतेर्ज्ञानिनोऽहिवदिति ।

ननु सर्वे वेदान्ता आत्मैकत्वाविद्यार्थमारभ्यन्ते इति भाष्योक्तमयुक्तं तेषूपासनापरवाक्यानां बहुलमुपलब्धेरिति । उच्यते ।

अध्यारोपापवादाभ्यां निष्प्रपञ्चप्रमित्यर्थं ब्रह्मणि सृष्टिवाक्यैः प्रपञ्चो ऽध्यारोपितस्तस्याऽपवादात्प्राप्तनिष्प्रपञ्चनिर्गुणप्रमितिशेषमाश्रित्य चित्तैकाग्र्यद्वारा ज्ञानहेतुत्वाऽभिप्रायेण वेदान्तेषूपासनानि विधीयन्ते । न चाश्रित्य विधाने ज्ञानाधिकारिण एवोपासनेष्वधिकारो गोदोहनइव स्यादिति वाच्यम् । दर्शपूर्णमासाङ्गत्वेन तदधिकारिण एव प्राप्ताप्रणयनोद्देशेन गोदोहनविधेरधिकृताऽधिकारत्वे ऽपि सर्वसाधारणप्रत्यक्षादिसिद्धस्य प्रपञ्चस्य श्रुत्या ऽनूद्यमानस्य ज्ञानार्थिनं प्रत्येव प्राप्तत्वाभावात्सर्वान् प्रति प्राप्तप्रपञ्चाश्रितोपासनेषु अमुमुक्षोरपि तत्तत्फलार्थिनो ऽधिकारोपपत्तेः । न हि ज्ञानं विहितं येन प्रपञ्चस्तदङ्गत्वेनासाधारणः स्यादपि तु रजतारोपस्याऽरजतशुक्तिज्ञानहेतुत्ववत्प्रपञ्चारोपस्य निष्प्रपञ्चब्रह्मधीहेतुत्वमात्रम् । तदाश्रितोपासनाविधीनां वेदान्तेषु ज्ञानार्थप्रपञ्चारोपप्रसङ्गादागतानां ब्रह्मण्येव महातात्पर्यं चित्तैकाग्र्यद्वारे ऽपि भाष्ये सर्वशब्दो युक्त इत्याह—

ज्ञानार्थत्वादुपास्तीनां वेदान्ता ऐक्यगोचराः । इति ।

एवं च सर्वेषां वेदान्तानां ब्रह्मात्मैक्यं विषयो ऽनर्थनिवृत्तिः फलमिति तद्विचारात्मकशास्त्रस्य सूत्रसन्दर्भस्याऽपि ते एव विषयप्रयोजने सिद्धे । ते च प्रथमसूत्रेणार्थात्सूचिते इति मत्वा तयोः सिद्धये भाष्यकारो ऽध्यासमादौ वर्णयित्वा ते दर्शितवानस्याऽनर्थहेतोरित्यादिना । तस्मादार्थिकसूत्रार्थस्पर्शित्वादस्य भाष्यत्वेन व्याख्येयता सिद्धा ॥

ननु विषयप्रयोजनयोः कथमार्थिकत्वमिति ? उच्यते । मुमुक्षुणा ब्रह्मज्ञानार्थं विचारः कर्तव्य इति सूत्रस्य श्रौतो ऽर्थ इत्युक्तम् । तत्र विधिप्रत्ययेन हितसाधनत्वोक्तौ हितविशेषाकाङ्क्षायामधिकारिविशेषणं मोक्षः सम्बध्यते इति प्रयोजनत्वबुद्धिर्मोक्षस्यार्थिकी । ब्रह्मज्ञानस्य जीवगतबन्धनिवृत्तिरूपमोक्षहेतुत्वाऽन्यथाऽनुपपत्त्या तदैक्यमर्थात्सूचितमिति । अत्र प्राभाकरः । न हि विधिप्रत्ययात् हितसाधनतावोधः । किन्तु विधिवोधितनियोगात्तद्विषये धात्वर्थे नियोज्य हितसाधनत्वरूपविनियोगं विना ऽनुपपद्यमानात्तद्वोध इति ब्रूते । तन्निराकरोति—

ज्ञाप्यते हितहेतुत्वं विधिना न नियोगत इति ।

अयं भावः । नियोगे सिद्धे हितहेतुत्वधीः । तस्यां ज्ञातायां क्षणि-

कभावार्थस्य कालान्तरभाविहितहेतुत्वाऽनुपपत्त्या स्थायिकार्योपस्थितौ तत्र शक्तिग्रहालिङादिना तद्बोध इति चक्रकापत्तेः । किञ्च विनियोगाभावे नियोगस्य नानुपपत्तिरस्ति । निष्फलनित्यादिकर्मणि नियोगाङ्गीकारात् । न च फलकामिनं यागे फलहेतुत्वमनापाद्य नियोगः प्रवर्तयितुं न शक्नोतीति कामिप्रवर्तकत्वानुपपत्त्या नियोगाद्विनियोगधीरिति वाच्यम् । तथा सति ज्ञातो नियोगो हितहेतुत्वधियं विना न प्रवर्तक इत्यावश्यकत्वेन तस्या एव प्रवर्तकत्वापातात् । यत्तु काम्यत्वेन साध्यस्य स्वर्गादेः कामनाद्वारा नियोगाधिकारिविशेषणत्वानुपपत्त्या नियोगविषयस्य यागादेस्तत्साधनतावोधो न विधित इति, तन्न । अध्येतुकामो भैक्षमाचरेदिति नियोगविषयस्य भैक्षस्य काम्याध्ययनहेतुत्वबोधापत्तेः । तस्मादध्ययनवद्विधेयधात्वर्थासाध्यत्वे ऽपि स्वर्गस्य तदधिकारिविशेषणमुपपन्नम् । किञ्च स्वर्गकामपदेन साध्यस्वर्गबोधे तस्य नियोगरूपसाध्येनान्वयाभावे स्वतन्त्रसाध्यभेदाद्वाक्यभेदः । अन्वये तु नियोगस्य स्वर्गं प्रति साधनत्वेनैवान्वय इति नियोगप्राधान्यभङ्गः । किञ्चेदं स्वर्गकामपदं न साध्यस्वर्गविशिष्टाधिकारिपरम् । येन तद्विशेषणत्वेन स्वर्गस्य नियोगविषयसाध्यतावोधः स्यात् । न तावदिदं स्वर्गकामत्वविशेषणं पुरुषस्य दर्शादिनियोगेनासम्बन्धनिरासार्थं, नित्यविधिनैव तन्निरासात् । नाऽपि नित्यनियोगाधिकार्यपेक्षया । काम्यनियोगाधिकारिणो भेदज्ञानार्थं नित्यकाम्यनियोगवैजात्यासिद्धेः । न चाधिकारिभेदात्तत्सिद्धिः परस्पराश्रयात् । ज्ञाते ऽधिकारिभेदे नियोगयोर्वैजात्यज्ञानम् वैजात्यज्ञाने विशेषणमर्थवदित्यधिकारिभेदज्ञानमिति । तस्मात्स्वर्गकामपदं हितसाधनत्वबोधिविध्यपेक्षितहितविशेषमात्रपरम् । तथा च स्वर्गकामो यजेतेति पदाभ्यां यागः स्वर्गसाधनमिति बोधिते सति तत्कामो ऽधिकार्यर्थाल्लभ्यते । तस्माद्विधिप्रत्ययादेवेष्टसाधनतावोधः ।

अन्ये तु स्वर्गविशिष्टाधिकारिणो नियोगविषयभावार्थेनाऽन्वये सति विशेषणस्याऽपि तेनान्वयः सिध्यति । विशिष्टान्वये विशेषणस्याप्यन्वयनियमात् । स चान्वयः स्वर्गस्येप्सितत्वेन भावार्थसाध्यत्वरूप इति विशिष्टाधिकार्यन्वयलभ्यः साध्यसाधनभावो न लिङर्थ इत्याहुः । तन्न । विशेषणस्य विशेष्यपुरुषक्रियां प्रति हेतुत्वेनाऽन्वयाद्विशिष्टान्वयोपपत्तेः ।

काम्ये कर्मणि कामनैवाधिकारिविशेषणम् । सा च भावार्थेन हेतुतया ऽन्वेति नित्यादौ जीवनादिवत् । यदि स्वर्गे विशेषणं कृत्वा तस्य भावार्थेन साध्यतयार्थान्वय उच्येत तर्हि जीवनादेरपीप्सितरूपस्य तद्विशिष्टाधिकारकभावार्थसाध्यताप्रसङ्गः । तस्मात्साक्षात्कृतिसाध्यस्य भावार्थस्यानन्यलभ्यमिष्टसाधनत्वं विध्यर्थमिति युक्तं कृतिसाध्यत्वमाख्यातलभ्यमिति न तत्र लिङादीनां शक्तिः । ननु ज्योतिष्टोमेन यजेतेत्यत्र लिङाऽकरणत्वे ऽभिहिते तृतीया न स्यात् । तिङ्कृत्तद्धितसमासैरनभिहिते इत्यधिकृत्य कर्तृकरणयोस्तृतीयेति सूत्रेण तृतीयाविधानादिति चेन्न । यागे करणत्वाभिधाने ऽपि ज्योतिष्टोमाख्ययागविशेषे करणत्वानभिधानात् । लिङा साधनत्वाभिधाने ऽपि करणत्वानभिधानाच्चेत्यनवद्यम् ॥

तस्माद्भगवान् भाष्यकारः प्रवृत्त्यङ्गतया सूत्रस्याऽऽर्थिकार्थं विषयप्रयोजनरूपमादौ व्याख्याय पदव्याख्यामारभते तत्राऽथशब्द आनन्तर्यार्थ इत्यादिनेत्युपपन्नम् । तस्मान्मुमुक्षुणा ब्रह्मजिज्ञासाख्यवेदमीमांसा कर्तव्या विषयप्रयोजनयोः सद्भावादित्युपसंहरति—

मुमुक्षुणा ऽतो जिज्ञासा कर्तव्या विषयार्थयोः ।
सद्भावादित्यर्थजातं प्रथमे वर्णके स्थितम् ॥ इति ।

श्रीरामप्रपदप्रसादकलितश्रीमद्गुरुश्रीपद-
श्रद्धायुक्प्रणतिप्रभाकरहतस्वान्ध्यान्धकारत्वतः ॥
श्रीमच्छङ्करपद्मपादकृतवाग्गुम्फातिगम्भीरके
सिद्धो न्यास उपप्रकाशयति वाक् सङ्घादिमे वर्णके ॥ १॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्पूज्यपादशिष्यरामानन्दसरस्वतीकृतौ विवरणोपन्यासे प्रथमसूत्रे प्रथमवर्णकं समाप्तम् ॥ रामार्पणमस्तु ॥

—ॐ—

भक्तानुग्रहकृद्देवं ढुण्ढिराजं परात्परम् ।
कर्णवायुचलद्विघ्नहारिशुण्डमहं भजे ॥ १ ॥
अशोकं परमानन्दं गोविदं भक्तवत्सलम् ।
वेदान्तवेद्यं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २ ॥

श्रोतव्य इति विध्यपेक्षितयोर्ब्रह्मात्मैक्यविषयानर्थनिवृत्तिप्रयोजनयोः सत्त्वाद्वेदान्तविचारः कर्तव्य इत्युक्तम् । पुनरत्र गतार्थत्वाऽगतार्थत्वाभ्यां सन्दिह्यते स विचारः कर्तव्यो न वेति । तत्र गतार्थ-

त्वान्न कर्तव्य इति प्राप्तम्। तथा हि। विचारविधेरव्यवहितो विचार-विषयः विचार्यः। वेदान्तप्रतिपाद्यस्तु व्यवहितो विषय इति स्थितिः। तत्र सर्ववेदस्य कार्यपरत्वाद्वेदान्तानामपि द्रष्टव्य इति ज्ञानविधौ तात्पर्यं न ब्रह्मणि विध्यपेक्षितं चोत्पत्तिविनियोगप्रयोगफलादिकं सर्वं पूर्वतन्त्रे जैमिनिसूत्रन्यायैर्विचारितमतो वेदान्तानां पूर्वतन्त्रेणाऽवगतार्थत्वात्तद्विचारः कृत एवेति व्यवहितविषयाभावाच्छास्त्रं नारम्भणीयमित्याह—

सर्वो वेदो विधिपरो विधिः पूर्वं विचारितः।
अनारभ्यमिदं शास्त्रम्। इति।

ननु विधिपरत्वे ऽपि द्वादशाध्यायानां यथा तत्तदभ्यधिकाऽऽशङ्कोत्तरत्वेनारम्भः। तद्वच्छङ्कायास्य शास्त्रस्यारम्भो ऽस्तु। तथा हि। शब्दप्रामाण्यस्य मानान्तरदृष्टार्थकत्वेन नियमाद्धर्मे मानान्तरादर्शनान्न वेदस्य प्रामाण्यमित्यप्रामाणिकत्वाद्धर्मो न विचार्य इत्याऽऽशङ्कयापौरुषेयत्वेन वेदस्य स्वार्थे मानान्तरानपेक्षत्वादबाधिताज्ञातफलवदर्थकत्वेन चोदनायाः प्रामाण्यम्। अर्थवादानां विधिस्तुत्यर्थकत्वेन मन्त्राणां धर्मोपयोगिस्मृतिहेतुत्वेन नामधेयानामनुष्ठेयधात्वर्थपरिच्छेदकत्वेन स्मृतीनां श्रुतिमूलकत्वेन प्रामाण्यं प्रथमाध्याये निरूपितम्। ननु वेदादिदृष्टसाधनत्वेन भावनाया नियोगस्य वा ज्ञानादनुष्ठानसिद्धेः किं द्वितीयेनेत्याशङ्क्य? उत्पत्तिविधीनां भेदाभेदनिर्णयं विना ऽनुष्ठानायोगात् शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयैर्भेदः अन्यत्र त्वभेद इति निर्णयाय द्वितीयारम्भः। तत्र यजेत दद्याज्जुहुयादिति प्रकृतिशब्देन तदर्थक्रियाभेदात् तत्तक्रियानुविद्धभावनादिविधिभेदः। समिधो यजतीत्यादौ गुणविधिं विना यजत्यभासादुत्पत्तिविधिभेदः। तिस्र आहुतीर्जुहोतीत्यत्र होमस्यानुवादेन संख्याविधावावृत्त्यापत्तेः संख्याविशिष्टहोमविधौ कर्मभेदः। वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनमित्यत्र द्रव्यदेवतारूपगुणभेदाद्भेदः। कुण्डपायिकर्मप्रकरणे मासमग्निहोत्रं जुह्वति, मासं दर्शपूर्णमासाविति श्रुतमग्निहोत्रादि प्रसिद्धाग्निहोत्रादेर्भिन्नं प्रकरणान्तरस्थत्वात्। अथेष ज्योतिरथेष विश्वज्योतिरथेष सर्वज्योतिरित्यत्रापूर्वनामधेयात्सहस्रदक्षिणादियुक्तं कर्म ज्योतिष्टोमाद्भिन्नमित्युक्तम्। ननु शेषत्वस्य दुर्निरूपत्वाच्छेषत्वज्ञानं विना ऽप्याधानवदुपकारकत्वमात्रेण प्रोक्षणाद्यनुष्ठानसम्भवात्किं तृतीयेनेत्याशङ्क्य स-

मीहितविध्यन्तराधीनप्रवृत्तिविषयत्वं शेषत्वमिति लक्षणाच्च। तत्र श्रुत्यादीनां मानत्वात् उपलभ्यमानोपकाराणां प्रयाजादीनां फलवत्कर्मशेषत्वज्ञानं विना ऽनुष्ठानायोगाच्छेषशेषिभावरूपनियोगज्ञानाय तदारम्भः । तत्र कदाचन स्तरीरित्यृचा गार्हपत्योपस्थाने ऐन्द्र्यति श्रुत्या शेषत्वं बर्हिर्देवसंदन दामीति मन्त्रस्य लिङ्गाद्बर्हिर्लवनाङ्गत्वे इमामगृभ्णन्निति मन्त्रस्येत्यश्वाभिधानीमादत्ते इति वाक्येनाऽश्वरशनादावनाङ्गत्वम् प्रकरणात् प्रयाजादीनां दर्शादिशेषत्वं पारिप्लवस्य राजसूयाङ्गत्वम् शुन्धध्वं दैव्यायेति मन्त्रस्य सान्नाय्यपात्रशुन्धनशेषत्वं सन्निधानात् । आध्वर्यवादिसमाख्यया पुरोडाशं प्रथयतीत्यादिमन्त्राणामाध्वर्यवादिकर्माङ्गत्वमिति निरूपितम्। नन्वेवं विनियोगज्ञानादङ्गाङ्गिनोरनुष्ठानसिद्धेः किश्चतुर्थेत्याशङ्क्याऽनुष्ठानमात्रसिद्धावपि तयोरेककाले ऽनुष्ठानस्याऽङ्गवाक्यैरेकवाक्यतामापन्नप्रधानविधिरूपमहावाक्यात्मकप्रयोगविधिमन्तरेणाऽसिद्धेस्तदर्थं चतुर्थारम्भ इति सिद्धान्तितम्? ननु व्युक्रमेणाऽप्यनुष्ठानसम्भवात्किं पञ्चमेनेत्याशङ्क्य साङ्गप्रधानस्य प्रयोगविधिना युगपदनुष्ठाने प्राप्ते नियतः क्रमो वाच्यः । अन्यथा किमादौ कार्यमिति चित्तविक्षेपापत्तेः । सन्ति हि क्रमनियमे श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि प्रमाणानि। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत वाजपेयेनेष्ट्वा बृहस्पतिसवेनेत्यादौ श्रुत्या क्रमः । अग्निहोत्रयवागूपाकयोः साध्यसाधनयोरर्थात्सामर्थ्यात्क्रमः। प्रयाजादीनां पाठक्रमः। ज्योतिष्टोमे प्रकृतौ प्रथमो ऽग्नीषोमीयः पशुः पश्चादाश्विनग्रहानन्तरं सवनीयः । तदनन्तरमानुबन्ध्यः पशुरिति क्रमो ऽवगतः। तद्धि प्रकृतौ साद्यस्के कर्मण्याश्विनग्रहानन्तरं "सह पशुना लभते" इति सहत्वश्रुत्या प्राकृतक्रमबाधे सति क्रमाकाङ्क्षायामाश्विनग्रहानन्तरकालस्य सवनीयपशुस्थानत्वेन प्रकृतौ कल्पनत्वात् तत्स्थाने सहत्वश्रुत्या तस्य पशोः स्वस्थानाच्चलनायोगात्प्राथम्ये सति द्वितीयो ऽग्नीषोमीयस्तृतीय आनुबन्ध्य इति स्थानक्रमः। सारस्वतौ मेषौ भवत इति सरस्वती सरस्वानिति स्त्रीपुंदेवताकयोर्होम्ययोः प्रधानत्वेन मुख्ययोः क्रमो याज्यापुरोनुवाक्ययुगलयोरङ्गयोः क्रमपाठादवगतः सन् अन्येषां निर्वापादीनां क्रमं नियमयति । स्त्रिया हविर्निरूप्य पुंसो निर्वपेदिति मुख्यक्रमात् क्रमः। वाजपेये सप्तदश प्राजापत्यान् पशूनालभते इति श्रुतानां पशूनां प्रोक्षणादिसंस्कारेष्वेककशः कर्तव्येषु प्राथमिकसंस्कारे नियामकाभावादिच्छया

प्रवृत्तिः । अन्येषां संस्काराणां प्राथमिकसंस्कारप्रवृत्तिक्रमेणैव क्रम इति निरूपणार्थं पञ्चमारम्भ इत्युक्तम् ।

नन्वधिकारिनिर्णयफलः षष्ठो ऽध्यायो नारब्धव्यः । कर्मणि निष्फलत्वेन तद्भोक्तृत्वलक्षणाधिकारासम्भवात् । स्वर्गकामो यजेतेत्यत्र प्रत्ययाभिहितभावनाया भाव्याकाङ्क्षायामेकपदोपात्तयागस्य भाव्यत्वेनान्वये सति सुखहेतुद्रव्यस्य स्वर्गशब्दार्थस्य पुत्रादेः साधनत्वेनान्वयादित्याशङ्क्य श्रेयःसाधनत्वावच्छिन्नभावनायाः प्रत्ययार्थत्वात्प्रत्ययस्य श्रेयोविशेषज्ञानं विना स्वार्थाबोधकत्वात्स्वर्गपदेनैकपदत्वं बोधकं पदमित्यङ्गीकारात् । एवमेकपदोपात्तस्वर्गो भाव्यो न यागो भिन्नपदोपात्तत्वात् क्लेशात्मकत्वाच्चेति सफलत्वात्कर्मण्यधिकारिचिन्तारम्भ इत्यभिहितम् । एवं पूर्वषट्केन प्रकृतिविध्यपेक्षितमुत्पत्तिविनियोगप्रयोगाधिकारचतुष्टयं निरूप्य विकृतिविचारार्थमुत्तरषट्कमारब्धम् । समग्राङ्गं श्रूयमाणं कर्म प्रकृतिः । यथा दर्शपूर्णमासाविष्टीनां सौर्यं चरुं निर्वपेदित्यादीनां प्रकृतिः सोमः । स यूपानां क्रतूनां दैक्षः पशुः पशुबन्धानामहर्गणानां द्वादशाह इत्यादि ।

ननु येजेतेत्यादिसामान्यश्रुत्या यागादिधात्वर्थसामान्योद्देशेन विहितानामङ्गानां प्रकृताविव विकृतावप्युपदेशेन प्राप्तेः किमतिदेशार्थकसप्तमनेत्याशङ्क्य तत्तत्प्रकरणविशिष्टभावनाया विधेयायाः कथंभावाकाङ्क्षया विहितानामङ्गानां साक्षाद्भावनान्वयानुपपत्त्या फलशिरस्कप्राकरणिकभावनाकरणीभूतधात्वर्थान्वयस्य व्यवस्थितत्वादश्रुताङ्गविकृतीनामतिदेशं विना ऽङ्गालाभात्तदर्थं सप्तमारम्भ इत्यभाणि । ननु तर्हि सर्वप्रकृतीनां यान्यङ्गानि तेषां सर्वेषां विकृतावतिदेशापत्तिः । ननु करणस्योपकारद्वारा ऽङ्गान्वयः । न हि सर्वाङ्गानामेककरणोपकारकत्वं क्वचित्कल्पम् । न चाकल्पस्यातिदेशो ऽस्ति । अतः कथं सर्वाङ्गातिदेश इति चेत्तर्हि यस्याः कस्याश्चित्प्रकृतेरुपकारकत्वेन कल्पानां धर्माणां यत्र कुत्र चिद्विकृतावतिदेशः स्यात् नियामकाभावादित्याशङ्क्य सौर्येष्टावाग्नेयेष्टिधर्माणां पशुबन्धेषु द्रव्यसाम्याद्वैष्णवशोरित्येवं द्रव्यमेकदेवतात्वसादृश्यादतिदेशः । ऐन्द्राग्ने चरौ द्विदेवताकत्वसाम्यादग्नीषोमीयेष्टिधर्माणां देवतासामान्यस्य नियामकत्वाद्विशेषातिदेशार्थसप्तमारम्भ इत्युक्तम् । नन्वाग्नेयादिकरणस्वरूपाकाङ्क्षया ऽन्वितानामग्नये

जुष्टं निर्वपामीत्यादिमन्त्राणामवघातादिसंस्काराणां च सौर्यादिषु प्रसक्त्यभावात्कस्येहार्थं नवमारम्भ इत्याशङ्क्य भावनाया भाव्यमूलसिद्धये करणत्वमाग्नेयादीनामङ्गान्वयप्रयोजकम् नन्वाग्नेयादिस्वरूपत्वं प्रथमं सफलभावनाकाङ्क्षया ऽन्वितानामङ्गानां फलकरणत्वप्रयुक्त्यैव धात्वर्थेनान्वयस्य वक्तव्यत्वात्। फलं चापूर्वद्वारा भाव्यमिति अपूर्वमेव साक्षाद्भाव्यम्।

तथा च यस्य फलापूर्वहेतुत्वं तस्याङ्गान्वय इति स्थिते विकृतीनामपि तद्धेतुत्वेनास्ति प्राकृताङ्गमन्त्रादिप्रसक्तिः। ततश्च सौर्ये कर्मण्युक्तमन्त्रप्राप्तौ तत्प्रकाशनोपकारायाग्नये इति पदं त्यक्त्वा सूर्यायेति पदप्रक्षेपो मन्त्रोहः कृतः। गिरा गिरा च दक्षसहति साग्नि इरेति पदप्रक्षेपः सामोहः कृतः। न गिरा गिरेति ब्रूयादिति निषेधात्। व्रीहिसम्बद्धस्यावघातादेर्नीवारद्रव्येण व्रीहिपदस्य सतुपद्रव्यपरत्वं कल्पयित्वा सम्बन्धः संस्कारोहः इत्यादिनिरूपणार्थं तदारम्भ इति स्थापितम्। ननु प्राकृताङ्गानां विकृतौ लुप्तोपकाराणामननुष्ठानलक्षणबाधो न युक्तः। अतिदेशप्राप्तानां तेषामवघातादीनां कृष्णलादौ वैतुष्यादिदृष्टोपकाराभावे ऽपि अदृष्टोपकारकल्पनया ऽनुष्ठानोपपत्तेः। घृते श्रपयतीति श्रुतपाकवदिति किं दशमेनेत्याशङ्क्य वैकृतभावनया कण्णस्योपकारमाकाङ्क्षमाणया प्रथममुपकारमाक्षिप्य तद्द्वारा ऽऽक्षिप्यमाणानामङ्गानां द्वारस्य लोपं ऽन्यथासिद्धौ वा बाधः? यथा कृष्णलेषु वैतुष्यरूपद्वारलोपादवघातलोपः। घृते श्रपणं तु श्रुतत्वादृष्टार्थमनुष्ठीयते। तथा ऽभिचारे शरमयबर्हिषा प्रत्यक्षोपदिष्टेन वेद्यास्तरणाद्युपकारस्य सिद्धत्वात्प्राकृतानां कुशानां बाध इति सिद्धान्तितम्। नन्वनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानादवानेकशेष्युपकारकत्वं नाम तन्त्रम्। तन्न युक्तम्। दर्शाद्यर्थमनुष्ठिताङ्गानां सोमाद्युपकारकत्वोपपत्तेः। न चैकप्रयोगावच्छिन्नत्वं शेषिणा विशेषणमिति वाच्यम्। आग्नेयादीनामपि पृथक् वाक्योत्पन्नानां प्रयोगैक्यासिद्धेरिति किं तन्त्रार्थकेनैकादशेनेत्याशङ्क्य पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्ययेति श्रुत्या दर्शयागत्रयस्य पूर्णमासत्रिकस्य च पृथक् प्रयोगैक्यश्रवणाद्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकफलत्वश्रवणाच्चैकफलकानामेकस्मिन्प्रयोगे श्रवणात् यागे तदुद्देशेन सकृदनुष्ठितस्य प्रयाजादेरुपकारकत्वं तन्त्रं युक्तमिति सिद्धान्तितम्।

नन्वन्यशेषिविधिप्रयुक्त्या ऽनुष्ठितस्य शेषस्यानुद्दिष्टशेष्यन्तरोपकारकत्वाख्यः प्रसङ्गो न युक्तः मानाभावात्तथा च किं द्वादशेनेत्याशङ्क्य च जामात्रुद्देशेन स्थापितस्य प्रदीपस्यानुद्दिष्टतरं प्रति उपकारकत्वदर्शनादग्नीषोमीयपशुमात्रोद्देशेनानुष्ठितप्रयाजादीनां तत्प्रयोगमध्यवर्तिनि पशुपुरोडाशाख्ये ऽनुदिष्टे ऽपि कर्मण्युपकारकत्वं युक्तमित्युक्तम्। तदेवं प्रत्यध्यायमाशङ्कानिरासेन विधिव्यापारभेदनिरूपणार्थं द्वादशाध्यायानामारम्भवद्वेदान्तानां ज्ञानविधिपरत्वं न युक्तम्। ज्ञेयस्य प्रत्यगभिन्नस्य ब्रह्मणः प्रत्यक्षादिविरोधादसिद्धेरित्यभ्यधिकाशङ्कानिरासार्थमध्यायचतुष्टयस्यास्य शास्त्रस्यारम्भो युक्त इति चेन्न। वाचि धेनुत्वज्ञानवदारोपितविषयस्याऽपि ज्ञानस्य विध्युपपत्तेः शङ्कानुत्थानादिति। एवं शास्त्रस्यानारम्भे प्राप्ते सत्येकदेश्युक्तमारम्भप्रकारमनुवदति—

इति प्राप्ते ऽत्र केचन ॥
विधेरभावाद्वेदान्ता न मानमिति शङ्किते।
आरब्धवन्तुः शास्त्रं तज्ज्ञानविध्यर्थसिद्धये ॥ इति।

अयमर्थः। वेदस्य हि विधिपरत्वेन प्रामाण्यं प्राचि तन्त्रे स्थापितमतो वेदान्ता न प्रमाणं तेषु विध्यभावात्। नन्वात्मा द्रष्टव्य इत्यस्ति विधिरिति चेन्न। अस्य व्यर्थकर्मप्रधानत्वेनाविधित्वात्। तथा हि। तयोरेव कृत्यक्तखलर्था इति सूत्रेण भावे धात्वर्थे कर्मकारके च कृत्यप्रत्ययान् विधाय कृत्याश्चेति सूत्रेण विधावपि तान् विहितवान् पाणिनिः। यथा ग्रामं प्रति गन्तव्यमिति भावे कृत्यः। स च स्वातन्त्र्येण क्रियाविधायकः। क्रियाविषयं च नियोगाख्यमतिशयं कारकासमवेतं पुरुषगतं बोधयतीति यावत्। स्वाध्यायो ऽध्येतव्य इति कर्मणि कृत्यः। स च कारकं प्रति गुणत्वेन क्रियां विधत्ते। कर्मस्थातिशयवाचीति यावत्। तथा चात्मा द्रष्टव्य इत्यस्य कृत्यविधित्वे कर्मस्थातिशयो वाच्यः। न ह्यनादिकूटस्थात्मनि निर्गुणे निर्दोषे उत्पत्तिविकाराप्तिसंस्काराः सम्भवन्ति। नन्वात्मनि कल्पितमलापकर्षः संस्कारः सम्भवतीति चेत्, न। अनुपयोगात्। यथा ऽध्ययनसंस्कृतस्वाध्यायस्य सफलकर्मसूपयोगः, नैवं ज्ञानसंस्कृतात्मनः क्वचिदुपयोगं पश्यामः। अतो व्यर्थात्मकर्मकत्वात् ज्ञानमविधेयम्। नन्वस्तु तर्हि सक्तुन्यायेन ज्ञानप्राधान्यकल्पनया विधिः। तथा हि।

दर्शपूर्णमासप्रकरणे सक्तून् जुहोतीति श्रूयते इति सक्तुहोमस्तदङ्गमि-

त्यवगतम् । अङ्गानि द्विविधानि । अर्थकर्माणि संस्कारकर्माणि च । तत्र कारकमनाश्रित्य विहितानि प्रयाजादीन्यर्थकर्माणि । व्रीह्यादिकमाश्रित्य विहितानि प्रोक्षणादीनि संस्कारकर्माणि । संस्कारो द्विविधः । विनियुक्तगतो विनियोक्ष्यमाणगतश्चेति । यथा व्रीहिभिर्यजेतेति विनियुक्तव्रीह्युद्देशेन प्रोक्षणादिः । आहवनीये जुहोतीति विनियोक्ष्यमाणाग्निगत आधानसंस्कारः संस्कृताग्नेः पश्चाद्विनियोगावगमात् । अत्र च सक्तूनिति द्वितीयया सक्तुगतः संस्कारो होमकृतः प्रतीयते । स चानुपयुक्तः होमेन भस्मीभूतानां सक्तूनां विनियुक्तत्वविनियोक्ष्यमाणत्वयोरसम्भवात् । ततः सक्तूनां प्राधान्यं भङ्क्त्वा होमस्य प्राधान्यं कल्पयित्वा सक्तुभिर्जुहोतीत्यर्थकर्मता निरूपिता । तन्न्यायेनात्मनः प्राधान्यं भङ्क्त्वा आत्मना द्रष्टव्यमिति ज्ञानप्राधान्येन विधिरस्त्विति चेन्न । होमस्य कर्मापेक्षायां शब्दतः करणीभूतानां सक्तूनामेवार्थाद्भस्मीभावरूपातिशयशालितया कर्मत्ववत् ज्ञानं प्रति करणीभूतस्यात्मनो निरतिशयस्यार्थादपि तत्कर्मत्वायोगात् । अकर्मकज्ञानस्यात्यन्तासत्त्वेन विध्ययोगात्ततो विध्यभावाद्वेदान्ता न प्रमाणमित्यभ्यधिकाशङ्कायां तन्निरासार्थमिदं शास्त्रं ज्ञानविध्यर्थस्यात्मगतसंस्काररूपफलस्य सिद्धये आरब्धव्यमित्याहुरिति । स्वाध्यायो ऽध्येतव्य इतिवदात्मरूपसंस्कारः तस्य स्वयं फलत्वाच्चोपयोगापेक्षेति भावः । एवमनारम्भवादी केषां चिदारम्भप्रकारमनूद्य अपरेषामेकदेशिनामारम्भप्रकारमनुवदति—

ब्रह्मण्यमानशङ्कायामारम्भमपरे जगुः ।
ज्ञाने विधिमुपेत्यैवेति ।

वेदान्तानां विधिपरत्वात् ब्रह्मणि प्रमाणाभावशङ्कायां तन्निरासार्थं ज्ञाने विधिमङ्गीकृत्यैव विध्येयज्ञानापेक्षितत्वाद्विध्ये ब्रह्मण्यपि वेदान्तानां प्रामाण्यं निरूपणीयमिति शास्त्रस्यारम्भं जगुरित्यर्थः । एवं पूर्वपक्षी मतद्वयमनूद्य दूषितवानित्युपन्यस्यति—

मते द्वैते असङ्गते ।
इत्युक्तं तत्प्रसङ्गेन सक्तुस्वर्णनयावपि ।
दर्शितौ चेति ।

तत्र तावत्प्रथम आरम्भप्रकारो न युक्तः । लोके वेदे च कटः कर्तव्यः स्वाध्यायो ऽध्येतव्य इति कर्मणि कृत्यस्य विधायकत्वदर्शनेनात्मा द्रष्टव्य इति कृत्यो न विधिरिति शङ्कानुत्थानात् । न च संस्कृतस्यात्मनो विनियोगदर्शनाच्छङ्केति वाच्यम् । अनर्थनिवृत्तिः संस्कार इत्युक्ते विनियो-

गाकाङ्क्षानुपपत्तेः । सकृन्न्यायेन ज्ञानस्य प्राधान्येन विधिसम्भवाच्च । न चात्मन्यतिशयाभावाज्ज्ञानं प्रत्यार्थिकमपि कर्मत्वं नास्ति । अकर्मकञ्च ज्ञानं नास्तीति शङ्कते वाच्यम् । मुक्त्यतिशयसत्त्वात् । तथा च कर्ता स्वस्य मुक्तये स्वात्मना ज्ञानं कुर्यादिति विधिर्युज्यते । नन्वहमित्यात्मज्ञानं प्राप्तं न तत्र विधिरिति शङ्कते वाच्यम् । प्राप्तेऽपि ज्ञानसन्ताने पुरुषार्थाय नियमविध्युपपत्तेः । हिरण्यभरणविधिवत् । तथा हि । तस्मात् सुवर्णं हिरण्यं भार्यमित्यनारभ्याधीतं वाक्यम् तत्र हिरण्यभरणं किं क्रत्वङ्गम्? उत तदङ्गहिरण्यस्य संस्कारकम्? अहो पुरुषार्थमिति सन्देहे विधिवाक्ये फलाश्रुतेरङ्गसंस्कारो वेति प्राप्ते कस्य चित्प्रकरणे ऽनाम्नानान्नाङ्गत्वं नाऽपि जुहूद्वारा पर्णताया इव धारणस्य स्वसंस्कार्यहिरण्यद्वारा क्रत्वङ्गता । जुह्वा इव सुवर्णस्य लोके ऽपि सत्त्वेन क्रत्वव्यभिचाराभावात् । अनङ्गद्रव्यसंस्कारस्य च निष्फलत्वेनायोगात् । सुवर्ण एव भवति दुर्वर्णो ऽस्य भ्रातृव्य इत्यवाधितार्थवादिकफलाय सुवर्णभरणं रागतः पक्षे प्राप्तं नियम्यते इति राद्धान्तितम् । तद्वदात्मनि ज्ञानाभ्यासो नियम्यते मोक्षाय । यद्वा आत्माऽनात्मप्रत्ययेषु साधारणस्य मनस आत्मप्रत्ययेष्वेव नियमः परिसंख्या वा भविष्यति । मनसा ऽऽत्मैव द्रष्टव्य इति । एवं विधिसंभवाच्छङ्कानुत्थानात्तेषां पूर्वपक्षो ऽसंङ्गत इत्यर्थः । अधुना सिद्धान्तो ऽप्यसङ्गत इत्याह—

विधिज्ञानं लौकिकालौकिकात्मनाः ।
नेत्यनारम्भवाद्युक्तौ इति ।

यदुक्तं बन्धमूलाविद्यानिवृत्तिसंस्कारायात्मकर्मकज्ञानविधिरिति । तत्र न तावल्लौकिकसंसार्यात्मज्ञाने विधिः । अहमिति ज्ञानस्य नित्यप्राप्तत्वात् ततो मुक्त्ययोगाच्च । नाप्यलौकिकात्मज्ञाने विधिरप्रसिद्धत्वात् । यथा किञ्चिदुद्दिश्य द्रव्यत्यागत्वरूपयागसामान्यप्रसिद्धौ तदालिङ्गितव्यक्त्यन्तरस्य बुद्धिस्थस्य विध्यर्थनियोगादिविषयत्वबोधो भवति । नैवमलौकिकात्मज्ञानत्वावच्छिन्नं प्रसिद्धम् । तस्मादत्यन्ताप्रसिद्धत्वान्न विषयत्वबोधः ।

एतेन द्वितीयो ऽप्यारम्भप्रकारो निरस्तः । विधेयज्ञानाप्रसिद्ध्या विध्यङ्गीकारेणारम्भसमर्थनायोगादित्येवमनारम्भवादिना पूर्वपक्षे कृते सति पुनरारम्भमेकदेशी शङ्कते इत्याह—

इदं सर्वं मदात्मकम् ।
इति शब्दोत्थविज्ञाने विधिरुत्थापितः पुनरिति ॥

द्वितीयारम्भवादिनेति शेषः । यथा रूपविषयकाक्षुषो रूपस्पृष्ट-द्रव्यस्यापि प्रसिद्धिः, एवं विधिवराद्धेदान्तवाक्याद्विधिस्पृष्टत्वेना-लौकिकात्मनः प्रसिद्धत्वसम्भवादिदं सर्वं यदयमात्मेति शाब्दोत्थं ज्ञानं परोक्षं तद्विषयकं प्रसिद्धमिति तत्र विधिर्युज्यते इत्यर्थः । श्रुत्यर्थस्तुवदिदं सर्वमित्यनात्ममात्रं प्रसिद्धमुद्दिश्यायमात्मेति बो-ध्यते । एवं यश्चोरः स स्थाणुरितिवत्सर्वस्य बाधादद्वितीय आत्मेति । नन्वस्मिन् वाक्यार्थे तज्ज्ञाने वा न विधिर्युक्तः । अस्मिन् वाक्ये वि-धिप्रत्ययाश्रवणादित्याशङ्क्याश्रुतो ऽपि कल्पित इति सदृष्टान्तमाहे दम्—

सर्वं यदयमात्मेति वाक्ये चेह श्रुतो विधिः ।
ज्ञातव्याख्यः प्रयोगाय कल्प्यः स्यात् पिष्टयागवत् ॥ इति ।

पूषा प्रपिष्टभाग इत्यत्र प्रपिष्टो भागो यस्येति स्वस्वा-मिभावरूपो द्रव्यदेवतयोः सम्बन्धः कालत्रयानवच्छिन्नो भाति । कालवाचिपदाभावात् । स च तदुद्देशेन त्यागरूपक्रियां कल्पयति । तां विना द्रव्यस्य देवस्वत्वायोगात् । सा च स्वप्रवर्तकं विनियोगं क-ल्पयति । तं विना प्रवृत्त्ययोगात् । तदनन्तरं यष्टव्यमिति पदं कल्प्यते । नन्वर्थज्ञानार्थं पदं पदात्पूर्वमेव क्रियानियोगयोर्ज्ञाने किं पदेन कृत्य-मिति चेत्सत्यम् । न तयोर्ज्ञानायेदं विधिपदम् । किन्तु साङ्गप्रधानक्रिया-प्रयोगज्ञानाय प्रधानविधिरङ्गविध्येकवाक्यतापन्नः प्रयोगं ज्ञापयती-त्यङ्गीकारात् । प्रकृते चेदं सर्वमिति वैदिकपदार्थसंसर्गो नियोगं कल्पयति । वैदिकार्थसंसर्गमात्रस्य साक्षात्परम्परया वा नियोगाऽवि-नाभावात् । स च नियोगः स्वाऽविनाभूतां क्रियां कल्पयति । तां विना सिद्धार्थसंसर्गमात्रान्नियोगानिष्पत्तेः । नन्वत्र का क्रिया कल्पनीया ? न च क्रियासामान्यं कृतिरिति सा कल्प्यते इति वाच्यम् । तथा स-त्यनात्मप्रपञ्च आत्मा कर्तव्य इति स्यात् । न हि तच्छक्यं वक्तुम् । न हि सुनिपुणो ऽपि घटं पटयितुं शक्नोति । किञ्च कृतौ विधेयायामङ्गानि अ-क्लृप्तानि कल्पनीयानि क्लृप्तशमादीनां शान्तो दान्तः पश्येदिति ज्ञा-नाङ्गत्वात् । न च तर्हि ज्ञातव्य इति कल्प्यते इति वाच्यम् । अनात्म-प्रपञ्चस्य सत्यत्वेन तत्प्रमायां सत्यामात्मत्वज्ञानायोगात् । प्रपञ्च आ-त्मेति ज्ञाने ऽपि तस्य योपिदग्निरिति ज्ञानवद्भ्रान्तित्वेनानर्थप्रपञ्चनिवर्त-कत्वायोगाच्च । अतो निष्फलत्वाज्ज्ञानमपि न विधेयमिति । उच्यते । स्थाणुज्ञानेन चोरस्येवात्मज्ञानेनानात्मनः कल्पितत्वाङ्गीकाराच्चि-

त्तिर्युज्यते । अतः सर्वमात्मेति ज्ञातव्यमिति विधिः परिणम्यते इत्यर्थः । ननु विधिकल्पनात्प्रागेव सत्यादिवाक्याज्ज्ञानस्य जातत्वात् सिद्धे ज्ञाने कथं विधिरित्यत आह—

सत्यादिवाक्यजज्ञानतुल्ये ज्ञानान्तरे विधिः ।
अतीतिकालसंसिद्धमन्त्रार्थस्मरणे यथा ॥ इति ।

मन्त्राः किमदृष्टार्था उत दृष्टार्था इति सन्देहे मन्त्राणां सिद्धद्रव्यादिबोधकत्वेन प्रवृत्तिफलकत्वायोगादनुष्ठानोपयोगिद्रव्यादिज्ञानस्य ब्राह्मणवाक्यैरपि सिद्धेरदृष्टार्था इति प्राप्ते श्रुत्यादिभिर्विनियोगान्तेषां प्रधानापूर्वनिष्पादकत्वेन फलवत्त्वावगतौ किंद्वारा मन्त्रा अपूर्वनिष्पादका इत्याकाङ्क्षायामनुष्ठापकः प्रयोगविधिरङ्गभूतानां मन्त्राणां स्वापेक्षितानुष्ठानोपयोग्यर्थप्रकाशनं दृष्टमेव । द्वारं कल्पयित्वा मन्त्रैरेव तदर्थाः स्मर्तव्या अनुष्ठानायेति नियमयतीति ब्राह्मणवाक्यव्यावृत्तिरिति दृष्टार्था मन्त्रा इति स्थापितम् । तत्राध्ययनकाले मन्त्रार्थज्ञाने सिद्धे ऽप्यपूर्वोपयोगित्वेन ज्ञानान्तरे यथा विधिरेवं मन्त्रे ऽपीत्यर्थः । ननु तत्र प्रयोगविधिबलात् ज्ञानान्तरे विधिर्युक्तः । अत्र तु तदभावान्न ज्ञानान्तरे विधिरित्याशङ्क्याऽत्रापि प्रयोगविधिरस्तीत्याह—

शमाद्यङ्गैर्विमोक्षार्थी वेदान्तैर्ज्ञानमाचरेत् । इति ।

ज्ञानं कुर्यादित्युत्पत्तिविधिस्तावत्कल्पितः । ब्रह्मणे औपनिषदत्वश्रुत्या वेदान्ताः करणत्वेन संबध्यन्ते । स चोत्पत्तिविधिः स्वप्रकरणस्थशमादीनङ्गत्वेन गृह्णन् विनियोगविधिर्भवति । पुनः स एव विधिरभयं ब्रह्म भवति य एवं वेदेत्याद्यर्थवादादिकमोक्षकामिनो रात्रिसत्रन्यायेन मदिष्टसाधनमिदं कर्मेति कर्मस्वामित्वरूपाधिकारं बोधयन् अधिकारविधिर्भवति । तथा हि प्रतितिष्ठन्ति ह वै य एतारात्रीरुपयन्तीत्यत्रापूर्वत्वादुपेयुरिति । विधित्वे सिद्धे सत्यधिकार्याकाङ्क्षायां विश्वजिन्न्यायेन स्वर्गकामो ऽधिकारी कल्प्यते इति प्राप्ते फलमात्रेयो निर्देशादश्रुतौ त्वनुमानं स्यादिति सिद्धान्तितम् । प्रतितिष्ठन्तीत्यर्थवादश्रुतफलं गृहीत्वा प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति विधिः परिणम्यते । विश्वजिता यजेतेत्यत्र तु फलार्थवादाश्रवणात्सर्वसाधारणः स्वर्गकामो ऽधिकारी कल्पित इति वैषम्यम् । स चाधिकारविधिः साङ्गं कर्मानुष्ठापयन् प्रयोगविधिः सम्पद्यतइत्यस्ति प्रयोगविधिरित्यर्थः । तथा च विधिसम्भवात्तदपेक्षिते ब्रह्मणि वेदान्तप्रामाण्यनिरूपणाय शास्त्रार-

म्भसिद्धिरिति भावः । अनारम्भवादी दूषयतीत्याह—

इत्येवं विधिमुत्थाप्य वैरूप्यात्तं न्यवारयत् । इति ।

तं विधिं तज्ज्ञानं वेत्यथः । वैरूप्यं श्लोकद्वयेन स्फुटयति—

गुणप्रधानता सिद्धसाध्यता ज्ञातता तथा ।
अज्ञाततेति वैरूप्यमपूर्वब्रह्मधीविधौ ॥
विधेयज्ञानशेषत्वाद् गुणत्वादिकमात्मनः ।
अपूर्वत्वेन मेयत्वात्प्राधान्यादित्रयं भवेदिति ॥

ब्रह्मात्मा ज्ञातव्य इत्यपूर्वस्य मानान्तराज्ञातस्य ब्रह्मात्मनो ज्ञानविधौ वैरूप्यं स्यात् । तथा हि । किं यदज्ञातब्रह्मसाधकं ज्ञानं तदेव विध्यर्थनियोगविषयतया विधेय उत ज्ञानान्तरम् ? आद्ये ब्रह्मणोऽपूर्वतया प्रमेयत्वेन ज्ञानजन्यातिशयशालित्वात्प्राधान्यं साध्यातिशयविशिष्टत्वात्साध्यत्वमाज्ञातत्वं चेति त्रयं प्राप्तम् । एवं यत् ज्ञानापेक्षया प्राधान्यं तज्ज्ञानं विधेयं प्रति विषयतया कारकत्वात् गुणत्वं प्राप्तं यत् ब्रह्मज्ञानं तत्कर्तव्यमिति विधानायोद्देश्यत्वात्सविषयस्य ज्ञानस्य विधेः प्रागेव ज्ञातत्वं वाच्यम् । अज्ञातस्योद्देश्यत्वायोगात् । विषयस्य विशेषणत्वात् । स्वविशिष्टज्ञानज्ञानात्पूर्वं ज्ञातत्वं वक्तव्यम् । ज्ञातत्वं नाम सिद्धज्ञानविशिष्टत्वम् । तथा च ब्रह्मणो विधेयज्ञानापेक्षया सिद्धज्ञानविशिष्टत्वेन कारत्वेन वा सिद्धत्वं ज्ञातत्वं चेति पूर्वत्रयविरुद्धं धर्मत्रयं प्राप्तम् तदेवमज्ञातब्रह्मसाधकज्ञानस्यैव विधेयत्वे मिथो विरुद्धत्रिकद्वयरूपं वैरूप्यं दुर्वारं स्यादित्यर्थः । ननु प्रथमं ज्ञानमात्मा ज्ञातव्य इति वाक्योत्थं ब्रह्मात्मार्थसाधकं ज्ञानान्तरं विधेयमिति न वैरूप्यमिति चेन्न । एकमेव वाक्यं पूर्वमर्थपरं पश्चाद्विधिपरमित्ययोगात् । ननु वैरूप्यं न दोषः अन्यथा व्रीहीन् प्रोक्षतीति संस्कारविध्युच्छेदापत्तेः । व्रीहीणां प्रोक्षणं प्रति कारकत्वात् गुणत्वं भाति उद्देश्यत्वात् सिद्धत्वं ज्ञातत्वं च । एवं तज्जन्यातिशयत्वात् प्राधान्यं साध्यत्वञ्च भातीति अज्ञातातिशयत्वादज्ञातता चेति वैरूप्यभानादिति चेन्न । व्रीहीनिति द्वितीयाया अतिशयवैशिष्ट्यवाचित्वाभावात् । अतो द्वितीयया तेषामीप्सितत्वेन कारकत्वकथनाच्छाब्दज्ञाने गुणत्वादित्रयमेव भाति । ईप्सितत्वान्यथानुपपत्त्या ऽतिशयभाने तद्धर्त्वेन प्राधान्यादित्रयमार्थिकमित्यविरोधः । प्रकृते तु व्रीहिवत् ब्रह्मणः प्रमाणान्तरसिद्धत्वाभावात् ज्ञानविधिवाक्येनैव ज्ञानशेषत्वेन प्रतिपाद्यमेकस्मिन्नेव शाब्दबोधे शेषत्वेन गुणत्वादिभानं प्रतिपाद्यत्वेन प्राधान्या-

दिभानमिति विरोधः। ननु विधिप्रत्ययशून्यैः सत्यादिवाक्यैः ब्रह्म प्रतिपाद्य पश्चाद्विध्येकवाक्यतया ब्रह्मज्ञानविनियोगः प्रतिपाद्यते;इति न वैरूप्यमिति चेन्न। त्वया विधिशून्यवाक्यस्य बोधकत्वानङ्गीकारात्। अङ्गीकारे वा फलवदज्ञाताबाधितपरमानन्दनिर्विशेषप्रत्यग्ब्रह्मप्रतिपादनेन कृतकृत्यानां वाक्यानां विध्येकवाक्यत्वायोगात्। ननु वाक्यात्परोक्षज्ञानं जायते,तद्बन्धमूलाविद्यां न निवर्तयतीति निष्फलम्। ततः सत्यादिवाक्यानां मोक्षहेतुसाक्षात्कारे विध्येकवाक्यत्वं युक्तमित्यत आह—

साक्षात्कारे तथा ज्ञानसन्ततौ दूषितो विधिः।
साक्षात्कारो विना भानं दृष्टो ऽभ्यासान्न हि क्व चित्॥ इति।

वेदान्यमानागोचरे ब्रह्मणि साक्षात्कारे विधिर्न युक्तः करणाभावात्। वेदस्य त्वया साक्षात्कारकरणत्वानङ्गीकारात्। ननु वेदवाक्यादवगते ब्रह्मणि साक्षात्काराय ज्ञानसन्ततिर्विधीयते इति चेन्न। ज्ञानसन्ततिविधेरश्रवणात्। तथा हि। न तावदात्मेत्येवोपासीतेति सन्ततिविधिः। तत्र लोकसिद्धाहम्प्रत्ययसन्ततिमुपासीतेत्यनूद्य आत्मेत्येवेत्यद्वयात्ममात्रस्य प्रतिपादनात्। तदुक्तम्—

यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्।
तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम्॥ इति।

तद्वृत्तं तत्पदं नापि पश्येदिति सन्ततिविधिः। सन्तत्यभानात्। नापि निदिध्यासितव्य इति सन्ततिविधिः। तस्याद्वयात्मप्रकरणस्थत्वेन विधिपरत्वायोगात्। अस्तु वा ऽवान्तरतात्पर्येण निदिध्यासनविधिः। नैवम्।न तावन्मात्रं साक्षात्कारकारणं; ध्यानस्याप्रमाणत्वात्। न हि प्रमाणं विनैव ध्यानमात्रादात्मसाक्षात्कारः प्रमारूपः क्व चिद्दृष्टः। क तर्हि ध्यानविधेरुपयोगः? एकाग्रतायामिति ब्रूमः। सूक्ष्मार्थसाक्षात्कारे हि चित्तस्य तदन्याकारत्वं प्रतिबन्धकं तदभावश्चित्तस्य प्रसाद एकाग्रतेति च गीयते। सा ध्यानसाध्यसाक्षात्कारे निमित्तम्। तथा च श्रुतिः। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान इति विशुद्धचित्तो ध्यानाच्चित्तप्रसादेन तमेवापनिषदं निष्कलमात्मानं गुरूपदिष्टमहावाक्यादेव साक्षादनुभवति। ततो मानान्तराग्राह्यत्वादित्यर्थः। अतो विध्यभावान्न विधिपरा वेदान्ताः। किञ्च यत्त्वाभिमतं विधिपरैरेव वेदान्तैः ब्रह्मात्मानं साधयिष्यामीति शास्त्रारम्भ इति,तन्मनोरथमात्रमित्याह—

वेदान्ता विधिनिष्ठाश्चेद्ब्रह्माभावः प्रसज्यते । इति ।

एकस्याभयार्थत्वायोगादिति भावः । ननु शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते, उपस्पृश्यते चेति लोके एकस्यानेकार्थत्वं दृष्टमित्यत आह—

तात्पर्यापेक्षशब्दस्य ह्यर्थत्वासम्भवात्स्फुटमिति ।

अस्तु कुल्यादेरेकस्य स्थायिनोऽन्यानपेक्षस्यानेकार्थत्वम् । वाक्यस्य त्वेकस्याध्रुवस्य तात्पर्यसापेक्षस्य तन्न सम्भवति । उभयत्र तात्पर्ये वाक्यभेदापत्तेरित्यर्थः । ननु समिधो यजतीत्यादीनां पञ्चानां वाक्यानां पञ्च यागास्तेषां क्रमश्चेति ह्यर्थत्वं दृष्टमित्याशङ्क्याह—

प्रयाजा एव चोद्यन्ते शब्दैरर्थात् क्रमप्रमेति ।

वाक्यैर्यागा एव विधीयन्ते तेषामङ्गत्वादेकेन कर्त्रा ऽनुष्ठापकः प्रयोगविधिरभङ्गमविहितमपि क्रमं कल्पयन् यागानां बोधकत्वेन सन्निहितानां वाक्यानां पाठक्रमं बोधक्रमं वा तेष्वारोप्यानुष्ठापयति। तथा चैकस्य कर्तुर्युगपदनेकेषां प्रयोगानुपपत्त्या क्रमप्रमावाक्यैरित्यर्थः । क्रमो नाम कश्चिन्नास्तीति वदन्तं प्रति प्रसङ्गात्तत्स्वरूपमाह—

अर्थान्तरं क्रमो यद्वा ह्यर्थाः कालाद्युपाधिकाः । इति ।

क्रमिकार्थद्वयवर्तिपदार्थान्तरं क्रमः । स च संयोगवद्व्यासज्यवृत्तित्वान्नैकत्र प्रतीयते । ननु द्वितीयस्यासतः आश्रयत्वं कथमिति चेन्न। अत्यन्तासत्त्वाभावात्। अन्यथा घटत्वादेर्भाविघटे भानं न स्यात्। यद्वा पूर्वकालावर्त्युत्तरकालस्थः पदार्थ एव कालोपाधिकः सन् कालिककमः कालस्य पूर्वोत्तरत्वमनिर्वाच्यम। तत्स्वरूपमेव एकदिगवस्थितार्था एव दैशिकः क्रम इत्यर्थः । तस्मात्प्रमेयभेदे वाक्यभेदो दुर्वार इति स्थितम । ननु भूयाद्धिधिपराद्वाक्यात् ब्रह्मासिद्धिः; किन्तु क्रमवदर्थादित्याशङ्क्य निषेधति—

ननु ज्ञाने नियोगोऽपि ब्रह्माख्यविषयं विना ।
न युक्तोऽतो ब्रह्मसिद्धिरर्थाच्चेन्नानपेक्षते॥ इति ।

अर्थात्सविषयज्ञानविध्यनुपपत्तेरित्यर्थः । विधेयज्ञानस्य विषयानपेक्षत्वे दृष्टान्तमाह—

वाचि धेनुत्वसन्दृष्टेस्तदभावे ऽपि दर्शनादिति।

विषयाभावे ऽपीत्यर्थः । कस्तर्ह्यध्ययनविध्युपात्तानां वेदान्तानामर्थ इति चेदुच्यते । सर्ववेदस्य विधिपरत्वेन पूर्वतन्त्रे निरूपितत्वान्मुमुक्षुणा मोक्षायाहं ब्रह्मेत्युपासितव्यमिति वाक्यमेव वेदान्तानामर्थः ।

न प्रत्यग्ब्रह्मैक्यम्। मानान्तरविरोधेनान्यपराङ्क्यात् तदसिद्धेरिति। तथा कार्ये विधेश्च सर्वात्मना निरूपितत्वादनारम्भ इत्युपसंहरति। ब्रह्माभावादतः शास्त्रमनारभ्यमिति। शास्त्रस्याऽऽरम्भं वक्तुं सिद्धान्ती विकल्पयति—

वेदराशेः कार्यगत्वं किं व्युत्पत्त्योत सद्विरा ।
व्युत्पत्तिर्भाविनी ते ऽग्रे सतां गीस्तु विचार्यताम् ॥ इति ।

किं लोके सर्वेषां शब्दानां कार्यान्वितार्थव्युत्पत्त्या वेदस्य सर्वस्य कार्यपरत्वमुच्यते उत सतां जैमिन्यादीनां वचनबलेन ? तत्राद्ये तव व्युत्पत्तिः समन्वयसूत्रे सिद्धार्थे भविष्यति।तथा निरूपयिष्यमाणत्वात्। द्वितीये सतां वचनं सर्ववेदस्य कार्यपरत्वबोधकं विचार्यतामित्यर्थः। तादृशं वचनं नास्तीति भावः। नन्वथातो धर्मजिज्ञासेति साङ्गवेदाध्ययनानन्तरं धर्मो विचार्य इत्युक्त्या वेदस्य कार्यपरत्वं भातीत्याशङ्क्य सूत्रतात्पर्यं तत्रत्यं पूर्वपक्षमाह—

अदृष्टार्थो ऽधीतिविधिर्वेदो न स्यान्निरर्थकः ।
मानाभावादतो धर्मो न विचार्य इतीरिते ॥ इति ।

धर्ममीमांसा कर्तव्या न वेति धर्मे प्रमाणं भावाभावाभ्यां सन्देहे नेति तावत्प्राप्तम्। तथा हि।धर्ममीमांसा नाम प्रमाणविचारः। न हि धर्मे प्रत्यक्षादिकं मानम्, नापि वेदः। निरर्थकत्वात्। तथा हि। किमध्ययनविधिर्दृष्टार्थः उताऽदृष्टार्थ ? इति संशये वाक्यादर्थबोधस्य दृष्टस्य सिद्धये विध्ययोगादध्ययनकरणया भावनया विध्यर्थशब्दभावनाभाव्यया भाव्यमदृष्टमिति युक्तम्। यद्यपि तदृष्टं स्वाध्यायोऽध्येतव्य इति कर्मणि कृत्येन स्वाध्यायगतं भाति संस्कारादिरूपं, तथा ऽपि व्रीहीणामिव स्वाध्यायस्य सफलकत्वङ्गत्वे मानाभावात्स्वतो निष्फलत्वात्सक्तुन्यायेन कर्मकारकप्राधान्यं भङ्क्त्वा ऽर्थवादस्थघृतकुल्यादिकामस्वाध्यायेनाधीयीतेति कर्तृस्थस्वतन्त्रफलापूर्वमेव भाव्यम्। नन्वहरहः स्वाध्यायमधीयानो यद्दचो ऽधीते पयसः कुल्या अस्य पितॄन् स्वधा अभिवहन्ति यद्यजुषा घृतस्येत्यादिना ब्रह्मयज्ञाध्ययनस्य फलार्थवादः श्रुतो न ग्रहणाध्ययनस्येति चेत्सत्यम् अध्येयत्वसाम्यात् ग्रहणाध्ययनस्यापि तत्फलं कल्प्यते। तस्मादध्ययनस्य होमवददृष्टार्थत्वात्तत्र स्वाध्यायस्य सक्तुवद्विनियुक्तस्याध्ययननिर्वर्तकत्वेन कृतकृत्यस्य स्वार्थे विवक्षाशून्यत्वान्निरर्थकत्वेनाप्रमाणात्ततो मानाभावाद्धर्मो न विचार्य इति प्राप्ते सिद्धान्तमाह—

जैमिनिः सूत्रयामास जिज्ञासां धर्मगोचराम् ।
सफलक्रत्वपेक्ष्यस्य स्वार्थबोधस्य कारणम् ॥
वेदो ऽतो नियमाधीत्या संस्कार्यो वा ऽऽप्य एव च ॥ इति ।

एवं विवक्षितार्थत्वाद्वेदो मानमिति स्थितमिति धर्मो विचार्यः वेदप्रमाणकत्वात्। तथा हि । अध्येतव्य इति स्वाध्यायगतातिशय एव नान्यः। स चाध्ययनस्याक्षरावाप्तौ नियमविधेर्दृष्टानुविद्धाऽदृष्टार्थत्वात् । अवाप्तिर्नाम स्वाधीनोच्चारणक्षमत्वमम् । अध्ययनस्य दृष्टफलसंस्कारस्तु विधिसामर्थ्याल्लभ्यते । स चापूर्वरूपो विध्यर्थ इति कार्यवादिनः। अस्माकं तु कर्मार्थकर्तव्यप्रत्ययेन विधिना कर्मविशेषसमर्पकस्वाध्यायपदेन सह बोधकेन बोधकं पदमिति व्युत्पत्त्या तदेकपदेन समानपदोपात्तस्वाध्यायरूपेण प्रति साधनत्वमध्ययनगतं बोध्यते । अवाप्तिसंस्काराभ्यां विशिष्टत्वेन स्वाध्यायस्य साध्यत्वोपपत्तिरिति मतम् । भावनावादिनां कर्मार्थकर्तव्यप्रत्ययेन भावनाविध्यनुपपत्त्या भाव्यमपूर्वं सिध्यत् कर्मणि सिध्यति । स चाध्ययनसंस्कृतः स्वाध्यायः आधानसंस्कृताग्निवत् क्रतूपकारकः । न चोपकारकत्वं मानाभावः।क्रतुविधीनामनुष्ठेयबोधं विना ऽनुपपत्त्या बोधकस्वाध्यायस्योपकारकत्वावगमात् । ननु तर्हि स्वाध्यायमात्रस्यैव बोधकत्वादुपकारकत्वमागतं न संस्कृतस्येति चेन्न । अध्ययनविधिसामर्थ्येन संस्कृतस्वाध्यायजन्यबोधस्यैव क्रत्वपूर्वहेतुत्वकल्पनात् । असंस्कृतवेदस्यापूर्वोपयोगित्वे ऽध्ययनविधिवैफल्यापत्तेः । न च सकृन्न्यायेन तत्साफल्यं यथाश्रुतिस्वाध्यायस्य सफलक्रत्वपूर्वहेत्वनुष्ठानानुकूलदृष्टाबाधितार्थबोधकारणस्य प्राधान्येन दृष्टद्वारा व्रीह्यादिवत् संस्कार्यत्वेनावाप्यत्वेन च भाव्यत्वसम्भवे श्रुतिभङ्गायोगात् । तस्मात्सफलार्थबोधहेतुत्वाद्वेदो विवक्षितार्थत्वेन प्रमाणमिति तत्प्रमाणकत्वाद्धर्मस्य विचारः सालम्बनः कर्तव्य इति स्थितम् । तथा चाऽस्य सूत्रस्य धर्मे प्रमाणं वेद इत्यत्र तात्पर्यम् । नैतावता कृत्स्नस्य वेदस्य धर्मपरत्वं ज्ञातुं शक्यम् । न हि नीलरूपे चक्षुः प्रमाणमित्युक्ते चक्षुषस्तदेकप्रमेयता सिध्यति । पीतादेरपि तत्प्रमेयत्वात् । अतो धर्मशब्दाद्वेदार्थैकदेश एव विचारितो न सर्ववेदार्थ इति गम्यते । ननु धर्माय वेदवाक्यानि विचारयेदिति भाष्यकारवचनात्सर्वो वेदार्थो विचारित इति भातीत्याशङ्क्याह—

सामान्यतः प्रसिद्धिं च विवादं च विशेषतः ।

श्रेयःसाधनधर्मस्य भाष्यकारो ऽप्यभाषत ॥
पूर्वतन्त्रे च वेदार्थः सम्पूर्णो न विचारितः ।
इति प्रतीयते यस्माद्धर्मे यत्नो महान् कृतः ॥ इति ।

अयमर्थः । धर्मो नाम कर्तुः कालान्तरभाविश्रेयःसाधनो लोकाख्यप्रमाणाभासेन सामान्यतः प्रसिद्धः । स किमग्निहोत्रादिरुत चैत्यवन्दनादिरिति विशेषतो विवादे सत्याद्ये मानाभावात् द्वितीयस्य बुद्धादिवाक्यसिद्धत्वाददृष्टार्थमध्ययनं कृत्वा गुरुकुलान्निवर्तितव्यं विचारयितव्याभावादिति धर्मविषय एव पूर्वपक्षो दर्शितः । अथातो धर्मजिज्ञासेति वेदस्यार्थविवक्षां विचारस्यावसरं च दर्शयन् सूत्रकारो ऽपि धर्मो विचार्य इत्यग्निहोत्रादिरूपधर्मस्यैव विचारं सिद्धान्तितवान् । एवं सूत्रभाष्यकृतोर्धर्मे यत्नाधिक्यदर्शनात्सर्वो वेदार्थो न विचारित इति निश्चीयते । न च धर्मान्यवेदार्थाभावात् धर्मे विचारिते सर्वं विचारितमिति वाच्यम् । धर्मवत् ब्रह्मणो ऽप्यज्ञातावाधितफलरूपस्य वेदात्प्रतीतेः । अतो धर्माय वेदवाक्यानीति भाष्यं वेदैकदेशविषयमिति भावः । धर्मस्यैव वेदार्थत्वे सूत्रमन्यथा स्यादित्याह—

विवक्षितार्थो वेदो ऽतो वेदार्थस्तु विचार्यताम् ।
इति ब्रूयाद्यदा धर्मः सर्ववेदस्य गोचरः ॥ इति ।

वेदार्थजिज्ञासेति सूत्रं जैमिनिः कुर्यादित्यर्थः । फलितमाह—

हेतुं वेदविवक्षां च कुर्वन् धर्मं च सूत्रयन् ।
अस्त्वन्यो ऽपि च वेदार्थ इति वक्त्यत्र जैमिनिरिति ॥

अत्र प्रथमसूत्रे द्वादशलक्षण्यां धर्मो विचारितो न ब्रह्मेत्यविवादम् । तथा चाथाध्ययनानन्तरमतः वेदस्य विवक्षितार्थत्वाद्वेदार्थो विचार्य इति वक्तव्ये धर्मो विचार्य इति वदन् अन्योपि वेदार्थो ऽस्तीति सूचयति जैमिनिः । तस्यायं भावः । यद्यहं वेदार्थो विचार्य इति प्रतिज्ञां कुर्यां तदा ऽग्रे मया धर्मस्यैव विचार्यमाणत्वाद्धर्मादन्यो वेदार्थो नास्तीति मन्दबुद्धीनां भ्रमः स्यात्स माभूदिति । ननु धर्मो विचार्य इति प्रतिज्ञायां वेदस्य विवक्षितार्थत्वादिति हेतुरसङ्गत इति धर्मपदं वेदार्थपरमिति चेन्न । फलवदर्थबोधकत्वेनाध्ययनविधिभाव्यवेदस्य स्वार्थे तात्पर्यसत्त्वेन प्रमाणत्वाद्धर्मस्यापि तदर्थत्वात् विचारः कर्तव्य इत्यन्वयसम्भवात् । यद्यप्यध्ययनानन्तरं सर्ववेदार्थविचारस्यावसरस्तथापि धर्मस्यैव

श्रेयःसाधनत्वेन लोके प्रसिद्धत्वात्प्रायेणाध्येतॄणां श्रेयोऽर्थित्वान्मुमुक्षाया दुर्लभत्वात् तस्मिन्नवसरे धर्मो विचार्य इत्युक्तमित्यविरोधः । एवं प्रथमसूत्रतात्पर्यालोचनया पूर्वतन्त्रे सर्ववेदार्थविचारो न कृत इति सिद्धम् । तथा द्वितीयसूत्रेऽपि चोदनां धर्मलक्षणं वदन्नचोदनाभागैः सिद्धलक्ष्यमसूसुचदिति । अयमर्थः । चोदनालक्षणोऽर्थो धर्म इति धर्मस्य लक्षणप्रमाणपरं द्वितीयसूत्रं चोदनागम्यत्वं लक्षणं मुखतः । अर्थाद्धर्मे प्रमाणं चोदनेत्युक्तमिति प्राभाकराः । मुखतः प्रमाणमुक्तमर्थाल्लक्षणमिति भट्टाः । वेदो हि चोदनाचोदनात्मकः प्रत्यक्षः । तत्र चोदनां धर्मस्य साध्यरूपस्य लक्षणं वदन्नचोदनाभागस्य सिद्धं प्रतिपाद्यमस्तीति सूचितवानिति । अन्यथा सर्ववेदस्य धर्मपरत्वे वेदलक्षणो धर्म इति सूत्रं स्यादित्याह—

अन्यथा लक्षणं वेदं ब्रूयाद्धर्मस्य जैमिनिः ।
इत्युक्तं तत्प्रसङ्गेन भावनापि निरूपिता ॥ इति ।

विवरण इति शेषः । ननु चोदनापदं सर्ववेदस्य धर्मपरत्वं नास्तीति सूचनार्थं न भवति ; किन्तु धर्मस्य फलवत्त्वसूचनार्थम् । तथा हि । धर्मो नामार्थभावना तद्भाव्यकशब्दभावनावाचि लिङादिमद्वाक्यं चोदना । तत्र शब्दभावना नाम लिङादिशब्दनिष्ठः प्रेरणाख्यो व्यापारः शब्दो वा तद्गता शक्तिर्वा । अर्थभावना ऽभिधाख्या यज्ज्ञानात् पुरुषः प्रवर्तते, तस्याः शब्दभावनायाः स्तुतिनिन्दाज्ञानाङ्गकेन विधिशब्देन ज्ञानेन प्रवृत्तिं भावयेदित्याकारः । सा च प्रवृत्तिराख्यातत्वाकारेण लिङाद्यभिधया तत्तदङ्गकयागादिकरणिकार्थभावनेत्युच्यते । तस्यां भाव्याकाङ्क्षायामेकपदोपात्तो धात्वर्थो यागादिर्भाव्य इति शङ्का स्यात् । तथा च निष्फलो धर्मो ऽननुष्ठेय आपद्येत । तत्र जैमिनिश्चुद प्रेरणे इति धातुजेन चोदनापदेन प्रवर्तकवाक्यगं धर्मलक्षणं वदन् प्रवृत्तिरूपं धर्मं सफलं सूचयति । फलं विना प्रवृत्त्ययोगात् । एवं भगवता जैमिनिना फलसूचनात् क्लेशात्मकं भावार्थं विहाय भिन्नपदोपात्तमपि स्वर्गादिकं भाव्यं गृह्यते इति चोदनापदमर्थवादिति । नैतत्सारम् । अध्ययनविधिना स्वाध्यायस्य भावस्य फलवदर्थे तात्पर्यमिति सूचयता प्रथमसूत्रेणैव स्वाध्यायार्थस्य धर्मस्य फलवत्त्वसिद्धेः ।

तस्माच्चोदनापदमचोदनाभागस्य धर्मपरत्वनिरासार्थम् । अत एवार्थवादानां सो ऽरोदीदित्यादीनां स्वार्थे फलशून्यानां धर्मार्थत्वाभा-

वेनाप्रामाण्यमाशङ्क्य सफलविध्येकवाक्यत्वमुक्तम्। यदि चोदनासूत्रे-सर्वो वेदो धर्मपर इत्यभिप्रेतं स्यात्तर्हि अतदर्थानामिति हेतुपदमसङ्गतं स्यात्। क्रियार्थतायाः सिद्धत्वात्। अतश्चोदनात्मकाम्नायस्य क्रियार्थत्वेन प्रामाण्ये चोदनासूत्रे स्थिते सत्यक्रियार्थानामानर्थक्यप्राप्तौ विध्येकवाक्यत्वं युक्तम। तत्र चाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति पूर्वं पक्षोपक्रमे सो ऽरोदीदित्यादीनि स्वार्थफलशून्यानि वाक्यान्युदाहरता भाष्यकारेण स्वार्थे फलवतां वेदान्तानामनन्यशेषत्वं सूचितम। ननु दृष्टो हि तस्यार्थः कर्मावबोधनं नाम तद्भूतानां क्रियार्थेन समाम्नायः आम्नायस्य क्रियार्थत्वादिति भाष्यसूत्रवचांसि कृत्स्नाम्नायस्य धर्मपरत्वं सूचयन्तीत्यत आह—

दृष्टो हीत्यादिवचसां वेदान्तार्थविरोधिता।
कथितैवं भट्टपादमतेन न गतार्थता। इति॥

तस्यान्नायस्य कर्मावबोधनमर्थः। तत्तत्र सिद्धार्थेषु भूतानां वर्तमानानां पदानां क्रियापदेनैकवाक्यतेति सामान्यवचनानि धर्मजिज्ञासोपक्रमबलात्कर्मकाण्डविषयाणि न कृत्स्नवेदविषयाणि। तेषु वचनेषु कृत्स्नशब्दाभावात्। अतो नैतैर्वचनैर्वेदान्तार्थापलापः कर्तुं शक्यः। एवं भावनावादिभट्टपादतन्त्रानुसारेण वेदान्तानां गतार्थता नास्तीति सिद्धम। तथा नियोगशरणगुरुतन्त्रालोचने ऽपि तेषामगतार्थता। तथा हि। अधीतवेदस्य वेदार्थे आपाततो ज्ञाते संशयो भवति उद्भिदा यजेत पशुकाम इत्यादिवाक्येषु किमुद्दिश्य किं विधीयते इति। एवं संशये सति निर्णयार्थं वेदार्थविचारः कर्तव्यो न वेति संशये वेदस्याप्रमाणत्वात्तदर्थो न विचार्य इति पूर्वपक्षमाह—

वेदस्यध्यायने यद्वा ऽधीत्यपूर्वे समाप्तितः।
द्वेधा ऽप्यमानो वेदार्थो न विचार्य इतीरितम। इति।

अयमर्थः। आचार्यत्वकामो ऽष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेति सफलाध्यापनविधिरध्ययनं विना ऽनुपपद्यमानः स्वाङ्गत्वेनाध्ययनमाक्षिपति। वेदश्चाध्ययनं प्रति कारकत्वेनाध्यापने विनियुक्तो न स्वार्थे प्रमाणं वटुवदित्येकं मतम। अन्ये तु स्वाध्यायो ऽध्येतव्य इत्यध्ययनात्पूर्वं तव्यप्रत्ययार्थं प्रत्यङ्गत्वेन समाप्तो वेदो भूतं भव्यायेति न्यायात् अपूर्वाङ्गवेदाध्ययनमध्यापनोपकारकमतो तत्प्रयुक्तमित्याहुः। मतद्वये ऽपि वेदस्य स्वार्थे तात्पर्यहेत्वभावादप्रामाण्यमिति सिद्धान्तयति—

आद्यं मतं मानहीनं द्वितीये ऽर्थावबोधनम् ।
आवश्यकं फलेक्षित्वादपूर्वस्येति साधितम् ॥ इति ।

अयं भावः । अध्ययनस्याऽध्यापनप्रयुक्तत्वे ऽपि नाऽङ्गत्वं श्रुत्यादीनामङ्गत्वे मानानामभावात् । न च प्रयुक्तिमात्रेणाऽङ्गता । आधानस्य समूलकर्तृविधिप्रयुक्तत्वे ऽप्यनङ्गत्वात् । अतः स्वतन्त्राध्ययनसाध्यः स्वाध्यायो विवक्षितार्थः । द्वितीये मते कर्मणि कृत्ये भोक्ता ऽपूर्वस्य स्वाध्यायगतस्य फलाकाङ्क्षायामर्थावबोधः फलत्वेन कल्प्यते । दृष्टे फले सम्भवत्यदृष्टकल्पनानुपपत्तेः । स च संस्कृतस्वाध्यायजन्यो ऽर्थावबोधः सफलकत्वपूर्वोपयोगीत्यध्ययननियोग एव वेदस्य स्वार्थे तात्पर्यं गमयति । तस्माद्वेदप्रमाणं 'को वेदार्थो विचार्य' इति। एवं गुरूणां शास्त्रारम्भप्रकारमनूद्य स्वाभिप्रेतं दर्शयति—

इदं प्राभाकरमतं तत्राऽपि न गतार्थता ।
वेदार्थत्वप्रकारो ऽपि विचारो धर्मगोचरः ॥
सामान्यविधिना ऽपीह विशेषग्रहसम्भवात् ।
सूत्रे धर्मपदात्कृत्स्नवेदार्थो न विचारितः ॥ इति ।

यद्यपि कृत्स्नवेदाध्ययनविधिना सामान्येन वेदार्थविचारः प्रयुज्यते तथा ऽपि प्रायेणाऽध्येतॄणां भोगार्थित्वं तत्साधनं धर्म एवादौ जिज्ञासित इति सामान्यविधिना वेदार्थविशेषस्य धर्मस्याऽऽदौ विचारः प्रयुज्यते । मुमुक्षायां तु वेदार्थविचारप्रयोग इति युक्ततरम् । एतदभिप्रेत्य सर्वज्ञजैमिनिना धर्मपदं प्रयुक्तम् । तथा च गुरूणां वेदार्थो विचार्य इति प्रतिज्ञासूत्रे धर्मपदसामर्थ्याद्वेदार्थैकदेशधर्मगोचरैव । अतः कृत्स्नवेदार्थो न विचारित इति वेदान्तानामगतार्थत्वं सिद्धमित्यभिप्रायः ।

ननु धर्मपदं न वेदार्थैकदेशवाचि । येन ब्रह्मविचारः परिशिष्टः स्यात् । किन्तु कृत्स्नवेदार्थवाचकम् । न च तर्हि सूत्रे वेदार्थपदं किमिति न प्रयुक्तमिति वाच्यम् । तत्पदेन पुरुषार्थाऽप्रतीतेरजिज्ञास्यत्वापातात् । अतो वेदार्थस्य सफलत्वप्रतीत्यर्थं धर्मपदेन ग्रहणमित्याशङ्क्याह—

वेदार्थे धर्मशब्दस्य वृत्तिः का चन नेक्ष्यते । इति ।

न तावता वेदार्थे धर्मशब्दस्य रूढिः । अवेदार्थे ऽपि चैत्यवन्दनादौ बौद्धैः प्रयुज्यमानत्वात् । नाऽपि श्रेयःसाधारणाद्धर्म इति योगः । तथा सति श्रेयःसाधनस्यैव जिज्ञासा । प्रतिज्ञापत्तौ श्रेयोरूपस्य नित्याशोकानन्दस्य ब्रह्मणो विचारविशेषापत्तेः । तथा च परिशिष्टब्रह्मविचारा-

रम्भसिद्धिः। न च श्रेयःसाधनधर्मातिरेकेण ब्रह्म नास्ति न प्रतीयते इति वा वक्तुं शक्यम्। सत्यादिवाक्यैरबाधितानुभवविरोधात्। न च तद्ब्रह्म द्वादशलक्षण्यां विचारितम्। येन कथं चिद्धर्मपदेन ब्रह्माऽपि सङ्गृह्येत। अतो न्यायोपेतसौत्रधर्मपदेन श्रेयःसाधनस्य साध्यस्य विचारः प्रतिज्ञातो न श्रेयोरूपस्य सिद्धस्य ब्रह्मण इति सिद्धम्।

तथा चोदनालक्षणो ऽर्थो धर्म इति धर्मस्य लक्षणसूत्रमेकदेशविचारःप्रतिज्ञात इति दर्शयति। किं चोदनालक्षणो धर्मः उत बुद्धाद्यागमलक्षणः? इति संशयनिरासार्थं धर्मस्यैव लक्षणकथनात्। यदि किं चोदनालक्षणो वेदार्थः उत मन्त्रार्थवादलक्षण इति वेदार्थसंशये निरासार्थं लक्षणं स्यात् तदा चोदनालक्षणो वेदार्थ इति सूत्रं स्यात्। अतो वेदैकदेशचोदनाया धर्मलक्षणत्वोक्तेः कृत्स्नवेदार्थो धर्मो न भवतीति ज्ञायते। यथा चक्षुर्गम्यगुणो रूपमित्युक्ते प्रत्यक्षप्रमाणैकदेशप्रमेयं रूपं न कृत्स्नप्रत्यक्षप्रमेयमिति ज्ञायते तद्वत्। यदि च धर्मशब्दस्य वेदार्थपरत्वं कल्पयित्वा चोदनालक्षण एव वेदार्थ इत्युच्येत तर्हि सूत्रे ऽर्थपदं व्यर्थम्। तथा हि। श्येनादिश्चोदनार्थो न वा? आद्ये तस्य वेदार्थत्वादर्थपदेन निरासः। द्वितीये चोदनापदेनैव श्येनादिनिरासादर्थपदवैयर्थ्यम्। श्रेयःसाधनधर्मस्य लक्ष्यत्वे तु श्येनादेश्चोदनार्थस्य धर्मत्वनिरासार्थमर्थपदं बलवदनिष्टानुबन्धिश्रेयःपरमर्थवद्भवति। श्येनादेर्हिंसात्वेन तत्साधनत्वाभावान्न हिंस्यादिति निषिद्धत्वे बलवदनिष्टानुबन्धित्वाभावादधर्मत्वासिद्धेः। किञ्च चोदनायाः सत्त्वे निरर्थकत्वेन च चोदनार्थस्य कृत्स्नवेदार्थत्वासिद्धिः। चोदनामात्रार्थस्य निरर्थकचोदनार्थत्वव्याघातात्। चोदनाशब्दस्य वेदपरत्वे वेदलक्षणो वेदार्थ इति स्यात्। तथा च चोदनाशब्दस्य लक्षणादोषः। किञ्च प्रथमसूत्रे सर्वात्मना प्रामाण्यं सिद्धं न वा? न चेच्चोदनासूत्रे त्वत्कृतस्य किं चोदनालक्षणो वेदार्थः, उतार्थवादादिलक्षण, इति विचारस्यानुपपत्तिः। वेदस्य प्रामाण्यनिश्चयं विना वेदार्थाश्रितविचारायोगस्य स्फुटत्वात्। आद्ये औत्पत्तिकसूत्रादौ प्रामाण्यचिन्तानुपपत्तिः। निश्चिते संशयायोगात्। न चाद्यसूत्रे निश्चितस्याऽपि प्रामाण्यस्य वेदार्थत्वाच्चिन्तेति वाच्यम्। सिद्धस्य वेदार्थत्वे सिद्धे वेदप्रामाण्यापातात्। किञ्चाऽऽद्यसूत्रे प्रामाण्यनिश्चये द्वितीयाध्यायारम्भे वृत्तं प्रमाणलक्षणमिति भाष्येण विरोधः। तेन कृत्स्नप्रथमाध्यायेन वेदप्रामाण्यस्य साधितत्वप्रतीतेः। किञ्च चोदनाप्रमाणक एव

वेदार्थ इति द्वितीयसूत्रे निश्चये मन्त्रार्थवादादीनामानर्थक्यस्य सिद्धत्वादाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिपूर्वपक्षो व्यर्थः स्यात् । तस्मान्न वेदार्थविचारः प्रतिज्ञातः कृतो वा । किन्तु धर्म एव विचार्यत्वेन प्रतिज्ञातो विचारितश्च साध्यरूपः । ततः परिशिष्टस्य सिद्धब्रह्मपरस्य वेदस्य विचारार्थमथातो ब्रह्मजिज्ञासेत्यादिशास्त्रमारम्भणीयमित्याह—

एवं सत्यगतार्थत्वाज्जिज्ञासा ब्रह्मगोचरा ।
कार्या मुमुक्षुणेत्येवं द्वितीय वर्णके स्थितम ॥ इति ।

एवं एकदेशविचारे कृते सति वेदान्तानामविचारितार्थत्वान्मुमुक्षुणा तेषां विचारः कर्तव्य इत्यर्थः ।

तन्त्वौपनिषदं देवं प्रत्यगात्मानमव्ययम् ।
श्रीरामं परमानन्दं चिन्तये ऽहं मुहुर्मुहुः ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्पूज्यपादशिष्यरामानन्दसरस्वतीकृते विवरणोपन्यासे द्वितीयं वर्णकं समाप्तम् ॥

———0———

पूर्वत्राऽऽगतार्थत्वाद्वेदान्तशास्त्रमारम्भणीयमित्युक्तं तथाऽपि नारम्भणीयमधिकार्यभावादित्याशङ्क्य तृतीयवर्णकतात्पर्यमाह—

अथाऽधिकारिसिद्ध्यर्थं वर्णकान्तरमुच्यते ।
आनन्तर्ये ऽथशब्दः स्यात् नार्थान्तरइतीरितम ॥

अगतार्थतया वेदान्तानां विचार्यत्वोक्त्यनन्तरमित्यर्थः । इदं शास्त्रमारम्भणीयं न वेति सन्देहे मानाभावेनाऽधिकार्यभावान्नारम्भणीयमिति प्राप्ते सूत्रस्थाऽथशब्दस्यानन्तर्यार्थकत्वसमर्थनेन, 'तद्यथेह कर्मचितो लोकः क्षीयते ब्राह्मणो निर्वेदमायात् । शान्तो दान्तः तरति शोकमात्मवि'दिति साधनचतुष्टयपरवाक्यप्रमाणको ऽधिकारी साध्यते इति भावः । नन्वर्थान्तरं किं न स्यात् इत्यत आह । आनन्तर्ये इति । किं जिज्ञासापदं यौगिकमाश्रित्याथशब्दस्यार्थान्तरमाशङ्क्यते उत विचारे रूढमथ लाक्षणिकम ? आद्ये न तावदारम्भार्थता ऽथशब्दस्य युक्ता । ब्रह्मज्ञानेच्छाया अप्रतिपाद्यत्वात् । नाऽपि मङ्गलार्थता । इच्छा मङ्गलमित्युक्तेः फलाभावात् । नाऽपि प्रकृतादर्थादर्थान्तरत्वार्थकता । अर्थविशेषस्याऽप्रकृतत्वात् । यतः कुतश्चिदर्थान्तरतायाश्चावक्तव्यत्वात् । ननु तर्हि कुतश्चिदानन्तर्यमपि न वक्तव्यं

सिद्धत्वादिति चेन्न । स्वस्मिन् जिज्ञासां जानन्नतो ऽप्युक्तसाधनचतुष्टयानन्तर्यस्याज्ञातत्वात् । अथशब्देन तज्ज्ञापने त्वधिकारिविशेषणमेतावदेवेति निश्चित्य झटिति श्रवणादौ प्रवर्तते । तस्मादानन्तर्यार्थत्वमेवेति भावः । ननु जिज्ञासाविचारशब्दयोस्तुल्यार्थकतया शास्त्रकारव्यवहाराद्रूढं, पदम् तथा च विचारस्य कर्तव्यत्वादारम्भार्थो ऽथशब्दो ऽस्त्विति द्वितीयमाशङ्क्याह—

जिज्ञासापदमत्र स्याद्यौगिकं पङ्कजादिवत् ।
इत्यर्थं वृत्तिभेदाश्च शब्दस्याऽत्र निरूपिताः ॥

अत्र सूत्रे न रूढमिति शेषः । यस्मिन्पदे योगः कल्पः तत्र रूढिर्न कल्प्या । ननु कल्पयोगस्याऽपि पङ्कजादिपदस्य तामरसे योगरूढिर्नाम वृत्त्यन्तरं तार्किकैराश्रितमिति चेन्न । अलौकिकवृत्त्यन्तरकल्पने मानाभावात् । साधारणेनाऽपि योगेन प्रयोगप्राचुर्याद्विशेषार्थभानसम्भवात् । शास्त्रकारव्यवहारस्तु विचारलक्षणया ऽप्युपपद्यते इति भावः । ननु योगरूढिलक्षणानां को भेद इत्यत आह । इत्यर्थमिति । यौगिकत्वज्ञानार्थं वृत्तिभेदज्ञानार्थमिति यावत् । अखण्डपदप्रवृत्तिनिमित्तकः सङ्केतानपेक्षः शब्दस्यार्थेन सम्बन्धो रूढिः । एकस्मिन्पदे ऽवयवशक्तिसमुदायो योगः । इतीदं वृत्तिद्वयं मुख्यम् । मुख्यार्थसम्बन्धो लक्षणा । अत्र पूर्वप्रावल्यम् । ननु सिद्धान्ते जिज्ञासापदं विचारलक्षकमिति आरम्भार्थताशङ्कामनूद्य निराचष्टे—

अर्थत्वारम्भवाचित्वे लभ्यते नाधिकार्यसौ ।
मोक्षकामो न कल्प्यो ऽत्र प्रसज्यप्रतिषेधतः ॥

असौ श्रौतसाधनसंपन्नः । तत्समर्पकाभावादिति शेषः । ननु विचारस्य ज्ञानद्वारा मोक्षः फलं, तत्कामः कल्प्यतामित्यत आह । मोक्षकाम इति । आरभ्यते विचार इत्युक्ते तत्र सर्वो ऽधिकारीति प्रसज्यते प्रतीतिः । सा मोक्षकामकल्पनया बाधनीयेति गौरवम् । आनन्तर्याभिधानद्वारा मोक्षकामाधिकारिज्ञानपूर्वकविचारविधिप्रतिपत्तौ लाघवम् । ननु रात्रिसत्रन्यायेन श्रोतव्यविधिप्रकरणस्थार्थवादवाक्यैरेवाधिकारिविशेषधीसम्भव इति चेत्सत्यम् । किन्तु ज्ञाते ऽधिकारिणि संशयनिरासार्थमथशब्देनोपादानम् । ननु विश्वजिन्न्यायेन स्वर्गार्थवन्मोक्षस्याऽपि सर्वान्प्रत्यविशिष्टत्वात्सर्वाधिकारप्रतीतेर्न बाध इत्यत आह—

सर्वो लोको न मोक्षार्थी नाधीतिविधिगोचरः ।

अधिकारी भवेदत्र तत्प्रयुक्तेरभावतः ॥
विषयलुब्धानां निर्विषयमोक्षे भयमेव भवतीत्यर्थः ।

ननु वेदाध्ययनविधौ त्रैवर्णिको ऽधिकारीति स एव विधना स्वफलार्थावबोधार्थमाक्षिप्ते विचारे ऽप्यधिकारी सिध्यतीत्यत आह । नाऽधीतीति । अत्र विचारे अधीतिविधिगोचरो ऽधिकारी न भवेत् । विचारस्याऽध्ययनविधिप्रयुक्तत्वाभावादित्यर्थः । इमं हेतुं साधयति—

अर्थबोधो यदाधीतिविधिभाव्यो भवेत्तदा ।
विचारस्तत्प्रयुक्तः स्यात्किं त्वसौ भाव्यवेदजः ॥

स्यान्नासौ विधिभाव्य इति शेषः । न तावदध्ययनस्यार्थबोधो ऽन्वयव्यतिरेकसिद्धं फलम् । अध्येतॄणां तददर्शनात् । नन्वध्येतव्य इति शब्दभावनाभाव्याया अध्ययनकरणिकाया अर्थभावनाया अर्थावबोधो भाव्यः । स्वाध्यायस्याऽफलत्वेन भाव्यत्वानुपपत्तेः । इष्टफले सति सक्तुन्यायेन गुणप्रधानताव्यत्ययस्य स्वाध्यायेनाधीयीत विश्वजिन्न्यायेन स्वर्गकाम इति कल्पनानुपपत्तेश्चेति शङ्कते किन्त्विति । यद्यधीतस्य वेदस्य व्याकरणाद्यङ्गाध्ययने सत्यर्थावबोधो दृष्टं फलं तर्हि चन्द्र इव[1] स्वयमफलत्वे ऽप्यनुष्ठानद्वारा सफलस्यार्थावबोधस्य फलस्य हेतुतया भाव्यो ऽस्तु । अध्येतव्य इति कर्मणि कृत्यप्रत्ययेन वेदस्य भाव्यत्वनिश्चयात् । फलहेतुपश्चादेर्भाव्यत्वाङ्गीकाराच्चेति समाधत्ते । असाविति । अध्ययनभाव्यस्य वेदस्यार्थावबोधः फलमित्यर्थः । नन्वध्ययने ऽधिकार्यश्रवणादृष्टफलार्थावबोधकाम एवाधिकारीत्यत आह—

अर्थावबोधकामस्य नाधीतौ स्यान्नियोज्यता ।
अर्थाज्ञाने तदज्ञानादज्ञाते कामना कुतः ? ॥

अध्ययनमर्थावबोधकाममुद्दिश्य न विहितम् । येनाधिकारिविशेषणतया बोधो विधिफलं भवेदित्यर्थः । तत्र हेतुमाह अर्थाज्ञाने इति । उद्देश्यस्य विशेषणस्यार्थावबोधेच्छाया अध्ययनात्प्रागेव सिद्धिर्वक्तव्या । इच्छा त्विष्टसाधनतया ज्ञाते सिध्यति । ततश्चाध्येतव्यानां सर्वेषां वाक्यानां विशिष्याग्निहोत्रादिरूपार्थज्ञानं विना ऽर्थावबोध इष्टसाधनमिति ज्ञातुमशक्यत्वादिच्छा न सिध्यतीत्यर्थः । उपदेशेन विशिष्टार्थज्ञानाङ्गीकारे फलस्य सिद्धत्वादध्ययन[2]नांशे प्रवृत्तिर्न

(१) वेद एवेति पाठान्तरम् ।
(२) ध्ययनायासे इति पाठान्तरम् ।

स्यादिति भावः। नन्वर्थावबोधमुद्दिश्य वेदाध्ययनमिति यदि नोच्यते[1]? तदा कथं वेदे तात्पर्यग्रहः ग्राहकाभावादिति शङ्कते। उद्दिश्येति—

उद्दिश्योच्चारणाभावे कथं तात्पर्यधीर्भवेत्।

लोके वक्तुरिच्छा तात्पर्यमिति उद्दिश्योच्चारणमपेक्ष्यते। वेदे तु फलवदपूर्वार्थप्रमित्यनुरूपत्वं तात्पर्यमुपक्रमादिना ग्राह्येणोद्दिश्योच्चारणेन वक्तुरभावादिति परिहरति—

उपक्रमादिलिङ्गैः सा भवेद्वेदे न चान्यथा।
अधीतावनियोज्यत्वे बोधकामे भवेन्न सा॥
कर्त्रभावादिति प्राप्ते जगुः प्राभाकरा इदम्।

तस्मादर्थावबोधस्याध्ययनविधिफलत्वाभावेन तदर्थविचारस्य तद्विधि प्रत्युक्तत्वाभावान्नाध्ययनविधिना विचारेऽधिकारिलाभ इत्यथशब्देनैवाधिकारी समर्पणीय इति भावः। इदानीमध्ययने ऽधिकार्यन्तरानिरूपणादगत्यार्थावबोधकामो ऽधिकार्येष्टव्य इति शङ्कते। अधीताविति। मम नियोग इति साक्षान्नियोगबोधानियोज्यः। ममाऽस्यां क्रियायां नियोग इति क्रियाद्वारा नियोगबोद्धा कर्ता अधिकारी स्वामीति भेदः। सा अधीतिक्रियाप्रवर्तको हि विधिः प्रवृत्तिसमर्थमधिकारिणमपेक्षते इति वस्तुगतिः। अध्ययनविधिरध्ययनेन प्रवर्तक इत्यधिकारिणं चापेक्षते। किं त्वध्ययनक्रियाध्यापनविधिप्रयुक्तेति गुरुमतेनादौ समाधत्ते। जगुरिति। ननु स्वाध्यायो ऽध्येतव्य इत्यध्ययनक्रियाध्यापनविधिप्रयुक्ता। अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीतेत्यध्यापनविधिः। उभयत्राऽधिकारी न श्रूयते। तत्र कथमेकेनान्यस्य प्रयुक्तिरिति शङ्कते। अध्यापनप्रयुक्तेति। ननु तुल्यमिदं द्वयम्। किञ्चाधिकारिकल्पनायामध्ययने एव स कल्पनीयः। तेनैवाध्यापनस्य प्रयोगो ऽस्तु। न च लिखितपाठेनाविहिताध्यापनेनाप्यध्ययनसिद्धेर्नाध्यापनाक्षेप इति वाच्यम्। आचार्याधीनो वेदमधीष्वेति नियमविधानाद्विहिताध्यापनस्यैवाक्षेपादिति वैपरीत्यमाह। अन्येनेति—

अध्यापनं चाध्ययनमन्त्येनाऽऽद्यं प्रयुज्यताम्।
इति चेत् साधिकारत्वादाद्यमन्त्ये प्रयोजकम्॥

अर्थतः पाठतो वान्त्यमध्ययनं आद्यमध्यापनं समाधत्ते। साधि-

(१) चोच्यते इति वा पाठः।

कारत्वादिति । अयमाशयः । 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इति सूत्रेण संमाननादिषु साध्येषु नयतेर्धातोरात्मनेपदविधानादुपनयीतेत्युपनयनस्याचार्यकरणं फलं गम्यते। तदङ्गित्वादध्यापनस्याऽपि तेन फलं कल्प्यते। तत्कामनैवाध्यापनविधिना पुरुषस्य सम्बन्धे निमित्तमधिकारस्तेन साधिकारो ऽध्यापनविधिर्निरधिकारस्याध्ययनस्य प्रयोजक इति । ननु विधिः स्वविषयतदङ्गयोरेव प्रयोजकः। तत्र कथमध्ययनस्य विहितस्यानङ्गस्य विध्यन्तरप्रयोज्यता। नन्ववघातविधिना ऽवृत्तिरिवेति चेन्न। तस्याः फलानुपपत्तिलभ्यत्वेनाऽविहितत्वादित्याशङ्क्याह । साधिकार इति।

साधिकारक्रतुविधिराधानस्य यथा तथा ।
नैतदेवं नयीतेति ह्युपनीतेः फलं श्रुतम् ॥

काम्य इत्यर्थः । ब्राह्मणो ऽग्नीनादधीतेत्यग्निसंस्कारार्थो विधिर्न स्वयमाधानस्यानुष्ठापकः । निष्फलत्वात् । किन्तूत्तरकाम्यविधिरग्न्यपेक्षः तत्सिध्यर्थमाधानमनङ्गमपि प्रयोजयति । तत्सिद्धेष्वग्निषु नित्यविधयः प्रवर्तन्ते । न स्वयमग्न्यपेक्षा अप्याधानस्य प्रयोजकाः। अग्नीनां संस्कार्यतयोद्देश्यत्वेनानुपादेयानामनाक्षेप्यत्वात् । कामस्तु विधेर्बलीयानग्नीनाक्षिप्याधानमनुष्ठापयति तद्वदिति भावः। इदं गुरुमतं दूषयति। नैतदेवमिति। अध्ययनमध्यापनविधिप्रयुक्तं न भवति। अध्यापनविधेः फलाश्रवणेनाप्रयोजकत्वात्। न हि प्रयोजककर्तृत्वरूपमाचार्यत्वं विधिं विना ऽपि लोकसिद्धं विधिशब्दितनियोगस्य फलमिति युक्तम् । अस्तु वा शास्त्रीयकर्मप्रयोजकत्वं विशिष्टमाचार्यत्वं विधिफलम् तथापि नाध्यापनस्य फलवत्ता। हि यस्मान्नयीतेति निजो धातोरात्मनेपदसामर्थ्यादाचार्यकरणमुपनीतेः फलं श्रुतमिति योजना । न चाङ्गफलेनाङ्गिनो ऽध्यापनस्य फलवत्तेति युक्तमङ्गे फलस्याविवक्षितत्वापातात् । ननु यो वेदमध्यापयेत्स आचार्य इति मनुवाक्यादध्यापकस्याचार्यत्वं फलमिति चेन्न । तद्वाक्ये ऽध्यापनानुवादेनाचार्यसंज्ञामात्रस्य विधानात्। अतो निरधिकारत्वादध्यापनविधिर्न प्रयोजकः । ननु तर्हि विधिप्रयुक्तत्वे ऽध्ययनस्याऽधिकारी वाच्य इत्याशङ्क्याह । तस्मादिति ।

आत्मनेपदसामर्थ्यादाचार्यकरणं निजः ।
नाध्यापनस्य तस्मात्स्यादुपनीताधिकारिता ॥

ब्रह्मचर्यमागामिति श्रुतौ सर्वस्मृतिषु चोपनयनानन्तरमध्यय-

नविधानादुपनीताधिकारिकत्वमध्ययनविधेरित्यर्थः । ननु बालस्याऽप्रबुद्धत्वात्कथमध्ययने ऽधिकारज्ञानमित्यत आह । अधीताविति ।

अधीतौ विद्ध्यभावे तु प्रवृत्तिर्न वटोर्भवेत् ।
वृत्त्यर्थाध्यापनं नैव नित्याधीतिप्रयोजकम् ॥

विद्ध्यभावे प्रवर्तकाभावेन विफलायासे प्रवृतिर्न युक्ता । अधिकारज्ञानं तूपदेशेन समिदाहरणादाविव भवेदित्यर्थः । किञ्च ।

षण्णांतु कर्मणां मध्ये त्रीणि कर्माणि जीविकेति

स्मरणाद्ध्यापनस्य जीवनार्थत्वेन काम्यत्वावगमादानित्यत्वं गम्यते । तथाचाऽनित्येन नित्याध्ययनस्याऽनुष्ठानं न युक्तम् । नित्यानित्यसंयोगविरोधादित्याह । वृत्त्यर्थेति । अध्ययनस्य नित्यत्वे किं मानमित्यत आह—

नित्योपनयनाङ्गित्वादधीतेर्नित्यता भवेत् ।
अङ्गत्वमुपनीतेः स्यादधीताविति साधितम् ॥
अत ऊर्ध्वं त्रयो ऽप्येते यथा कालमसंस्कृताः । इति ।

उपनयनसंस्कारस्याऽकरणे प्रत्यवायश्रवणान्नित्यत्वम् । तदङ्गित्वादध्ययनं नित्यम्, अङ्गिनो नित्यत्वाभावे तदधीनाङ्गस्य नित्यत्वानुपपत्तेरर्थापत्तिमानमित्यर्थः ।

ननु श्रुत्यादिविनियोजकप्रमाणाभावादुपनयनस्याऽध्ययनाङ्गत्वं कथमित्यत आह । अङ्गत्वमिति । श्रुत्याद्यभावे ऽप्युपादानप्रमाणादङ्गत्वं सिध्यति । तथा हि । अनुष्ठानद्वारा स्वर्गादिफलकार्थावबोधहेतुवेदभाव्यकाध्ययनाविधेः स्वतन्त्रः सन्नाचार्याधीनो वेदमधीष्वेति नियमविधानादाचार्योपगमनमुपनयनपदगृहीतमन्तरेणानुपपद्यमानोपादानाख्येन विध्यन्यथानुपपत्तिप्रमाणेन उपनयनमङ्गतयोपादत्ते । न च निराकाङ्क्षमुपनयनं कथमुपादीयतइति वाच्यम् । तस्य निष्फलतया शेषिसापेक्षत्वात् ।

एवमङ्गत्वे सिद्धे प्रोक्षणादिवत्स्वरूपोपकारितया संस्कारकर्मत्वं सिध्यति । एवमुपनयनेन संस्कृतमाणवकनिर्वर्त्यमध्ययनं तदङ्गीति सिद्धं स्मृतिषु प्रकरणादिना ऽप्युपनयनाङ्गितया नित्यमध्ययनम् । अनुवाक्याः शूद्रसधर्माण इत्यादिना ऽनध्ययने प्रत्यवायश्रवणाच्च । नन्वध्यापनमपि जीवनार्थतया फलतो नित्यम् । तेन नित्याध्ययनं सिध्यतीति शङ्कते । नित्यापेक्ष्येति ।

नित्यापेक्ष्यधनार्थत्वान्नित्यमध्यापनं न हि ।
प्रतिग्रहादिना ऽपीह धनलाभस्य सम्भवात् ॥

नित्यं प्रत्यहमपेक्ष्यं धनं तदर्थत्वादध्यापनं नित्यमिति शङ्कार्थः । काम्ये कर्मणि फलेच्छा प्रवृत्तिहेतुः; न तु नित्यकर्मणीव विधिः । येन विधिनित्यत्वेन काम्यानुष्ठानं प्रत्यहं नित्यं स्यात् । तत्र धनफलस्य नित्यमिष्टत्वे ऽप्युपायान्तरेण फलेच्छापूर्तौ नाध्यापने नित्यप्रवृत्तिः हेत्वभावादिति परिहरति न हीत्यादिना । ननु ऋतौ भार्यामुपेयादिति पुत्रोत्पादनविधिर्नित्यः पितुः स्वपुत्रानुष्ठितकर्मद्वारा पितॄणां ऋणं पर्यवस्यन्ननुष्ठानार्थं पुत्रस्योपनयनपूर्वकाध्यापनार्थं ज्ञानात्मकमनुशासनमपेक्षते । तदनुशासनं नित्यविध्यङ्गतयेति । तस्मात्पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेवमनुशासतीति विधिना पित्रा नित्यमनुष्ठेयमिति तत्प्रयुक्त्या नित्याध्ययनमर्थज्ञानञ्च सिध्यतीति शङ्कते—

पुत्रोत्पादविधिर्नित्यः सो ऽनुशास्त्यङ्गकः स्मृतः ।
तदङ्गत्वेन नित्यत्वं नन्वध्यापनइष्यताम् ॥

अथातः सम्प्रत्तिरित्यादिश्रुतौ मरिष्यता पित्रा वेदयज्ञलोकानां स्वीयानां सुशिक्षिते पुत्रे समर्प्यमाणानां पुत्रेण स्वीकरणं सम्प्रत्तिनामकं कर्म विहितम् । तद्धेतुत्वादिदमनुशासनं ते पुत्र त्वदीयं कर्माचार्योपगमनाध्ययनादि नित्यं त्वया ऽनुष्ठेयमित्यवश्यं कर्तव्यार्थोपदेशनमात्रम् । तस्मात्पुत्रमिति वाक्ये श्रुतमर्थवाद एव स्यात् । न तूपनयनादिरूपमनुशासनं पितुर्नित्यविध्यङ्गतया विधीयते नित्यविध्यधिकारिणः पितुरायुर्नियमाभावेन बहुकालसाध्याङ्गविधानायोगादिति परिहरति । नैवमिति—

नैवं सम्प्रत्ति शेषत्वादर्थवादो ऽनुशासनम् ।
उपदेशनमात्रं स्यात्तस्मात्पुत्रमिति श्रुतम् ॥

किं चोपनीयाध्यापयेदित्याचार्यस्य विधिप्रयुक्तमध्ययनं यदि तदा शिष्य उपनीय मृते आचार्ये अध्ययनं न स्यात् । शिष्याध्ययने विध्यनङ्गीकारादध्यापनाधिकारिणो मृतत्वादधिकारिणः प्रतिनिध्यभावादुपनयनरूपाङ्गस्य जातत्वेनाचार्यान्तरेणाध्यापयितुमयुक्तत्वात्स्वकर्तृकोपनयनस्यैवाङ्गत्वात् । तस्मादनित्येनाध्यापनेन नित्यस्याध्ययनस्यानुष्ठानमयुक्तमिति स्वविधिनैवानुष्ठानमित्युपसंहरति । तस्मादिति—

तस्मादनित्यसंयोगो नित्यस्येह विरुध्यते ।
नित्यमध्ययनं स्वेन विधिनैव प्रयुज्यते ॥

ननु तर्हि अध्ययनविधिनैवाध्यापनसिद्धेस्तमध्यापयीतेति विधिर्व्यर्थ इति चेत्सत्यम् । न ह्यत्राध्यापनं विधीयते । तस्य प्रयोजकव्यापारत्वाकारेण वृत्त्यर्थतया रागतो याजनवत् प्राप्तत्वात् । अध्ययनविधौ सत्यर्थादध्यापनत्वाकारेणाऽपि प्राप्तेरवश्यंभावित्वात् । तस्माद्रागतो ऽर्थतो वा प्राप्तमध्यापनं णिचा ऽनूद्यते । भाविप्राप्त्या ऽप्यनुवादसंभवात् । अध्ययनं तु विधीयते । विधिं विना प्राप्त्यभावात् । यथा ग्रामकामं याजयेदित्यत्र णिचा याजनमनूद्य यजनं विधीयते तद्वत् ।

ननु तमध्यापयीतेति शिष्यव्यापारे विधिर्न युक्तः । उपनयीतेत्याचार्यव्यापारविधानात् । न चाऽत्राऽप्यपगमनं शिष्यस्य विधेयम् । अप्राप्तत्वात् । न तूपनयनं रागतो ऽर्थतो वा प्राप्तत्वादिति वाच्यम् । उपगमनस्य वाचकाभावेनाप्रतीतेरिति चेत्तत्राह । लक्षयित्वेति । लक्षयित्वोपगमनमप्राप्तत्वाद्विधीयते—

णिजर्थो ऽनूद्यते वाक्ये तत्राधीतिर्विरुध्यते ।

उपनयीतेत्युक्ते नीयमानशिष्यव्यापारो ऽर्थाद्गम्यते । स एव तत्पदेन लक्षणया विधीयते । विधिं विना प्राप्त्यभावादित्यर्थः । उत्तरार्धस्थवाक्ये तन्नेति पदद्वयं पूर्वार्द्धे ऽपि सम्बध्यते । उपनयीत तमध्यापयीतेति वाक्ये इत्यर्थः । एवञ्चोपगच्छेत्सो ऽधीयीतेति विधिः परिणतो भवति । कस्तत्राधिकारी तत्राह । वय इति—

वयोजातियुगाद्ये ऽधिकार्यन्त्ये तूपनीतकः ।
स्वामित्वपूर्वकर्तृत्वं मतं तेषां नियोगिनाम् ॥

अष्टवर्षत्वं वयः । ब्राह्मणत्वं जातिः । इदं द्वयं मिथोविशिष्टमधिकारिविशेषणं न प्रत्येकमतिप्रसङ्गात् । तत्राद्ये ऽङ्गे उपगमने वयोविशिष्टजातियुक्तो ऽधिकारी । अन्त्ये ऽङ्गिन्यध्ययने स एव ब्राह्मणो ऽधिकारी अङ्गाङ्गिनोरेकाधिकारात् । वयस्तु नाऽत्र विशेषणमङ्गकालस्याङ्गिन्यनुपपत्तेः । अनुष्ठितपूर्वाङ्गस्यैवाङ्गचनुष्ठानमित्यभिप्रेत्योपनीतको ऽन्त्ये ऽधिकारीत्युक्तमिति विभागः ।

अत्र प्राभाकराः । वयोजात्योर्नाधिकारनिमित्तत्वम् उपादेयकर्तृविशेषणत्वादिति मन्यन्ते । तथा हि । विधितो ऽनुष्ठेयं क्रियाकारकं तद्विशेषणमिति त्रयमुपादेयमित्युच्यते । यथा व्रीहिभिर्यजेतेति यागो व्रीहयो बहुत्वं च यत्पुनरननुष्ठेयतया विधिसम्बन्धि तदनुपादेयमुद्दे-

इयमुच्यते, यथा यः स्वर्गकामः स यजेतेत्यत्र स्वर्गकामः तत्र लिङर्थो नियोगः स्वरूपज्ञतये विषयमिवाधिकारिणमादावपेक्षते। अधिकारो नामात्र ममायं नियोग इति स्वामित्वेनान्वयस्तद्बोधे निमित्तमनुपादेयविशेषणं प्रधानमेव भवति यथा स्वर्गकामना तस्या उद्देश्यविशेषणत्वेन विध्यपेक्षया प्राधान्यान्न कर्तृविशेषणं तत्र निमित्तं कर्तृकारकस्य क्रियाद्वारा विधिं नियोगं प्रति गुणत्वेन तद्विशेषणस्य सुतरां गुणतया स्वामित्वान्वयहेतुत्वायोगात्। प्रकृते च तमध्यापयीतेति द्वितीयया ऽध्ययनकर्तृत्वं गम्यते। धात्वर्थकर्तुरेव णिचि कर्मत्वात्। तत्र णिजर्थानुवादेन कर्तृव्यापारविधाने वयोजात्योरुपादेयविशेषणत्वात् नाधिकारनिमित्तत्वमिति। तदङ्गीकरोति स्वामित्वेति। स्वामित्वान्वयादनन्तरं मया क्रियया साध्यो नियोग इति कर्तृत्वान्वय इति येषां मतं तेषामधिकारे निमित्तमनुपादेयविशेषणं भवत्वित्यर्थः। कथं तर्ह्युपादेयविशेषणस्य जात्यादेस्तत्र निमित्ततेति चेत् भट्टमतेनेत्याह। कर्तृत्वेति—

अधिकारे निमित्तं स्यादनादेयविशेषणम्।
कर्तृत्वपूर्वं स्वामित्वं भावनावादिनां मतम्॥

भावना हि विध्यर्थः क्रियात्वात् कर्तारमादावपेक्षते इति स्वर्गकामादिः कर्तृत्वेनैव प्रथमं सम्बध्यते। पश्चात्कर्तुः क्रियाफलमिति न्यायेन ममेदं कर्मेति भोक्तृतया ऽन्वेतीति कर्तृत्वान्वयपूर्वकस्वामित्वान्वयो ऽधिकारस्तत्र निमित्तं कर्तृविशेषणमेव कामनादिकं भवति। तथा च जात्यादेर्निमित्तत्वं युक्तमिति भावः। अस्माकं तु श्रेयःसाधनत्वं विध्यर्थः। तत्र यजेत यागः श्रेयःसाधनमित्युक्ते कस्य श्रेयो भोक्तुराकाङ्क्षितत्वात्स्वर्गकामादिस्वामित्वेनैव विधिना सम्बध्यते। पश्चान्मदिष्टसाधनत्वान्मया कर्तव्यं कर्मेति स्वामित्वान्वयपूर्वकः कर्तृत्वान्वयः न कामना। वयोजातिजीवनादिकमनुपादेयविशेषणमेवाधिकारहेतुर्भवतीत्याह। स्वामित्वेति—

तेषां तत्र निमित्तं स्यादुपादेयविशेषणम्।
स्वामित्वपूर्वं कर्तृत्वं श्रेयःसाधनवादिनाम्॥
अस्माकं तत्र हेतुः स्यादनादेयविशेषणम्।

वयोजात्योरधिकारनिमित्तत्वसमर्थनस्य विधिनित्यत्वं फलमाह। एवं नित्य इति—

एवं नित्यो ऽधीतिविधिर्वेदावाप्तौ समाप्यते ।
कर्मणां विधयस्तत्र विचारस्य प्रयोजकाः ॥

अवाप्तिपर्यन्तमध्ययनं तस्यावृत्तिरर्थाल्लभ्यते । नन्वेवमध्ययनविधेर्नित्यत्वे विचारप्रयोजकत्वाभावादधीतो वेदो विचारहेतुरिति भाष्यविरोध इत्याशङ्क्य परम्परया प्रयोजकत्वान्न विरोध इत्याह। कर्मणामिति। अध्ययनविधिना ऽऽप्ते स्वाध्याये तत्र सन्दिग्धार्था विधय उपलभ्यमाना अवश्यानुष्ठेयार्थत्वादनुष्ठानहेत्वर्थनिर्णयाय स्वस्य वाक्यविचारं पृथक् पृथक् आक्षिपन्तीति परम्परया ऽध्ययनविधिविचारप्रयोजकाः। साक्षात्प्रयोजकास्तु नित्यादिविधयः। न च ते ब्रह्मविचारस्याऽपि प्रयोजकाः। ब्रह्मज्ञानस्य नित्यादिविध्यनपेक्षितत्वात्। तस्मादधीतवेदस्य धर्मविचारो विधिभिः प्राप्त इति शाबरभाष्यमविरुद्धमित्यर्थः। परमप्रकृतमुपसंहरति । श्रोतव्य इति—

श्रोतव्यविधिनैवातो वेदान्तार्थविचारणा ।
आनन्तर्यमुखेनास्यामधिकारी समर्प्यते ॥

अतो ऽध्ययनविधेर्नित्यत्वात्कर्मविधीनां स्वविचारमात्रहेतुत्वादित्यर्थः । मुखं द्वारं अथशब्देनेति शेषः । अस्य मङ्गलाद्यर्थत्वं नेत्युक्तत्वादानन्तर्यार्थकत्वं जिज्ञासायाः सामग्रीज्ञानाय वक्तव्यम् । पुष्कलकारणात्कार्यस्याव्यवधानेन नियतत्वादानन्तर्ये मुख्यमिति तदभिधाने भवत्येव सामग्रीज्ञानम् । प्रकृतादर्थान्तरत्वोक्तौ तु तन्न भवति। अकारणस्याऽपि प्रकृतत्वसम्भवात्। किञ्च कारणादानन्तर्योक्तौ प्रकृतादर्थान्तरत्वमन्तर्भवति; न कारणानन्तर्यमर्थान्तरत्वे ऽन्तर्भवति। तस्मादानन्तर्याऽभिधानद्वारा तदवधिसामग्रीसंपन्नाधिकारी समर्प्यते इति भावः। अधुना ऽऽनन्तर्यविधिः साधनचतुष्टयसंपत्तिरेव परिशेषादिति वक्तुमवध्यन्तरं दूषयति । आनन्तर्येति—

आनन्तर्यविधिस्तत्र नाधीतिर्नाऽपि कर्मधीः ।
न तन्न्यायो ऽथ कर्माऽपि शुद्ध्यन्यद्वारकं न च ॥

तत्र जिज्ञासायामानन्तर्यविधित्वेन पुष्कलकारणमेव वक्तव्यं तदानन्तर्यस्यैव मुख्यत्वादधिकारिसिद्धिहेतुत्वाच्च । वेदाध्ययनन्तु धर्मजिज्ञासासाधारणं न ब्रह्मजिज्ञासायाः पुष्कलकारणमतो नावधिः।

अत्र वृत्तिकृत आहुः । आनन्तर्यविधिर्धर्मजिज्ञासा । तस्या ब्रह्मजिज्ञासोपकारकत्वात् । यस्यैते चत्वारिंशत्संस्काराः स ब्रह्मणः सायुज्यं सलोकतां गच्छति ।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।

विविदिषन्ति यज्ञेनेत्यादिस्मृतिश्रुतिपरेभ्यः उपकारकत्वावगमात् । एवं सति सम्पूर्णस्य वेदस्यैकमोक्षफलकत्वादेकेनाध्ययनविधिनोपादानं युक्ततरं भवतीति। तत्र वक्तव्यं कोयं धर्मजिज्ञासा ? किं द्वादशलक्षण्यां स्थितं न्यायसहस्रं, उत तज्ज्ञः कर्मावबोधः, अथवा कर्म ? तत्र न तावत्कर्मावबोधो ब्रह्मविचारप्रवृत्तिहेतुः । अन्यज्ञानादन्यत्र प्रवृत्त्ययोगात् । नाऽपि विचारसाध्यब्रह्मावबोधे हेतुः । कर्मब्रह्मणोर्व्याप्त्यभावात् । न हि सम्बन्धं विना ऽन्यज्ञानादन्यज्ञानं भवति । अस्तु तर्हि न्यायसहस्रमानन्तर्यविधिः। तदपेक्षत्वाद्ब्रह्मविचारस्येति चेन्न । कृतिसाध्यधर्मनिर्णयापेक्षितानामुत्पत्तिविनियोगप्रयोगाधिकारातिदेशादिन्यायानां स्वतः सिद्धब्रह्मविचारानपेक्षितत्वात् । श्रुतिलिङ्गादयस्तु लोकसिद्धा एव धर्मब्रह्मविचारयोरुपादीयन्ते ।

ननु गुणोपसंहारे विध्यपेक्षितोत्पत्त्यादिन्याया अपेक्ष्यन्ते इति चेत्सत्यम् । उपासनाया धर्मविशेषितत्वात्तद्विचारे विधिन्यायापेक्षोपपत्तेः। स्यादेतत्। अथाऽतो धर्मजिज्ञासेत्यादिप्रथमपादे वर्णिता वेदप्रामाण्यापेक्षिता अध्ययनविधेरर्थावबोधावसानत्वेन वेदस्य विवक्षितत्वाच्छब्दार्थसम्बन्धस्यौत्पत्तिकत्वादपौरुषेयत्वादित्यादयो न्याया वेदमूलब्रह्मविचारे ऽपेक्षिता इति उच्यन्ते । अध्ययनवदेते न्याया अपि धर्मब्रह्मविचारयोः साधारणत्वान्नानन्तर्यावधिभूता इति।वस्तुत एते न्यायाः शास्त्रयोनित्वा, दत एव च नित्यत्वं, समाननामरूपत्वादित्यस्मच्छास्त्रे सन्तीति न पूर्वतन्त्रापेक्षा ।

नन्वस्तु कर्मानन्तर्यं ब्रह्मविचारस्येत्यत आह । अथ कर्माणीति । चो ऽवधारणे । प्रतिनकारमवधिपदं सम्बध्यते । कर्माऽपि शुद्ध्यतिरिक्तद्वारेण नैवावधिरित्यर्थः । तथा हि । प्रासादारोहणे सोपानक्रमवदाचमनादीनां सहस्रसंवत्सरान्तानां कर्मणामनुष्ठानक्रमेण द्वारेण न ब्रह्मजिज्ञासायां हेतुत्वं मानाभावात् । न ह्युत्तरकर्मोपादानात्पूर्वकर्मत्यागे चरमकर्मान्ते ब्रह्मजिज्ञासोत्पत्तौ च मानमस्ति । स्यादेतत् । ब्रह्मविचारे कामध्वंसो हेतुः । सकामस्य तदसम्भवात् । तथा च कर्मणां हि रागभ्रान्तफलोपभोगेन वैराग्यद्वारा तत्र हेतुत्वमिति तन्न स्यात्। हिरण्यगर्भस्यैव शास्त्राधिकारित्वोपपत्तेः, भोगस्य कामाभिवृद्धिहेतुत्वेन वैराग्यहेतुत्वायोगाच्च । क्षयादिदोषदर्शनं हि वैराग्यहेतुर्न भोगः । यत्तु स्वर्गकामो यजेत गोदोहनेन पशुकामस्ये-

त्यादिशब्दे देहात्मत्वाधिकारिभेदादिर्द्वैतनाशप्रमित्यर्थः। अतः कर्मकाण्डस्य कर्मणि प्रवृत्तिव्याजेन द्वैतनाशप्रमितिद्वारा ब्रह्मज्ञानार्थतेति। तन्न। कर्मवाक्यं तु द्वैतनाशस्याप्रतीतेः।

अत्र के चित्। भवतु तर्हि पुरुषसंस्कारकर्मत्वं फलं तद्द्वारा कर्मणां जिज्ञासाहेतुत्वात्कर्मानुष्ठानानन्तर्यमथशब्दार्थ इति। ननु स्वतन्त्रफलसाधनानां संस्कारकर्मत्वं न युक्तम्। तथात्वे प्रोक्षणादिवत्स्वतन्त्रफलसाधनत्वविरोधादिति चेदुच्यते। चत्वारिंशत्संस्कारा इत्यादिस्मृतेः धर्मेण पापमपनुदति इदमनेनाङ्गं संस्क्रियते इत्यादिश्रुतेश्च सर्वेषां कर्मणां पापक्षयरूपसंस्कारहेतुत्वं वाच्यम्। स च संस्कारः श्रवणादौ सति ज्ञाने उपकरोति तदभावे सर्वे एते पुण्यलोका भवन्तीत्यादिश्रुत्यवगतस्वतन्त्रपितृलोकादिफले उपकरोतीति व्यवस्था। अत एव यस्यैते चत्वारिंशत्संस्काराः स ब्रह्मणः सायुज्यं सलोकतां गच्छतीति फलद्वयोक्तिर्युज्यते।

नन्वत्र सायुज्यसालोक्यलिङ्गात्कार्यं ब्रह्मापिरेव न मुक्तिः। तथा च संस्कारस्य ज्ञानद्वारा मुक्तिहेतुत्वं कथं ज्ञेयमिति चेदुच्यते। अभेदे हि सायुज्यशब्दो मुख्यः। न च कार्यब्रह्माभेदो जीवस्य युक्तः। पूर्वरूपे स्थिते नष्टे वा ऽन्यस्यान्यात्मत्वायोगात्। अत उक्तव्यवस्थया मुक्तिसालोक्ये उच्येते। स्मृत्या स्वे स्वे कर्मण्यभिरते इत्यादिगीतायां 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते' इत्यादिस्मृतौ च संस्कारस्य मुक्तिद्वारत्वं स्फुटं दर्शितम्। एवं च विधेयकर्माङ्गसंस्कारकर्मण एव गुणकर्मत्वादविधेयब्रह्मज्ञानकारकमनःसंस्कारकर्मणां गुणकर्मत्वाभावात् न स्वतन्त्रफलसाधनत्वं विरुध्यते। अङ्गं हि फलश्रुतिरर्थवादः। न च संस्कारकर्मत्वेनाङ्गत्वानुमानम् आधाने व्यभिचारात्। तस्माद् द्रव्यार्जनविधेः सत्यां श्रद्धायां क्रतूपकारकत्वं तदभावे भोगार्थत्वं यथा; तद्वत्सर्वकर्मणामनियमेन श्रवणादिसहकारिभेदादुभयार्थत्वमित्येकः पक्षः। यथोत्पत्तिमात्रसिद्धाग्निहोत्रादीनां स्वर्गकामादिवाक्यैः स्वर्गादिसम्बन्धस्तथा विविदिषावाक्येनेष्यमाणज्ञानसम्बन्धः संयोगपृथक्त्वन्यायादित्यपरः पक्षः। अस्मिन्पक्षे कर्मणां नियमेन ज्ञानार्थत्वं तादर्थ्यविधानात्। तत्रेच्छाया विषयसौन्दर्यलभ्यतया कर्मसाध्यत्वायोगाद्ब्रह्मसाक्षात्कारस्य प्रतिबन्धनिवृत्तिद्वारा साध्यत्वसम्भवात्। यज्ञेनेत्यादिसुबन्तपदैर्व्यवहितान्यपि कर्माण्यनूद्य विविदिषन्तीत्यत्र लेट्-

परिग्रहेण साक्षात्कारकामो यज्ञादीन्यनुतिष्ठेदिति विधिः परिणम्यते । कुण्डपायिनां सत्रे तु मासमग्निहोत्रं जुहोतीति श्रुतम् अग्निहोत्रं जुह्वति पदयोः साध्यकर्मवाचित्वेन मासाग्निहोत्रं कर्मान्तरव्यवहितमग्निहोत्रपरामर्शकपदाभावात् कर्मणां मुक्तौ साक्षाद्धेतुत्वमप्रामाणिकं नान्यः पन्था विद्यते इत्यादिमानविरुद्धश्च । तस्माच्चित्तशुद्धिविवेकवैराग्यादिपरम्परया ज्ञानार्थानि कर्माणीति सिद्धम् । अतः कर्मानन्तर्यम् अथशब्दार्थ इति प्राप्ते ब्रूमः । प्रवृत्तिपूर्वक्षणे सतो निश्चितस्यैवाधिकारिविशेषणत्वम् । न च जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवेत्यादि श्रुतेः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेदित्यादिस्मृतेश्च एकजन्मार्जितेन शुद्धिर्द्वारमिति कर्मावगमः प्रवृत्तिहेतुरिति वाच्यम् । ब्रह्मचर्यादेव प्रव्रजेदिति विधिविरोधेनार्थवादश्रुतिस्मृत्योर्दुर्बलत्वादिति । ननु जायमान इति वाक्यस्य हृदयाद्यवदानविधिशेषार्थवादत्वे ऽपि ब्रह्मचर्यं समाप्य गृही भवेदिति क्रमश्रुतेरुक्तस्मृतेश्च का गतिरित्यत आह । वटोरिति—

क्रमो भोगेन वैराग्यं द्वैतनाशश्च कर्मणाम् ।
द्वारं न स्यात्किन्तु शुद्धिः सा ऽपि नैकभवार्जिता ॥
वटोः संन्यासकथनादविरक्ते क्रमश्रुतिः ।
ऋणश्रुतिश्च सामर्थ्यं नान्धादेर्न्यासयोग्यता ॥

ननु ब्रह्मचर्यादेवेति वाक्यं कर्मानधिकार्यन्धपङ्ग्वादिविषयमस्तु । अतः श्रुतिस्मृतिभ्यां कर्मानन्तरं संन्यासपूर्वकब्रह्मजिज्ञासेत्याह । नान्धादेरिति । श्रवणाद्यसमर्थस्य ज्ञानार्थसंन्यासे नाधिकारः । ननु गुरुमेवाभिगच्छेत् कर्णाभ्यां भूरि विश्रुवं अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमित्यादिश्रुतेः दृष्टिपूतं न्यसेत्पादमित्यादिस्मृतेश्च पटुतरेन्द्रियस्यैव संन्यासप्रतीतेः गृहाद्वा वनाद्वेत्यधिकारिसमभिव्याहाराच्च । तस्मात्सति वैराग्ये कर्माधिकारिणां संन्यासपूर्वकब्रह्मजिज्ञासाविधानान्न तस्याः कर्मानन्तर्यम् । अत्र प्रसङ्गाद्यज्ञोपवीतत्यागो नास्तीति भट्टभास्करमतमाशङ्क्य इदमेवास्य तद्यज्ञोपवीतं य आत्मा मुण्डोपरिग्रह इत्यादिश्रुतेः अत उर्ध्वं यज्ञोपवीतमासनमित्यादीनि वर्जयित्वेत्यादिस्मृतेश्च तत्याग इति साधितम् । एतत्सर्वमभिप्रेत्योक्तं भगवत्पादैः धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति । अथाऽपि हृदयस्याग्रे ऽवद्यत्यथ जिह्वायाः अथ वक्षस इत्यत्रानन्तर्यद्वारा क्रमार्थो ऽथशब्दो यथा, तद्वदत्रास्त्वित्यत आह । न क्रमार्थ इति—

न क्रमार्थो ऽथशब्दः स्याद्धर्मब्रह्मविचारयोः ।
सूत्रस्य न्यायवेदित्वात्क्रमस्याप्यनपेक्षणात् ॥

किं विचारयोः क्रमे सूत्रं मानम् उत एकैकप्रयोगानुपपत्तेः? नाद्यः। सूत्रस्य मानापेक्षितन्यायसूचकत्वेन स्वयं मानत्वायोगात् । न द्वितीयः। तयोः शेषशेषित्वे ऽधिकृताधिकारे वा मानाभावेनैव प्रयोगासिद्धेः। नन्वाग्नेयादीनामेकफलकत्वेन यथा क्रमापेक्षा यथा वा द्वादशाध्यायानामेकधर्मजिज्ञास्यकत्वेन क्रमापेक्षा तथा धर्मब्रह्मविचारयोर्मोक्षफलकत्वेन ब्रह्मजिज्ञास्यकत्वेन च क्रमापेक्षा ऽस्त्विति चेन्न । तयोः फलभेदात्। ब्रह्मविचारस्य ज्ञानद्वारा मुक्तिः फलं न धर्मविचारस्य स्वर्गकामादिवाक्यैः कर्मणामभ्युदयफलकत्वावगमात् तेषां मुक्तिहेतुत्वे मानाभावान्न कर्मणेत्यादिना निषेधाच्च। न च केवलकर्मणां निषेधो न ज्ञानसमुच्चितानामिति वाच्यम्। समुच्चये मानाभावात्। न तावद्विविदिषावाक्यं तत्र मानम्। तस्य कर्मणां ज्ञानार्थत्वबोधकत्वात्, अविद्यया मृत्युं तीर्त्वैति कर्मणां पापनिवृत्तिफलमुक्त्वा विद्यया ऽमृतमश्नुते इति फलभेदश्रुतेश्च, वेदान्तेषु ज्ञानादेव कैवल्यमित्युद्घोषाच्च, । संन्यासस्य ज्ञानाङ्गतया विधानाच्च न कर्मसमुच्चयो मुक्तिहेतुः। न च नित्यकर्मणां विध्यनुपपत्त्या साक्षान्मुक्तिफलकत्वम्। शुद्धादिपरम्परया सफलत्वे ऽपि विध्युपपत्तेः। कर्मणां ब्रह्मात्मैक्ये अविद्याध्वंसे वा सामर्थ्याभावाच्च । बन्धमूलाविद्यानङ्गीकारे ज्ञानवैयर्थ्यप्रसङ्गात्तदङ्गीकारे ज्ञानादेव तन्निवृत्तेर्न समुच्चयावकाशः ।

एतेन समुच्चयसामर्थ्यात्कर्मावबोधानन्तर्यं भास्करोक्तं परास्तम्। किं च समुच्चयपक्षे ऽप्यानन्तर्यनियमो दुर्वचः । ज्ञानवतैवानुष्ठितस्य कर्मणो मोक्षहेतुत्वेन प्रथमाश्रमएव मुमुक्षोर्ब्रह्मावबोधानन्तरकर्मवाक्याध्ययनविचारादिकर्मानुष्ठानस्य युक्ततया वैपरीत्यस्य सुवचत्वात् । न च नित्याध्ययनविधिप्रयुक्तत्वात्कर्मविचारस्य प्रथममनुष्ठेयत्वमिति वाच्यम् । ब्रह्मविचाराविरोधेनापि तदनुष्ठानसम्भवात्तत्प्रयुक्तत्वासिद्धेश्च । तत्प्रयुक्तत्वे वा ब्रह्मविचारस्याऽपि तत्प्रयुक्ततया प्राथम्यं किं न स्यात् । न च श्रोतव्यविधिसद्भावान्न ब्रह्मविचारस्य नित्याध्ययनविधिप्रयुक्ततेति वाच्यम् । क्लृप्तविधिनैव प्रयोगसम्भवे श्रोतव्यविध्यसिद्धेः । न च शमाद्यनपेक्षाध्ययनविधिना शमाद्यङ्गकश्रवणप्रयोगो न सम्भवतीति वाच्यम् । वाक्यान्तरे शिरो-

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली ।

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं स-भाष्यं खण्डानि ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपाद-भाष्यसहिता	१	०
वाक्यपदीयं खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ८	८	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपा-दप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्र-म् सभाष्यं खण्डानि ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम्	१	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिका च सहितम् खण्डानि ४	४	०
विवरणोपन्यासः	१	०
न्यायलीलावती (यन्त्रस्था)	०	०

इन से अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकैं हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजैं ॥

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

विज्ञापनम् ।

बनारस:संस्कृतसीरीज़नाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

—:o:—

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषा-निबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

ब्रजभूषणदास और कम्पनी
चांदनीचौक के उत्तर नई सड़क
बनारस ।

B
132
V3R33
1900
pt.1

Rāmānanda Sarasvati Svāmi

Vivaranopanyasah

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY